[illegible]

[illegible]

[illegible]

अपरिमिति

॥ गी॰भा॰ ॥ ॥श्रीस्वामिनारायणायनमोनमः॥ अथगीताभाष्यंलिख्यते॥ यत्पादांबुरुहध्यानानंदनिर्हृतचेतसः
॥१॥ मुक्तिमप्यवजानंतितंवंदेपुरुषोत्तमं॥१॥ अथनिरवधिकातिशयकल्याणैकतानोऽनंतज्ञानानंदैकस्व
रूपः स्वाभाविकानवधिकातिशयज्ञानशक्तिबलैश्वर्यवीर्यतेजः प्रभृत्यसंख्येयकल्याणगुणगणम
होदधिः स्वाभिमतानुरूपानंतनित्ययौवनाद्यनंतगुणनिधिर्दिव्यरूपः स्वोचितविविधविचित्रनिरपा अपरिमित
यापरिमितदिव्यभूषणः स्वानुरूपासंख्येयाचिंत्याकृतिनिरतिशयकल्याणदिव्यायुधः स्वाभिमतनि
त्यनिरपायानुरूपगुणविभवैश्वर्यः स्वसंकल्पानुविधायिस्वरूपस्थितिप्रवृत्तिनित्यशेषत्वैकरतिरू स्व
पनिरवद्यनिरतिशयज्ञानक्रियाद्यनंतगुणगणैरपरिमितैः सूरिभिरनवरतास्वादितचरणयुगानुभ
वानंदः परिच्छेद्यस्वरूपस्वभावतयास्वोचितविविधानंतभोक्तृभोग्यभोगोपकरणभोगस्थानसमृद्धानं
ताश्चर्यमहाविभूतिरनंतपरिमाणनित्यनिरपायनिरवद्याक्षरपरमव्योमनिलयोविविधविचित्रभोग्यभो
क्तृवर्गपूर्णनिखिलजगदुदयविभवलयलीलः परब्रह्मभूतः पुरुषोत्तमोनारायणोब्रह्मादिस्थावरांत
निखिलजगत्स्रष्टास्वेनरूपेणावस्थितोब्रह्मादिदेवमनुष्याणांध्यानार्चनाद्यगोचरः पारकारुण्य १

[illegible]

सौशील्यवात्सल्यौदार्यमहोदधिः स्वमेवरूपंतत्तत्सजातीयसंस्थानंकुर्वन्स्वस्वभावमजहदेवतेषुतेषुलोकेष्व
यजन वतीर्यतैस्तैराराधितस्तत्तदिष्टानुरूपंधर्मार्थकाममोक्षफलंप्रापयन्भूभारावतारणापदेशेनास्मदा
दीनामपिसंसारदुःखशमनायसकलमनुष्यनयनविषयतांगतः परापरनिखिलजनसंतापहराणि
चेष्टितानिकुर्वन्केशिकंसादीन्निहत्यानवधिकदयासौहार्दानुरागगर्भावलोकनामृतैराभीरजनाना
प्याययन्निरतिशयसौंदर्यसौगंध्यादिगुणगणाविष्कारेणाक्रूरोधवादिकान्परमभागवतान्कृत्वा
पांडवानपिपरमविपत्तेनानुरंजयन्परमपुरुषार्थलक्षणमोक्षसाधनतयावेदांतोदितंस्वविषयंज्ञान
कर्मानुगतंभक्तियोगमवतारयामासतत्रपांडवानांकुरूणांचयुद्धेप्रारब्धेसभगवान्पुरुषोत्तमः सर्वेश्व
रोनिखिलजगदुपकृतिमर्त्यः स्वाश्रितजनवात्सल्यविवशः स्वात्मानंसर्वलोकसाक्षिकंपार्थसारथिं
चकारएवमर्जुनस्योत्कर्षंज्ञात्वापिधृतराष्ट्रः सर्वात्मनांधः सुयोधनविजयेसंदिहानः संजयंपप्रच्छ

॥ ॥ ॥ ॥

॥श्री॥ भा

॥२॥

अ० १

व्यूहरचनयासेनास्थापनकर्त्ता द्रुपदपुत्रः व्यूहरचनारक्षितसेनारक्षणकर्त्ता भीमः इतिदुर्योधनोरवैरूपं ॥५

॥धृतराष्ट्र उवाच॥ धर्मक्षेत्रइत्यारभ्यसघोषोधार्तराष्ट्राणामित्यंतं श्लोकाः॥ दुर्योधनो भीमाभिरक्षि
तं पांडवानां बलमात्मीयं च बलं भीष्माभिरक्षितमवलोक्यात्मविजयेन स्यबलस्यपर्याप्ततामात्मी

॥धृतराष्ट्र उवाच॥ धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः॥ मामकाः पांडवाश्चैव किमकुर्वत संजय॥१॥
संजय उवाच॥ दृष्ट्वा तु पांडवानीकं व्यूढं दुर्योधनस्तदा॥ आचार्यमुपसंगम्य राजा वचनमब्रवीत्॥२॥ प
श्यैतां पांडुपुत्राणामाचार्य महतीं चमूं॥ व्यूढां द्रुपदपुत्रेण तव शिष्येण धीमता॥३॥ अत्र शूरा महेष्वासा
भीमार्जुनसमा युधि॥ युयुधानो विराटश्च द्रुपदश्च महारथः॥४॥ धृष्टकेतुश्चेकितानः काशिराजश्च
वीर्यवान॥ पुरुजित्कुंतिभोजश्च शैब्यश्च नरपुंगवः॥५॥ युधामन्युश्च विक्रांत उत्तमौजाश्च वीर्यवान
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः॥६॥ अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम॥ नायका मम
सैन्यस्य संज्ञार्थं तान्ब्रवीमि ते॥७॥ भवान्भीष्मश्च कर्णश्च कृपश्च समितिंजयः॥ अश्वत्थामा विकर्णश्च
सौमदत्तिस्तथैव च॥८॥ अन्ये च बहवः शूरा मदर्थे त्यक्तजीविताः॥ नानाशस्त्रप्रहरणाः सर्वे युद्धवि
शारदाः॥९॥

सोमदत्तस्यपुत्रः भूरिश्रवाः

पवजस्यतद्विजयवाप्यापमनामाचार्यनिवेद्यांतर्विषण्णोभवत्॥ तस्यविषादमालोक्यभीष्मस्तस्यहर्षजन

॥२॥

नयितुं सिंहनादं शंखनादं च कृत्वा (स्वभावानकनीयान्) शंखभेरीनिनादैः स्वविजयाभिशंसिनं घोषं चा
कारयत ततस्तं घोषमाकर्ण्य सर्वेश्वरेश्वरः पार्थसारथीरथी च पांडुतनयस्तेजोक्य विजयोपकर

॥अपर्याप्तं तदस्माकं बलं भीष्माभिरक्षितं॥ पर्याप्तं त्विदमेतेषां बलं भीमाभिरक्षितं॥१०॥ अयनेषु च
सर्वेषु यथाभागमवस्थिताः॥ भीष्ममेवाभिरक्षंतु भवंतः सर्व एव हि॥११॥ तस्य संजनयन्हर्षं कुरुवृ
द्धः पितामहः॥ सिंहनादं विनद्योच्चैः शंखं दध्मौ प्रतापवान्॥१२॥ ततः शंखाश्च भेर्यश्च पणवानक
गोमुखाः॥ सहसैवाभ्यहन्यंत स शब्दस्तुमुलोऽभवत्॥१३॥ ततः श्वेतैर्हयैर्युक्ते महति स्यंदने स्थितौ॥ मा
धवः पांडवश्चैव दिव्यौ शंखौ प्रदध्मतुः॥१४॥ पांचजन्यं हृषीकेशो देवदत्तं धनंजयः॥ पौंड्रं दध्मौ
महाशंखं भीमकर्मा वृकोदरः॥१५॥ अनंतविजयं राजा कुंतीपुत्रो युधिष्ठिरः॥ नकुलः सहदेव
श्च सुघोषमणिपुष्पकौ॥१६॥ काश्यश्च परमेष्वासः शिखंडी च महारथः॥ धृष्टद्युम्नो विराटश्च
सात्यकिश्चापराजितः॥१७॥ काशिराजः
ताभूते महति स्यंदने स्थितौ त्रैलोक्यं कंपयंतौ श्रीमत्पांचजन्यदेवद
त्तौ दिव्यौ शंखौ प्रदध्मतुः॥ ततो युधिष्ठिरवृकोदरादयश्च स्वकीयान् शंखान् पृथक्पृथक् दध्मुः स

॥ गी॰भा॰
॥ ३ ॥

योयोदुर्योधनप्रमुखानां सर्वेषामेवभवत्सुत्राणां हृदयानिविभेदव्यदीर्यवनं कुरूणां बलमितिधार्त्तरा अ॰१
ष्ट्रामेनिरीक्ष्यवं नद्विजयाभिकांक्षिणे धृतराष्ट्राय संजयोऽकथयत् १९॥ अथव्यवस्थितानित्यारभ्य भी १४।१५।१६।१७।१८॥
ष्मद्रोणप्रमुखतइत्यंते अथयुद्धोद्यमनन्तरं व्यवस्थितान्धार्त्तराष्ट्रान्भीष्मद्रोणप्रमुखान्वीक्ष्य पांडुतनयो

॥ द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते॥ सौभद्रश्च महाबाहुः शंखान्दध्मुः पृथक्पृथक् ॥१८
स घोषो धार्त्तराष्ट्राणां हृदयानि व्यदारयत्॥ नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन्॥१९॥ अथ [illegible]
व्यवस्थितान्दृष्ट्वा धार्त्तराष्ट्रान्कपिध्वजः॥ प्रवृत्ते शस्त्रसंपाते धनुरुद्यम्य पांडवः॥२०॥ हृषीकेशं त
दावाक्यमिदमाह महीपते॥ सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत॥२१॥ यावदेतान्निरीक्षेऽहं योद्धुका
मानवस्थितान्॥ कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे॥२२॥ योत्स्यमानानवेक्षेऽहं य एतेऽत्र समाग
ताः॥ धार्त्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षवः॥२३॥

ज्ञानशक्तिबलैश्वर्यवीर्यतेजसां निधिः स्वसंकल्पकृतजगदुदयविभवलयलीलो हृषीकेशः परावरनि
खिललोकानां स्वाह्य सर्वकरणानां सर्वप्रकारकनियमनेऽवस्थितं समाश्रितवात्सल्यविवशतया स्व ३॥

सारथ्येऽवस्थितं युयुत्सूनेतान्समेतान्यावदहं निरीक्षे तावदुभयोः सेनयोर्मध्ये रथं स्थापयेति ज
गादनयाचोदितस्तत्क्षणादेव भीष्मद्रोणादीनां सर्वेषामेव महीक्षितां प्रमुखे हृषीकेशो यथोक्तमक॰

॥संजय उवाच॥ एवमुक्तो हृषीकेशो गुडाकेशेन भारत॥ सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमं॥
२४॥ भीष्मद्रोणप्रमुखतः सर्वेषां च महीक्षितां॥ उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति॥२५॥ त
त्रापश्यत्स्थितान्पार्थः पितॄनथ पितामहान्॥ आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्त
था॥२६॥ श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि॥ तान्समीक्ष्य स कौंतेयः सर्वान्बंधूनवस्थितान्॥ व
२७॥ कृपया परयाविष्टो विषीदन्निदमब्रवीत्॥ अर्जुन उवाच॥ दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुप
स्थितं॥२८॥ सीदंति मम गात्राणि मुखं च परिशुष्यति॥ वेपथुश्च शरीरे मे रोमहर्षश्च जायते॥२९॥ गां
डीवं स्रंसते हस्तात्त्वक्चैव परिदह्यते॥ न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः॥३०॥ निमित्तानि
च पश्यामि विपरीतानि केशव॥ न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे॥३१॥ रोत्रईदृगमवदीयानां

विजयस्थितिरितिचावोचत॥२५॥ तत्रापश्यत्स्थितान्पार्थ इत्यारभ्य एवमुक्त्वार्जुनः संख्ये इत्यंते एवं पा

र्वो महामनाः परमकारुणिको ऽतिधार्मिकः कोमलमना भवद्भिरतिघोरैर्मारणैर्जतुगृहादिभिर 

॥ ४ ॥ ॥ न कांक्षे विजयं कृष्ण न च राज्यं सुखानि च ॥ किं नो राज्येन गोविंद किं भोगैर्जीवितेन वा ॥ ३२ ॥ येषा
मर्थे कांक्षितं नो राज्यं भोगाः सुखानि च ॥ त इमेवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च ॥ ३३ ॥ आचा
र्याः पितरः पुत्रास्तथैव च पितामहाः ॥ मातुलाः श्वशुराः पौत्राः श्यालाः संबंधिनस्तथा ॥ ३४ ॥ एता
न्न हंतुमिच्छामि घ्नतोपि मधुसूदन ॥ अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते ॥ ३५ ॥ निहत्य धार्तरा
ष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ॥ पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः ॥ ३६ ॥ तस्मान्नार्हा वयं
हंतुं धार्तराष्ट्रान्स्वबांधवान् ॥ स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥ ३७ ॥ यद्यप्येते न पश्यंति
लोभोपहतचेतसः ॥ कुलक्षयकृतं दोषं मित्रद्रोहे च पातकं ॥ ३८ ॥ कथं न ज्ञेयमस्माभिः पापादस्मा
न्निवर्तितुं ॥ कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३९ ॥ कुलक्षये प्रणश्यंति कुलधर्माः सनात
नाः ॥ धर्मे नष्टे कुलं कृत्स्नमधर्मोभिभवत्युत ॥ ४० ॥
॥ सकृद्वितोपि परमपुरुषसहाये
नात्मना हनिष्यमाणान् भवदीयान्विलोक्य बंधुस्नेहेन परमकृपया धर्मभयेन चातिमात्रखिन्नम ४ ॥

र्वेगाचः सर्वथा न योत्स्यामीत्युक्त्वा बंधुविश्लेषजनितशोकसंविग्नमानसः सशरं चापमुत्सृज्य रथोपरि

अधर्माभिभवात्कृष्ण प्रदुष्यंति कुलस्त्रियः ॥ स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसंकरः ॥ ४१ ॥ संकरो नर
कायैव कुलघ्नानां कुलस्य च ॥ पतंति पितरो ह्येषां लुप्तपिंडोदकक्रियाः ॥ ४२ ॥ दोषैरेतैः कुलघ्नानां वर्ण
संकरकारकैः ॥ उत्साद्यंते जातिधर्माः कुलधर्माश्च शाश्वताः ॥ ४३ ॥ उत्सन्नकुलधर्माणां मनुष्याणां
जनार्दन ॥ नरके नियतं वासो भवतीत्यनुशुश्रुम ॥ ४४ ॥ अहो बत महत्पापं कर्तुं व्यवसिता वयं ॥ य
द्राज्यसुखलोभेन हंतुं स्वजनमुद्यताः ॥ ४५ ॥ यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ॥ धार्तराष्ट्रा र
णे हन्युस्तन्मे क्षेमतरं भवेत् ॥ ४६ ॥ संजय उवाच ॥ एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत् ॥ विसृ
ज्य सशरं चापं शोकसंविग्नमानसः ॥ ४७ ॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्री
कृष्णार्जुनसंवादे अर्जुनविषादो नाम प्रथमोऽध्याय ॥ १ ॥ ॥ श्रीहरिकृष्णाय नमः ॥

उपाविशत् ॥ ४७ ॥ इति श्रीमद्रामानुजाचार्यविरचिते गीताभाष्ये प्रथमोऽध्याय ॥ १ ॥ ॥ ॥

॥ गी॰ भा॰ ॥
॥ ५ ॥

[illegible] ... इति शेषः ...

तमित्यारभ्य क्लैब्यमित्यंतं ॥१॥ एवमुपविष्टे पार्थे कुतोयमस्थाने शोकनुपस्थित इत्याक्षिप्य तमिमं विष-
मस्थं शोकमविद्वत्सेवितं परलोकविरोधिनमकीर्त्तिकरमतिक्षुद्रं हृदयदौर्बल्यकृतं परित्यज्य युद्धायो-
त्तिष्ठेति ॥ श्रीभगवानुवाच ॥ पुनरपि पार्थः स्नेहकारुण्यधर्माकुलो भगवदुक्तं हितमजानन्निदमुवाच

॥ संजय उवाच ॥ तं तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणं ॥ विषीदंतमिदं वाक्यमुवाच मधुसूदनः ॥१॥ श्री-
भगवानुवाच ॥ कुतस्त्वा कश्मलमिदं विषमे समुपस्थितं ॥ अनार्यजुष्टमस्वर्ग्यमकीर्त्तिकरमर्जुन ॥२॥
क्लैब्यं मास्म गमः पार्थ नैतत्त्वय्युपपद्यते ॥ क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परंतप ॥३॥ अर्जुन उवाच
॥ कथं भीष्ममहं संख्ये द्रोणं च मधुसूदन ॥ इषुभिः प्रतियोत्स्यामि पूजार्हावरिसूदन ॥४॥ गुरूनह-
त्वा हि महानुभावान् श्रेयो भोक्तुं भैक्ष्यमपीह लोके ॥ हत्वाऽर्थकामांस्तु गुरूनिहैव भुंजीय भोगान् रुधिर-
प्रदिग्धान् ॥५॥

मन्ये इति शेषः

भीष्मद्रोणादिकान् बहुमंतव्यान् गुरून् कथमहं हनिष्यामि कथंतरां भोगेष्वतिमात्रसक्तांस्तान् हत्वा
तैर्भुज्यमानांस्तानेव भोगांस्तद्रुधिरेणोपसिच्य तेष्वासनेषूपविश्य भुंजीय तेषामसक्तो भवेयमिति ॥४॥५॥ ५ ॥

[illegible] ...

ननु युद्धमारभ्य निवृत्तव्यापारान् भवतो धार्तराष्ट्राः प्रसह्य हन्युरिति चेत् अस्तु तद्वधलब्धजयादध-
र्मादस्माकं धर्माधर्मानजानद्भिस्तैर्हननमेव गरीय इति मे प्रतिभाति इत्युक्त्वा यन्मह्यं श्रेय इति निश्चि-
तं स्यात् तच्छरणागताय तव शिष्याय मे ब्रूहीत्यतिमात्रकृपणो भगवत्पदाब्जमुपससाद ॥६॥७॥
एवमस्थाने समुपस्थितस्नेहकारुण्याभ्यामप्रकृतिं गतं क्षत्रियाणां परमधर्ममप्यधर्मं मन्वानं धर्मबुभु-

[illegible] ...

न चैतद्विद्मः कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयुः ॥ यानेव हत्वा न जिजीविषामस्तेऽवस्थिताः
प्रमुखे धार्तराष्ट्राः ॥६॥ कार्पण्यदोषोपहतस्वभावः पृच्छामि त्वां धर्मसंमूढचेताः ॥ यच्छ्रेयः स्या-
न्निश्चितं ब्रूहि तन्मे शिष्यस्तेऽहं शाधि मां त्वां प्रपन्नं ॥७॥ न हि प्रपश्यामि ममापनुद्याद्यच्छोकमुच्छोषणमि-
न्द्रियाणां ॥ अवाप्य भूमावसपत्नमृद्धं राज्यं सुराणामपि चाधिपत्यं ॥८॥ एवमुक्त्वा हृषीकेशं गुडाके-
शः परंतप ॥ न योत्स्य इति गोविंदमुक्त्वा तूष्णीं बभूव ह ॥९॥ संजय उवाच
तमेवं शरणागतं पार्थमुद्दिश्यात्मयाथात्म्य-
ज्ञानेन युद्धस्य फलाभिसंधिरहितस्य स्वधर्मस्यात्मयाथात्म्यप्राप्त्युपायताज्ञानेन च विनाऽस्य मोहो न
शाम्यतीति मत्वा भगवता परमपुरुषेणाध्यात्मशास्त्रावतरणं कृतं तदुक्तं अस्थाने स्नेहकारुण्यधर्मा-

[illegible] ...

१७ तत्कर्मेति शेषः
अभिमृताः

तमेवंदेहात्मनोर्याथात्म्याज्ञाननिमित्तंशोकाविष्टंदेहातिरिक्तात्मज्ञाननिमित्तंचधर्माधर्मेनाप्यमा
णंपरस्परविरुद्धगुणान्वितमुभयोःसेनयोर्युद्धायोद्युक्तयोर्मध्येऽकस्मान्निरुद्योगंपार्थमालोक्यपर
मपुरुषःप्रहसन्निदमुवाचपार्थंप्रहसन्निवपरिहासवाक्यंवदन्निवात्मपरमात्मयाथात्म्येनतच्छान्त्यु
पायभूतकर्मयोगज्ञानयोगभक्तियोगगोचरंनत्वेवाहंजातुनासमित्यारभ्यअहंत्वांसर्वपापेभ्योमोक्षयि
ष्यामिमाशुचइत्येतदंतंवाक्यमुवाचेत्यर्थः॥१०॥ अशोच्यानत्यनुशोचसिपतंतिपितरोह्येषांलुप्तपिं
डोदकक्रियाइत्यादिका॥

तमुवाचहृषीकेशःप्रहसन्निवभारत॥सेनयोरुभयोर्मध्येविषीदंतमिदंवचः॥१०॥श्री
भगवानुवाच॥ अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे॥

नदेहात्मस्वभावप्रज्ञानिमित्तवादांश्चनाप
संदेहात्मस्वभावप्रज्ञानवतांतुनात्रकिंचिच्छोकनिमित्तमस्तिगताऽसूनदेहान्अगतासूनात्मनश्चप्रति
तयोर्याथात्म्यविदोनशोचंतिअतस्त्वयिविरुद्धमिदमुपलभ्यतेयदेतान्नाहंहनिष्यामीत्यनुशोच
नंयच्चदेहातिरिक्तात्मज्ञानकृतंधर्माधर्मप्रापणमिति॥ अतोदेहस्वभावंनजानासितदतिरिक्तमात्मानं
चनित्यंतत्प्राप्त्युपायभूतंयुद्धादिकंधर्मंचइदंयुद्धंफलाभिसंधिरहितमात्मयाथात्म्यप्राप्त्युपायभूतं



आत्माहिनदेहजन्माधीनजन्मानदेहमरणाधीनविनाशश्चतस्यजन्ममरणयोरभावात्अतःसन
शोकस्थानंदेहस्त्वचेतनःपरिणामस्वभावस्तस्योत्पत्तिविनाशयोगःस्वाभाविकइतिसोऽपिनशोक
स्थानमित्यभिप्रायः॥११॥ प्रथमंतावदात्मनोःस्वभावंशृणुअहंसर्वेश्वरस्तावदतोवर्त्तमानात्पूर्वस्मि
न्ननादौकालेननासंअपितुआसंत्वंत्वन्मुखाश्चैतेईशितव्याःक्षेत्रज्ञाननासन्अपितुआसन्अहंच
यूयंचसर्वेवयमतःपरस्मिन्ननंतेकालेनचैवनभविष्यामःअपितुभविष्यामएवयथाऽहंसर्वेश्वरःपर

॥ गतासूनगतासूंश्चनानुशोचंतिपंडिताः॥११॥नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः॥

मात्मानित्यइतिनात्रसंशयः तथैवभवंतःक्षेत्रज्ञात्मानोऽपिनित्याएवेतिमंतव्याः एवंभगवतःसर्वेश्व
रादात्मनांपरस्परंचभेदःपारमार्थिकइतिभगवतैवोक्तइतिप्रतीयते अज्ञानमोहितंप्रतितन्निवृत्त्यै
पारमार्थिकनित्यत्वोपदेशः अहंत्वमिमेसर्वेवयमितिव्यपदेशात् औपाधिकात्मभेदवादेह्यात्मभे
दस्याऽतात्त्विकत्वेनतत्त्वोपदेशसमयेभेदनिर्देशोनसंगच्छते भगवदुक्तात्मभेदःस्वाभाविकइतिश्रु
तिरप्याह नित्योनित्यानांचेतनश्चेतनानामेकोबहूनांयोविदधातिकामानितिनित्यानांबहूनांचे

॥गी०भा० ॥७॥

तत्नानां च एकश्चेतनो नित्यश्च कामान् विदधातीत्यर्थः ॥ अज्ञानकृतभेददृष्टिवादे तु परमपुरुषस्य परमार्थतत्त्वदृष्टेर्निर्विशेषकूटस्थनित्यचैतन्यात्मयाथात्म्यसाक्षात्कारान्निवृत्ताज्ञानतत्कार्यतया अज्ञानकृतभेददर्शनं तन्मूलोपदेशादिव्यवहाराश्च न संगच्छंते परमपुरुषोपज्ञ इति पक्षे अर्जुनवाक्यात् परमपुरुषवाक्यस्याज्ञानमूलमिथ्यार्थत्वे विशेषाभावात् तस्योपदेशरूपत्वं अपि परमपुरुषस्याधिगताद्वैतज्ञानस्य बाधितानुवृत्तिरूपमिदं भेदज्ञानं दग्धपटादिवन्न बंधकमित्युच्यते नैतत् ॥ अ० २ ॥

वाक्यस्य

॥ नचैव न भविष्यामः सर्वे वयमतः परं ॥१२॥

उपपद्यते मरीचिकाजलज्ञानादिकं हि बाधितमनुवर्त्तमानमपि न जलाहरणादिप्रवृत्तिहेतुः एवमत्राप्यद्वैतज्ञानेन बाधितं भेदज्ञानमनुवर्त्तमानमपि मिथ्यार्थविषयत्वनिश्चयान्नोपदेशादिप्रवृत्तिहेतुर्भवति न चेश्वरस्य पूर्वमज्ञस्य शास्त्राधिगततत्त्वज्ञानतया बाधितानुवृत्तिर्वक्तुं शक्यते यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च वेदाहं समतीतानि इत्यादिश्रुतिस्मृतिविरोधात् किंच परमपुरुषस्येदानीतनगुरुपरंपराया अद्वितीयात्मस्वरूपनिश्चये सति अनु ॥७॥

वर्त्तमानानि चार्जुन ॥ भविष्याणि च भूतानि मां तु वेद न कश्चन ७-२

परमपुरुषः गुरुपरंपराचक्रतः
परमपुरुषेण गुरुपरंपरया प्रांच ८-६

वर्त्तमानेपि भेदज्ञाने स्वरूपनिश्चयानुरूपम् अद्वितीयं आत्मानं कस्मा उपदिशतीति वक्तव्यं प्रतिबिंबवत् प्रतीयमानेभ्योर्जुनादिभ्य इति चेन्नैतदुपपद्यते ॥ न चानुन्मत्तः कोपि मणिकृपाणदर्पणादिषु प्रतीयमानेषु स्वात्मप्रतिबिंबेषु तेषां स्वात्मनोऽनन्यत्वं जानं स्तेभ्यः कमप्यर्थमुपदिशति ॥ बाधितानुवृत्तिरपि तेन शक्यते वक्तुं बाधकेनाद्वितीयात्मज्ञानेनात्मव्यतिरिक्तभेदज्ञानकारणस्याप्यज्ञानादेर्विनष्टत्वात् द्विचंद्रज्ञानादौ तु चैकत्वज्ञानेनापारमार्थिकतिमिरादिदोषस्य द्विचंद्रज्ञानहेतोरविनष्टत्वाद्बाधितानुवृत्तिर्युक्ता अनुवर्त्तमानमपि प्रबलप्रमाणबाधितत्वेनाकिंचित्करं इदं तु भेदज्ञानस्य सविषयस्य सकारणस्यापारमार्थिकत्वेनावस्तुत्वाद्वस्तुयाथात्म्यज्ञानविनष्टत्वाच्च कथं चिदनमस्तीति चेद्भेददर्शनं तत्कार्योपदेशाद्यसंभवः ॥ भेददर्शनमस्तीति चेत्तर्ह्यप्यज्ञानस्य तद्धेतोः स्थितत्वेनाज्ञत्वादेव सुतरामुपदेशो न संभवति ॥ किंच ॥ गुरोरद्वितीयात्मज्ञानादेव ब्रह्मज्ञानस्य सकार्यस्य विनष्टत्वाच्छिष्यं प्रत्युपदेशो निःप्रयोजनः ॥ गुरुस्तज्ज्ञानं च कल्पितमिति चेत् शिष्यतज्ज्ञानयोरपि कल्पितत्वात्तदप्यनिवर्त्तकं कल्पितत्वेपि पूर्वविरोधित्वेन निवर्त्तकमिति चेत्तदाचार्यज्ञानेपि समानमिति तदेव निवर्त्तकं भवत्वित्युपदेशानर्थक्यमेवेति कृतं समसमीचीनाद्वितीयबाधितानुवृत्तिः संभवति ॥ अतः सर्वेश्वरस्येदानींतनगुरुपरंपराया

प्रयोजनसहितस्य

भेददर्शनसहितस्य

अद्वैतमिमं कस्मा उपदेश सहितस्य अपि

कल्पिताचार्यज्ञानस्य

कल्पिताचार्योपदिष्टेन कल्पितज्ञानेन कल्पितस्य शिष्यस्य कस्यापि विबाधितानुवृत्तिः संभवति ॥ अतः सर्वेश्वरस्येदानींतनगुरुपरंपराया तत्वज्ञा २-१६

एकस्मिन्देहेवर्त्तमानस्यदेहिनःकौमाराद्यवस्थांविहाययौवनाद्यवस्थाप्राप्तावात्मनःस्थिरत्वबुध्याय
यात्मानष्टइतिनशोचतिदेहादेहांतरप्राप्तावपितथैवस्थिरआत्मेतिबुद्धिमान्नमुह्यति अतआत्मनो
नित्यत्वादात्मानोनशोकस्थानंएतावदत्रवक्तव्यं आत्मनोनित्यानामेवानादिकर्मवशात्तथानेकर्मो
चितदेहसंसर्गाणांतैरेवदेहैर्बंधनिवृत्तयेशास्त्रीयंस्ववर्णोचितंयुद्धादिकमननिसंहितफलंकर्मकुर्व
ताभिंद्रियैर्वर्जनीयाइंद्रियार्थस्पर्शाःशीतोष्णादिप्रयुक्तसुखदुःखादायाआविर्भवंतितेनतुयावच्छास्त्रीयक

देहिनोस्मिन्यथादेहेकौमारंयौवनंजरा॥तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति॥१३॥मात्रास्पर्शास्तुकौंतेयशीतो
ष्णसुखदुःखदाः॥आगमापायिनोऽनित्यास्तांस्तितिक्षस्वभारत॥१४॥

र्मसमाप्तिस्तितिक्षंतव्याइतीमपर्थमनंतरमेवा
ह॥१३॥शब्दस्पर्शरूपरसगंधाःमात्रयास्तन्मात्राकार्यत्वान्मात्रास्तुच्यंतेश्रोत्रादिभिस्तेषांस्पर्शाःशी
तोष्णमृदुपरुषादिरूपाःसुखदुःखदाभवंति शीतोष्णग्रहणंप्रदर्शनार्थंतान्धैर्येणयावद्युद्धादिशास्त्री
यकर्मसमाप्तितितिक्षस्वतेचागमापायित्वादेवनांतंयांसप्रवाहेणानित्याश्चबंधहेतुभूतकर्मनाशेसति
आगमापायित्वेनापिनवर्तंतइत्यर्थः॥१४॥ श्रीलक्ष्मीनारायणायनमः

मीयंतेज्ञायंतेविषयाआभिरितिमात्राइंद्रियवृत्तयस्ताभिःस्पर्शाविषयैःसहसंबंधाः॥इतिश्रीधरः



ननुस्तोति:किमर्थंइत्यतआह॥यंपुरुषंधैर्यादिगुणसमवर्जनीयदुःखंसुखवन्मन्यमानममृतत्वसाधनत
यास्ववर्णोचितंयुद्धादिकंकर्मानभिसंहितफलंकुर्वाणंतदंतर्गतशस्त्रपातादिदुःखस्पर्शानव्यथयं
तिसएवामृतत्वंसाधयतिनत्वार्तःशोकदुःखाभ्यांसहिष्णुरित्यर्थः॥अतआत्मनोनित्यत्वादेवतेतकर्तव्यमि
त्यर्थः॥१५॥ननुआत्मनोनित्यत्वंदेहानांस्वाभाविकंनाशित्वमशोकनिमित्तमुक्तंगतासूनगतासूंश्चनानु

॥यंहिनव्यथयंत्येतेपुरुषंपुरुषर्षभ॥समदुःखसुखंधीरंसोमृतत्वायकल्पते॥१५॥
॥नासतोविद्यतेभावोनाभावोविद्यतेसतः॥उभयोरपिदृष्टोंतस्त्वनयोस्तत्त्वदर्शिभिः॥१६॥

शोचंतिपंडिताइतितदुपपादयितुमारभते॥नासतइति॥असतोदेहस्यसद्भावोनविद्यतेसतश्चात्मनो
नासद्भावः॥उभयोर्देहात्मनोरुपलभ्यमानयोर्यथोपलब्धितत्त्वदर्शिभिरंतोदृष्टः॥निर्णयांतत्वान्नि
रूपणस्यनिर्णयइहांतशब्देनोच्यते॥देहस्याचिद्वस्तुनोऽसत्त्वमेवस्वरूपं॥आत्मनश्चचेतनस्यसत्त्व
मेवस्वरूपमितिनिर्णयोदृष्टइत्यर्थः॥विनाशिस्वभावोह्यसत्त्वं॥अविनाशिस्वभावःसत्त्वं यथोक्तंभगव
तापराशरेण॥तस्मान्नविज्ञानमृतेस्तिकिंचित्क्वचित्कदाचिद्द्विजवस्तुजातंसद्भावमेवंभवतोमयो

युद्धादिकं
निर्णयः॥
विष्णुपुराणे अंश॰२अ॰१२श्लो॰
विष्णु॰पु॰अं॰२अ॰१२श्लो॰४५
द्वैतमैक्य

।। गी॰भा॰ ६
।। ६ ।।
वि॰अ॰२२ श्लो॰१६

नश्वरं सत् किं न्यादि इत्यमाशङ्क्य तत्फलं ममायि – २
अन्यदेव सत् इति श्रीधरकृत अत एव सत् किं न कि ममवीम वर्षे २

कोऽसौ नाम यथा सत्यमसत्यमन्यत् अनात्मा परमार्थस्तु भावैरभ्युपगम्यते तद्विनाशिनः संदेहो नाशि
ऽस्योपपादितं यैस्तु केचिज्ज्ञानान्तरेणापि विनाश्यं संज्ञामुपैति वै परिणामादि संभूतं तद्वस्तु नृपते च किमिति
अन्तवन्त इमे देहा अविनाशि तु तद्विद्धीत्युच्यते तदेव सत्यासत्यव्यपदेशहेतुरिति गम्यते अनात्म
सत्कार्यवादस्यासंगतत्वान्न तत्परोऽयं श्लोकः देहात्मस्वभावाज्ञानमोहितस्य तन्मोहनाशार्थं युष्मदस्मदो
र्नित्यानित्यस्वरूपविवेक एव वक्तव्यः स एव गतासूनगतासूंश्च नानुशोचन्तीति प्रस्तुतः स एव चाविनाशि

।। अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।। विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ।।१७।।

तु अन्तवन्त इमे देहा इत्यनन्तरमुपपादितः इति यथोक्त एवार्थः ।।१६।। आत्मनो विनाशित्वं कथमुपपद्यते इ
त्यत आह ।। अविनाशीति ।। तदात्मतत्त्वमविनाशीति विद्धि येनात्मतत्त्वेन चेतनेन तद्व्यतिरिक्तमिदमचेतन
न तत्त्वं सर्वं ततं व्याप्तं व्यापकत्वेन निरतिशयसूक्ष्मत्वादात्मनो विनाशानर्हस्य तद्व्यतिरिक्तो न कश्चित्पदार्थो
विनाशं कर्तुमर्हतीति तद्व्याप्यतया तस्मात् स्थूलत्वात् नाशकं हि शस्त्रजलाग्निवाय्वादिकं नाश्यं व्याप्य शि
थिलीकरोति मुद्गरादयोऽपि वेगवत्संयोगेन वायुमुत्पाद्य तद्द्वारेण नाशयन्तीति अत आत्मतत्त्वमविनाशि ।।१७

देहादेस्तु विनाशित्वमेव स्वभाव इत्याह अन्तवन्त इति दिह उपचये इत्युपचयरूपा इमे देहा अन्तवन्तः
विनाशस्वभावाः एवं च यथात्मका हि घटादयोऽन्तवन्तो दृष्टाः नित्यस्य शरीरिणः कर्मफलभोगार्थतया
भूतसंघातरूपा देहाः पुण्यः पुण्येन कर्मणा भवति पापः पापेनेत्यादिशास्त्रैरुक्ताः कर्मावसाने विना
शिनः आत्मा त्वविनाशी कुतः अप्रमेयत्वात् नह्यात्मा प्रमेयतयोपलभ्यते प्रत्यक्षादिप्रमाणैः तथा त
था च वक्ष्यते एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विद इति न चानेकरूपचयात्मकस्य आत्मोपलभ्यते सर्वत्र

।। अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।। अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ।।१८।।

देहस्याहमिदं नाना नामीति देहस्य प्रमातृतये करूपतयैवोपलब्धेः नच देहादेरिव प्रदेशभेदे प्रमातुराकारभे
दउपलभ्यते अत एकरूपत्वेनानुपचयात्मकत्वात् प्रमातृत्वात् व्यापकत्वाच्चात्मा नित्यः देहस्तूपचयात्म
कत्वाच्छरीरिणः कर्मफलभोगार्थत्वादनेकरूपत्वाद्व्याप्यत्वाच्च विनाशीति तस्माद्देहस्य विनाशस्वभावत्वादा
त्मनो नित्यस्वभावत्वाच्छोकानवकाशः पिनशोकस्थानमिति शास्त्रप्राप्तादिप्ररूपस्य सर्वनाशेनः [illegible] दुर्जनीयानुत्सृजातान्
अन्यगतांश्च धैर्येण सहमानः अमृतत्वमाप्नुयं अनभिसंहितफलं युद्धाख्यं कर्मारभस्व ।।१८।।

॥ भ०टी० ॥ य एनमिति एवमुक्तस्वभावमात्मानं हननकर्तृत्वेन यो मन्यते यश्चैनं केनापि हन्त्रा हतं मन्यते उभौ तौ न विजानी अ० २ ॥
॥२०॥ तः नकेवलंहेतुर्निरस्यनित्यत्वादयंनहननकर्ताचनहन्यते एवंचयथात्मानहन्यतेइतिधातोरप्यात्माकर्मत्वसंभवश
रीरवियोगकरणवाचीनहिंस्यात्सर्वभूतानीत्यादिशास्त्राणिनहंतव्यइत्यादीन्यपिशास्त्राणितत्तच्छरीरवियोगक
रणविषयाणि ॥१९॥ तत्कैरेवहेतुभिर्निर्विकारत्वेनापरिणामित्वादात्मनोजन्ममरणादयः सर्वएवाचेतनदेहधर्मा
नसंतीत्युच्यते तत्रनजायतेम्रियतइतिवर्तमानतयासर्वेषुदेहेषुसर्वैरनुभूयमानेजन्ममरणेकदाचिदात्मानंन

य एनं वेत्ति हंतारं यश्चैनं मन्यते हतं ॥ उभौ तौ न विजानीतो नायं हंति न हन्यते ॥१९॥ न जायते म्रियते
वा कदाचिन्नायं भूत्वा भविता वा न भूयः ॥ अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे ॥२०॥

स्पृशतः नायंभूत्वाभविताचानभूयः अयंकल्पादौभूत्वाभूयः कल्पांतेचनभविताइतिनकेषुचिन्नशापति
प्रभृतिदेहेष्वागमेनोपलभ्यमानंकल्पादौजननंकल्पांतेचमरणमेवमात्मानंस्पृशतीत्यर्थः अतएवअजः सर्वं
देहगतस्यात्मा अतएवनित्यः शाश्वतः षड्भिरस्तदसत्परिणामैरपिनजायते अतः पुराणः पुराणोपिनवः स
र्वदाअपूर्ववदनुभाव्यइत्यर्थः अतः शरीरेहन्यमानेपिनहन्यतेयमात्मा ॥२०॥ २०॥

एवमविनाशित्वेनाजत्वेनक्षयानर्हत्वेनचनित्यमेनमात्मानंयः पुरुषोवेदसपुरुषोदेवतिर्यक्स्थावर
शरीरावस्थितेष्वात्मसुकमप्यात्मानंकथंघातयतिकंवाकथंहंतिकथंनाशयति कथंवातत्प्रयोजको
भवतीत्यर्थः एतेनात्मनोघातयाम्यहमित्यनुशोचनमात्मस्वरूपाज्ञानमूलमेवेत्यभिप्रायः ॥२१॥ यद्यपि
नित्यानामात्मनांशरीरविच्छेदमात्रंक्रियतेतथापिरमणीयभोगसाधनेषुशरीरेषुनष्टप्रसुतद्वियोगदुः
खंशोकनिमित्तमस्त्येवेत्यतआह वासांसीति धर्मयुद्धेशरीरंत्यजतांत्यक्तशरीरादधिकतरकल्याण

॥ वेदाविनाशिनंनित्यंयएनमजमव्ययं ॥ कथंसपुरुषः पार्थकंघातयतिहंतिकं ॥२१॥ वासांसिजीर्णानिय
थाविहायनवानिगृह्णातिनरोपराणि ॥ तथाशरीराणिविहायजीर्णान्यन्यानिसंयातिनवानिदेही ॥२२॥

शरीरग्रहणंशास्त्रादवगम्यतइति ॥ जीर्णानिवासांसिविहायनवानिकल्याणानिवासांसिगृह्णाति
वदयंनिमित्तमेवात्रोपलभ्यते ॥२२॥ पुनरप्यविनाशित्वंतद्विद्वैनसर्वमिदंततमितिपूर्वोक्तमविनाशित्वं
सुखग्रहणायव्यंजयन्नाह्यति शस्त्राण्यनुवायवः छेदनदहनक्लेदनशोषणाद्यात्मानः एनंप्रतिकर्तुं
नशक्नुवंति सर्वगतत्वादात्मनः सर्वतत्वव्यापनस्वभावतयासर्वेभ्यस्तत्वेभ्यः सूक्ष्मत्वादस्यतैर्व्याप्यन

देवात्तथापि कर्त्तव्यत्वाच्च छेदनदहनक्लेदनशोषणानामयमात्मा नित्यः स्थाणुरचलोऽयं सनातनः
स्थिरस्वभावोऽप्रकंप्यः पुरातनश्च ॥२३॥२४॥ छेदनादियोग्यानि वस्तूनि यैः प्रमाणैर्ज्ञायंते तैरप्रमाणमान(
व्यक्तोऽयमव्यक्तः अतः छेद्यादिविसजातीयः ॥ अचिंत्यश्च सर्ववस्तुविसजातीयत्वेनेतरस्वभावयुक्तत

॥ नैनं छिंदंति शस्त्राणि नैनं दहति पावकः ॥ न चैनं क्लेदयंत्यापो न शोषयति मारुतः ॥२३॥
॥ अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥२४॥
॥ अव्यक्तोऽयमचिंत्योऽयमविकार्योऽयमुच्यते ॥ तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२५॥
॥ अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतं ॥ तथापि त्वं महाबाहो नैवं शोचितुमर्हसि ॥२६॥

याचिंतयितुमपि नार्हः अतश्चाविकार्यः विकारानर्हः तस्मादुक्तलक्षणमेनमात्मानं विदित्वा न तत्कृते
नानुशोचितुमर्हसि २५ अथ नित्यजातं नित्यमृतं देहमेवैनमात्मानं मन्यसे न देहातिरिक्तमुक्तलक्षणं त
थापि एवमतिमात्रं शोचितुं नार्हसि परिणामस्वभावस्य देहस्योत्पत्तिविनाशयोरवर्जनीयत्वात् ॥२६॥ ११॥

उत्पन्नस्य विनाशो ध्रुवः अवर्जनीय उपलभ्यते न तथा विनष्टस्यापि जन्मावर्जनीयं कथमिदमुपलभ्य
ते नष्टस्योत्पत्तिरिति सत एवोत्पत्त्युपलब्धेरसतश्चानुपलब्धेः सत्यमुच्यते उत्पत्तिविनाशादयः
सतोऽद्रव्यस्यावस्थाविशेषाः तंतुप्रभृति द्रव्याणि संस्थेव रचनाविशेषयुक्तानि पटादीन्युच्यंते असत्का सत्कालेव
असत्कार्यवादे र्यवादिनाप्येतदेवोपलभ्यते न हि तत्र तंतुसंस्थानविशेषातिरेकेणान्यत् परार्थांतरं वर्णनीयं ते कारक तंत्वादिषु कर्मकारकादिकारकव्यापारणो॰
पटादि नामांतरम व्यापारनामांतरभजनव्यवहारविशेषाणामेतावतैवोपपत्तेः न द्रव्यांतरकल्पनायुक्ता अत उत्पत्ति

॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च ॥
॥ तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि ॥२७॥

विनाशादयः सतोऽद्रव्यस्यावस्थाविशेषाः उत्पन्नाख्यामवस्थामापन्नस्य द्रव्यस्य तद्विरोध्यवस्थांत
रप्राप्तिर्विनाश उच्यते मृद्द्रव्यस्य पिंडत्वघटत्वकपालत्वचूर्णत्वादिवत् परिणामिद्रव्यस्य परिणाम
परंपराऽवर्जनीया तत्र पूर्वावस्था द्रव्यस्योत्तरावस्थाप्राप्तिर्विनाशः सैव तदवस्थोत्पत्तिः एवमुत्प उत्तरावस्थाप्राप्तिर्द्रव्यस्य
त्तिविनाशाख्यपरिणामपरंपरायाः परिणामिनो द्रव्यस्यापरिहार्यत्वेन तत्र शोचितुमर्हसि ॥२७॥

स्वर्गित्वनारकित्वमनुष्यत्वपशुत्वादिषु

सतोऽप्यस्य पूर्वावस्थाविरोध्यवस्थांतरप्राप्तिदर्शनेन योऽप्यापाद्यशोकः सोऽपि मनुष्यादिभूतेषु न संभवतीत्या श्री २ ॥
ह मनुष्यादिभूतानि संत्येवऽव्यक्तान्यनुपलब्धपूर्वावस्थान्युपलब्धमनुष्यत्वादिमध्यावस्थान्यनुपलब्धां
तावस्थानि तेषु स्वभावेषु वर्त्तमानेषु न तत्र परिदेवनानिमित्तमस्ति ॥ २८ ॥ एवं शरीरात्मवादेऽपि नास्ति शोक
निमित्तमित्युक्त्वा शरीरातिरिक्तस्याश्चर्यस्वरूपस्यात्मनो द्रष्टा वक्ता श्रोता श्रवणाय चात्मनिश्चयस्य दुर्ल
भत्वाह एवमुक्तस्वभावं स्वेतरसमस्तवस्तुविसजातीयतयाश्चर्यवत्तरस्यवदवस्थितमेनं तेषु तं तु भ्रमद

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ॥ अव्यक्तनिधनान्येव तत्र का परिदेवना ॥ २८ ॥ आश्चर्यवत्पश्यति
कश्चिदेनमाश्चर्यवद्वदति तथैव चान्यः ॥ आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् ॥ २९

तातपसाक्षीणपाप उपचितपुण्यस्तथाविधः कश्चित्पश्यति तथाविधः कश्चित्परस्मै वदति एवं
कश्चिद्देव शृणोति श्रुत्वाप्येनं यथावदवस्थितं तत्वतो न कश्चिद्वेद ॥ चकारात् दृष्ट्वा उक्त्वाप्यपि त
त्वतो दर्शनं तत्वतो वचनं तत्वतः श्रवणं दुर्लभमित्युक्तं भवति ॥ २९ ॥

१२॥

सर्वस्य देवादिदेहिनो देहे वध्यमानेऽप्ययं देही नित्यमवध्य इति मंतव्यः तस्मात्सर्वाणि देवादिस्थावरांतानि भू
तानि विषमाकाराण्यपि उक्तेन स्वभावेन स्वरूपतः समानानि नित्यानि च देहतस्तु वैषम्यं ततो देवादिसर्वाणि
भूतानि उद्दिश्य न शोचितुमर्हसि न केवलं भीष्मादीन्प्रति ॥ ३० ॥ अपि चेदं शास्त्रेषु प्राणिमारणमप्य
ग्नीषोमीयवत्स्वधर्ममवेक्ष्य न विकंपितुमर्हसि धर्म्यात् न्यायतः प्रवृत्तात् युद्धादन्यत् क्षत्रियस्य श्रेयो विद्यते
शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजमिति वक्ष्यते अग्नीषोमीया

देही नित्यमवध्योऽयं देहे सर्वस्य भारत ॥ तस्मात्सर्वाणि भूतानि न त्वं शोचितुमर्हसि ॥ ३० ॥
स्वधर्ममपि चावेक्ष्य न विकंपितुमर्हसि ॥ धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥ ३१ ॥

दिषु च न हिंसा पशोर्हीनतरस्थावरादिदेहपरित्यागपूर्वककल्याणदेहस्वर्गप्रापकत्वं तेषु संज्ञपनस्य न वा उ एतन्
म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवः सविता दधात्विति श्रु
यते इह च युद्धे मृतानां कल्याणतरदेहप्राप्तिरुक्ता वासांसि जीर्णानीत्यादिना यतश्चिकित्सकश
ल्यादिकरणमातुरस्येवास्य रक्षणमेवाग्नीषोमीयादिकर्मसु संज्ञपनं ॥ ३१ ॥ ॥

॥गी॰भा॰ ॥ यदृच्छया चोपपन्नमिति॥ अयत्नोपनतमिदं निरतिशयसुखोपायभूतं निर्विघ्नमीदृशं युद्धं सुखिनः पु अ॰२॥

॥१३॥ ण्यवंतः क्षत्रिया लभंते॥३२॥ अथ क्षत्रियस्य स्वधर्मभूतमिममारब्धं संग्रामं मोहान्न करिष्यसि चेत्ततः

आरब्धस्य स्वधर्मस्याकरणात् स्वधर्मफलं निरतिशयसुखं विजयेन निरतिशयां कीर्तिं च हित्वा पापं निरति

शयमवाप्स्यसि॥३३॥ न केवलं निरतिशयसुखकीर्तिहानिमात्रं

॥ यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतं॥ सुखिनः क्षत्रियाः पार्थ लभंते युद्धमीदृशं॥३२॥

॥ अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि॥ ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि॥३३॥

॥ अकीर्तिं चापि भूतानि कथयिष्यंति तेऽव्ययां॥ संभावितस्य चाकीर्तिर्मरणादतिरिच्यते॥३४॥

पार्थो युद्धे भासेपलायित इत्यव्ययां सर्वदेशकालव्यापिनीमकीर्तिं च समर्थान् समर्थाश्च सर्वाणि भूतानि

कथयिष्यंति॥ ततः किमिति चेत्॥ शौर्यवीर्यपराक्रमादिभिः सर्वसंभावितस्य तद्विपर्ययानुसंधानाच्चाकीर्ति

र्मरणादतिरिच्यते एवंविधायाः कीर्तेर्मरणमेव श्रेय इत्यर्थः॥३४॥ १३॥

बंधुस्नेहात्कारुण्याच्च युद्धान्निवृत्तस्य शूरस्य ममाकीर्तिः कथमागमिष्यतीत्यत आह येषां कर्णदु

र्योधनादीनां महारथानामितः पूर्वं त्वं शूरो वैरी इति बहुमतो भूत्वा इदानीं युद्धे समुपस्थिते निवृत्तत्वात्

लाघवं लघुतां यास्यसि ते महारथास्त्वां भयाद्युद्धादुपरतं मंस्यंते शूराणां हि वैरिणां शत्रुभयादृते बं

धुस्नेहादिना युद्धादुपरतिर्नोपपद्यते॥३५॥

॥ भयाद्रणादुपरतं मंस्यंते त्वां महारथाः॥ येषां च त्वं बहु

॥ मतो भूत्वा यास्यसि लाघवं॥३५॥ अवाच्यवादांश्च बहून्

॥ वदिष्यंति तवाहिताः॥ निंदंतस्तव सामर्थ्यं ततो दुःखतरं नु किं॥३६॥

किंच शूराणामस्माकं संनिधौ कथमयं पार्थः स्थातुं शक्नुयादस्मत्संनिधानादस्य च यस्य सामर्थ्यमिति तव सा

मर्थ्यं निंदंतः शूराणामग्रे अवाच्यवादांश्च बहून्वदिष्यंति तव शत्रवो धार्तराष्ट्राः ततोऽधिकतरं दुःखं किं

नु एवंविधावाच्यश्रवणान्मरणमेव श्रेय इति मन्यस्व॥३६॥

अतः शूरेणात्मना परेषां हननमात्मनो वा परैर्हननमुभयमपि श्रेयो भवतीत्याह धर्मयुद्धे परैर्हतस्त्वं तत
एव परमनिःश्रेयसं प्राप्स्यसि परान्वा हत्वाऽऽहिकं राज्यं भोक्ष्यसे अनभिसंहितफलस्य युद्धाख्यस्य धर्मस्य पर
मनिःश्रेयसोपायत्वात्त्वं च परमनिःश्रेयसं प्राप्स्यसि तस्माद्युद्धायोद्योगं परमपुरुषार्थलक्षणमोक्षसाध
नमिति निश्चित्य तदर्थं युद्धमित्युक्तं तीपुत्रस्य तवैतदेव युक्तमित्यभिप्रायः ॥ ३७ ॥

॥ हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ॥ तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृत
निश्चयः ॥ ३७ ॥ सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ॥ ततो यु
द्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥ ३८ ॥

मुमुक्षोर्युद्धानुष्ठानप्रकारमाह एवं देहातिरिक्तमस्पृष्टसमस्तदेहस्वभावं नित्यमात्मानं ज्ञात्वा युद्धेनावर्ज
नीयतया प्राप्तपातादिनिमित्तसुखदुःखार्थलाभालाभजयपराजयेष्वविकृतबुद्धिः स्वर्गादिफलाभिसंधिर
हितः केवलं कार्यबुद्ध्या युद्धमारभस्व एवं कुर्वाणो न पापमवाप्स्यसि पापं सुखदुःखरूपं संसारं नावाप्स्य
सि संसारबंधान्मोक्ष्यस इत्यर्थः ॥ ३८ ॥ श्रीपूर्णपुरुषोत्तमस्वामीनारायणाय नमः



एवमात्मयाथात्म्यज्ञानमुपदिश्य तत्पूर्वकं मोक्षसाधनभूतं कर्मयोगं वक्तुमारभते संख्याबुद्धिः बुद्ध्यावधा
रणीयमात्मतत्त्वं सांख्यं ज्ञातव्ये आत्मतत्त्वज्ञानाय या बुद्धिरभिधेया न त्वेवाहमित्यारभ्य तस्मात सर्वाणि भूता
नीत्यंतेन सैषा अभिहिता आत्मज्ञानपूर्वकमोक्षसाधनभूतकर्मानुष्ठाने या बुद्धिः योगो वक्तव्यः स इह योगश
ब्देनोच्यते दूरेण ह्यवरं कर्म बुद्धियोगादिति वक्ष्यते तत्र योगे या बुद्धिर्वक्तव्या तामिमामभिधीयमानां शृ
णु यया बुद्ध्या युक्तः कर्मबंधं प्रहास्यसि कर्मणा बंधः कर्मबंधः संसार इत्यर्थः ॥ ३९ ॥ वक्ष्यमाणबुद्धियुक्तस्य कर्मण
एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु ॥ बुद्ध्या युक्तो यया पार्थ कर्मबंधं प्रहास्यसि ॥ ३९ ॥ नेहाभिक्रमनाशो
ऽस्ति प्रत्यवायो न विद्यते ॥ स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ ४० ॥ माहात्म्यमाह इह कर्मयोगे नाभिक्र
आरंभस्य
मनाशोऽस्ति अभिक्रमस्यारंभः तन्नाशः फलसाधनभावनाशः आरब्धस्यासमाप्तस्य विच्छिन्नस्यापि न निःफ
लत्वं आरब्धस्य विच्छेदे प्रत्यवायो न विद्यते अस्य कर्मयोगाख्यस्य धर्मस्य स्वल्पांशोऽपि महतो भयात् संसा
रात्त्रायते अयमर्थः पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते इत्युत्तरत्र प्रपंचयिष्यते अन्यानि हि लौकिकानि
वैदिकानि च साधनानि विच्छिन्नानि न हि फलप्रसवाय भवंति प्रत्यवायाय च भवंति ॥ ४० ॥
किंच

॥ गी॰भा॰ ॥ काम्यकर्मविषयायाबुद्धेर्मोक्षसाधनभूतकर्मविषयांबुद्धिंविशिनष्टि इहशास्त्रीयेसर्वस्मिन्कर्मणिव्यव रा॰ २ ॥
॥२५॥ सायात्मिकाबुद्धिरेकामुमुक्षुणामनुष्ठेयेकर्मणिबुद्धिर्व्यवसायात्मिकाव्यवसायोनिश्चयः साहिबुद्धिरात्म
याथात्म्यनिश्चयपूर्विकाकाम्यकर्मविषयाबुद्धिरव्यवसायात्मिकातत्रहिकामनाधिकारेदेहातिरिक्ता(

॥ व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन ॥

त्मतत्वज्ञानमात्रमपेक्षितंनात्मस्वरूपयाथात्म्यनिश्चयः स्वरूपयाथात्म्यनिश्चयेऽसत्यपिस्वर्गादिफलार्थित्व
तत्साधनानुष्ठानतत्फलानुभवानामसंभवात् विरोधाच्चसेयंव्यवसायात्मिकाबुद्धिरेकफलसाधनविष
यतयैका एकस्मैमोक्षफलायमुमुक्षोःसर्वाणिकर्माणिविधीयंते॥ अतः शास्त्रार्थस्यैकत्वात्सर्वकर्मवि २५ ॥

अत्र करणे तृतीया यथाबुद्धिरेकैवंयथैकस्वर्गफलसाधनतयाग्नेयादीनांषण्णांसांगेतिकर्तव्यताकानामेकशास्त्रार्थतया अत्र हेतौ तृतीया
तद्विषयाबुद्धिरेकातद्वदित्यर्थः अव्यवसायिनांतुस्वर्गपुत्रपश्वन्नाद्यादिफलसाधनकर्माधिकृतानांबुद्ध
यः फलानंत्यादनंताः तत्रापिबहुशाखाः एकस्मैफलायचोदितेदर्शपूर्णमासादौकर्मण्यायुराशा विधौ
स्तेसुप्रजस्त्वमाशास्तइत्याद्यवगतमवांतरफलभेदेनबहुशाखत्वं

॥ बहुशाखाह्यनंताश्चबुद्धयोऽव्यवसायिनां॥४१॥

चविद्यते अतोऽव्यवसायिनांबुद्धयोऽनंताबहुशाखाश्चानंतकंभवति नित्येषुनैमित्तिकेषुचकर्म
सुप्रधानफलान्यवांतरफलानिचयानिश्रूयमाणानितानिसर्वाणिपरित्यज्यमोक्षैकफलतयासर्वा
णिकर्माण्येकशास्त्रार्थतयानुष्ठेयानिकाम्यानिचस्ववर्णाश्रमोचितानितत्तत्फलानिपरित्यज्यमोक्षसा
धनतयानित्यनैमित्तिकैरेकीकृत्ययथाबलमनुष्ठेयानीति॥४१॥

नेषुस्वर्गादिफलवादेषुसंगः आसक्तिः ... अतिरेकः आधिक्यं तेन ॥

॥ गी॰ भा॰ ॥ अथकाम्यकर्माधिकृतान्निंदति यामिमांपुष्पितांपुष्पमात्रफलामापातरमणीयांवाचमविपश्चितो न्न॰ २ ॥
॥ १६ ॥ त्यज्ञाभोगैश्वर्यगतिंप्रतिवर्त्तमानांप्रवदंतिवेदवादरताः वेदेषुयेस्वर्गादिफलवादास्तेषुसक्ताः नान्यदस्ती
तिवादिनः तत्प्रसंगातिरेकेणस्वर्गादेरधिकंफलंनान्यदस्तीतिवदंतः कामात्मानः कामप्रवणमनसः स्वर्गप
राःस्वर्गपरायणाः स्वर्गादिफलावसानेपुनर्जन्मकर्माख्यफलप्रदांक्रियाविशेषबहुलांतत्त्वज्ञानरहितन

॥ यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः ॥ वेदवादरताःपार्थनान्यदस्तीतिवादिनः ॥ ४२ ॥ कामात्मा
नः स्वर्गपराजन्मकर्मफलप्रदां ॥ क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति ॥ ४३ ॥ भोगैश्वर्यप्रसक्ता
नांतयापहृतचेतसां ॥ व्यवसायात्मिकाबुद्धिः समाधौनविधीयते ॥ ४४ ॥

याक्रियाविशेषप्रचुरांतेषांभो
क्रियाविशेषस्य गैश्वर्यप्रसक्तानांतस्यांपव्याख्यानरूपयाभोगैश्वर्यविषययातयावाचाऽपहृतात्मज्ञानानांयथोदिताव्यवसा
यात्मिकाबुद्धिः समाधौनविधीयतेनोत्पद्यतेसमाधीयतेऽस्मिन्नात्मज्ञानमितिसमाधिर्मनः तेषांमनस्यात्म अपहृतात्मज्ञानानाम्
निश्चयपूर्वकमोक्षसाधनभूतकर्मविषयाबुद्धिः कदाचिदपिनोत्पद्यतइत्यर्थः अतःकाम्येषुकर्मसुमु
मुक्षूणांनसंगः कर्त्तव्यः ॥ ४४ ॥ श्रीभक्तिपुत्रमद्ज्ञानंदायनमोनमः ॥ ॥ १६ ॥

उत्पादकानि

एवमत्यंताल्पफलानिपुनर्जन्मप्रदानिकर्माणिमातृपितृसहस्रेभ्योपिवत्सलतरतयात्मोपजीवनेप्रवृ
त्ताःवेदाः किमर्थंवदंतिकथंवावेदोदितानित्याज्यानीत्यत आह त्रयोगुणास्त्रिगुणाःसत्वरजस्तमां
सि सत्वरजस्तमःप्रचुराःपुरुषास्त्रैगुण्यशब्देनोच्यंते तद्विषयावेदास्तमःप्रचुराणांरजःप्रचुराणांसत्व
प्रचुराणांचवत्सलतयैवहितमवबोधयंतिवेदाः यद्येषांस्वगुणानुगुण्येनस्वर्गादिसाधनमेवहितंनाव
बोधयेयुःतर्हितेरजस्तमःप्रचुरतयासात्विकफलमोक्षविमुखाःसापेक्षितफल

॥ त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन ॥ निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान् ॥ ४५ ॥

मजानंतःकामशावण्यविवशाःप्रत्युपायेउपायभ्रांत्याप्रणश्येयुः अतस्त्रैगुण्यविषयावेदास्त्वंतुनि
स्त्रैगुण्योभव ॥ इदानींसत्वप्रचुरस्त्वंतदेववर्द्धयन्नन्योन्यसंकीर्णगुणत्रयप्रचुरोभवनतत्प्राचुर्यंवर्द्धये
त्यर्थः निर्द्वंद्वःनिर्गतसकलसांसारिकस्वभावः नित्यसत्वस्थः गुणद्वयरहितनित्यप्रवृद्धसत्वस्थोभवकथमिति
चेत् निर्योगक्षेमःआत्मस्वरूपनत्वाप्युपायबहिर्भूतानामर्थानांयोगंप्राप्तानांचक्षेमंपरित्यज्यात्मवान्भव
आत्मस्वरूपान्वेषणपरोभव एवंवर्त्तमानस्यतेरजस्तमःप्रचुरतानश्यतिसत्वंचवर्द्धते ॥ ४५ ॥

॥ गी॰ भा॰ ॥ न च वेदोदितं सर्वं सर्वस्योपादेयं यथा सर्वार्थपरिकल्पिते सर्वतः संप्लुतोदके उदपाने पिपासोर्यावानर्थः पा अ॰ २ ॥

॥२७॥ वदेव पानीयप्रयोजनं तावदेव तेनोपादीयते न सर्वं एवं सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ब्रह्मसंबंधी बा

ह्मणः वेदार्थविज्ञानतः मुमुक्षुः वैदिकस्य मुमुक्षोर्यदेव मोक्षसाधनं तदेवोपादेयं नान्यत् ॥४६॥ अतः सत्वस्थ

स्य मुमुक्षोस्तवैतावदेवोपादेयमित्याह नित्ये नैमित्तिके काम्ये च केनचित्फलविशेषेण संबंधतयाश्रूय

माणे कर्मणि नित्यसत्वस्थस्य मुमुक्षोस्ते कर्ममात्रेऽधिकारः अधिकारानुबंधितयाऽवगतेषु फलेषु न करा

॥ यावानर्थ उदपाने सर्वतः संप्लुतोदके ॥ तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥४६॥

॥ कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ॥ मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि ॥४७॥

कर्मण इति शेषः ॥ चिदप्यधिकारः सफलस्य बंधरूपत्वात् फलरहितस्य केवलस्य मदाराधनरूपस्य मोक्षहेतुत्वात् मा कर्मफ

लहेतुर्भूः त्वयानुष्ठेये कर्मणि नित्यसत्वस्थस्य तवाकर्तृत्वमप्यनुसंधेयं फलस्यापि क्षुन्निवृत्त्यादेर्न त्वं हेतु

रित्यनुसंधेयं तदुभयं गुणेषु वा सर्वेश्वरे मयि वानुसंधेयमित्युत्तरत्र वक्ष्यते एवमनुसंधाय कर्म कुरु अक

र्मण्यननुष्ठाने न योत्स्यामीति यत्त्वयाभिहितं न तत्र ते संगोऽस्तु उक्तेन प्रकारेण युद्धादि कर्मण्येव संगोऽस्त्वित्यर्थः ॥४७॥

एतदेव स्पष्टीकरोति राज्यबंधुष्वसृतिषु संगं त्यक्त्वा युद्धादीनि कर्माणि योगस्थः कुरु तत्र तन्मूलं जयादि सिद्ध्यसिद्ध्योः

समो भूत्वा कुरु तदिदं सिद्ध्यसिद्ध्योः समत्वं योगस्थ इत्यत्र योगशब्देनोच्यते योगः सिद्ध्यसिद्ध्योः समत्वरूपं चित्तसमाधानं

॥४८॥ किमर्थमिदमसकृदुच्यते इत्यत आह योऽयं प्रधानफलत्यागविषयो वा तत्फलसिद्ध्यसिद्ध्योः समत्वविषयश्च

अतिशयेन बुद्धियोगस्तद्युक्तात्कर्मणः इतरत्कर्म दूरेणावरं महदेतत्तयोरुत्कर्षापकर्षरूपं वैरूप्यं उक्तबुद्धियोगयुक्तं कर्म

निखिलसांसारिकसुखदुःखनिवर्त्तकतया परमपुरुषार्थलक्षणमोक्षं प्रापयति इतरत्त्वपरिमितदुःखरूपसंसार

॥ योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय ॥ सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते ॥४८॥ दूरेण ह्यवरं क

र्म बुद्धियोगाद्धनंजय ॥ बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥४९॥ बुद्धियुक्तो जहातीह उभे सुकृत

दुष्कृते ॥ तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलं ॥५०॥

मिति ॥ अतः कर्मणि क्रियमाणे उक्ता

यां बुद्धौ शरणमन्विच्छ शरणं वासस्थानं तस्यामेव बुद्धौ वर्तस्वेत्यर्थः कृपणाः फलहेतवः फलसंगादिना कर्म कुर्वा

णाः कृपणाः संसारिणो भवेयुः ॥४९॥ बुद्धियोगयुक्तः कर्म कुर्वाण उभे सुकृतदुष्कृते अनादिकालसंचिते अनंतबंधहेतुभू

ते जहाति तस्मादुक्ताय बुद्धियोगाय युज्यस्व योगः कर्मसु कौशलं कर्मसु क्रियमाणेषु यत्कौशलं तदेव युज्यत इति यो ग

मदाराधनत्वेन मोक्षपर्यवसंपादनचातुर्यम्

 बुद्धियुक्ताः कर्मजं फलं त्यक्त्वा जन्मबंधविनिर्मुक्ताः अनामयं पदं गच्छंति हि प्रसिद्धमेतत्सर्वोपनिषत्स्वित्यर्थः ५ 
१॥ उक्तप्रकारेण कर्मणि वर्त्तमानस्य तव यदा रजस्तमोनिर्धूतकल्मषस्य ते बुद्धिर्यदा मोहकलिलं अस्यल्पफलसंगहेतु
भूतं मोहरूपं कलुषं व्यतितरीष्यति तदा श्रुत्वेतः पूर्वं त्वाश्रयतयाश्रुतस्य फलादेश्रितः पश्चाच्छ्रोतव्यस्य च कुतेस्व
वमेव निर्वेदं गंतासि गमिष्यसि ॥५२॥ योगेत्विमां श्रृणु इति त्वात्मविनो कस्यात्मयाथात्म्यज्ञानपूर्वकं स्य बुद्धिविशेषं संस्कृ

॥ कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ॥ जन्मबंधविनिर्मुक्ताः पदं गच्छंत्यनामयं ॥५१॥
॥ यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति ॥ तदा गंतासि निर्वेदं श्रोतव्यस्य श्रुतस्य च ॥५२॥
॥ श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ॥ समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥५३॥

तकर्मानुष्ठानस्य लक्ष्यभूतं योगाख्यं फलमाह ॥ श्रुतिः श्रवणमस्यतः श्रवणेन विशेषतः प्रतिपन्ना सकुलेतरविस्पष्टा
नीयनित्यनिरतिशयसूक्ष्मात्म्यविषया स्वयमचला एकरूपा बुद्धिरसंगकर्मानुष्ठानेन विमलीकृते प्रचरसि यदा निश्चला
स्थास्यति तदा योगमात्मावलोकनमवाप्स्यसि एतदुक्तं भवति ॥ शास्त्रजन्यात्मज्ञानपूर्वककर्मयोगः स्थितप्रज्ञतास्य
ज्ञाननिष्ठामापादयति ॥ ज्ञाननिष्ठारूपस्थितप्रज्ञतायोगाख्यमात्मावलोकनं साधयति ॥५३॥ ॥ ॥ 

एवमुक्ते पार्थो निःसंगकर्मानुष्ठानरूपकर्मयोगसाध्यस्थितप्रज्ञताया योगसाधनभूतायाः स्वरूपं स्थितप्रज्ञस्यानुष्ठा
नप्रकारं पृच्छति समाधिस्थस्य स्थितप्रज्ञस्य का भाषा को वाचकः शब्दः तस्य स्वरूपं कीदृशमित्यर्थः स्थितप्रज्ञः
किं च भाषणादिकं करोति ॥५४॥ इति विशेषकथनेन स्वरूपमभिव्यक्तं भवतीति हृत्ति विशेषत उच्यते आत्मन्ये( पु
वात्मना मनसात्मैकावलंबनेन तुष्टः तेन तोषेण तद्व्यतिरिक्तान्सर्वान्मनोगतान्कामान्यदा प्रकर्षेण जहाति त

अर्जुन उवाच स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ॥ स्थितधीः किं प्रभाषेत किमासीत व्रजेत किं ॥५४॥ श्रीभ
गवानुवाच ॥ प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ॥ आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥
दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ॥ वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥ दायं स्थितप्रज्ञ उच्यते
ज्ञाननिष्ठाकाष्ठेयं ॥५५॥ अनंतरं ज्ञाननिष्ठस्य ततोर्वाचीनावस्था विप्रकृष्टावस्थोच्यते प्रियविश्लेषादिदुःखनिमित्तेषू
पस्थितेष्वनुद्विग्नमना न दुःखी भवति सुखेषु विगतस्पृहः प्रियेषु संनिहितेष्वपि निःस्पृहः वीतरागभयक्रोधः अनागते
षु स्पृहा रागस्तद्रहितः प्रियविश्लेषाप्रियागमनहेतुदर्शननिमित्तं दुःखं भयं तद्रहितः प्रियविश्लेषाप्रियागमनहेतुभू
तचेतनांतराणां दुःखहेतुः स्वमनोविकारः क्रोधस्तद्रहितः एवंभूतो मुनिः आत्ममननशीलः स्थितधीरित्युच्यते ॥५६

॥गी०भा०॥ ततोर्वाचीनदशाप्रोच्यते ॥ यः सर्वत्र प्रियेष्वनभिस्नेहः उदासीनः विषयसंश्लेषविश्लेषरूपं शुभाशुभं प्राप्याभिनंदन अ० २॥
॥१९॥ द्वेषरहितः सोपि स्थितप्रज्ञः ॥ ५७ ॥ ततोर्वाचीनदशायदेंद्रियाणि इंद्रियार्थान् स्प्रष्टुमुद्युक्तानि तदैव कूर्मोंगानीवेंद्रियार्थे
भ्यः सर्वतः प्रतिसंहृत्य मनस्यात्मन्येव स्थापयति सोपि स्थितप्रज्ञः ॥ ५८ ॥ एवं चतुर्विधाज्ञाननिष्ठापूर्वपूर्वोत्तरोत्तरनिष्पाद्यो
त्कृष्टानी ज्ञाननिष्ठायाः दुःप्रापतां तत्प्राप्त्युपायांश्चाह ॥ इंद्रियाणामाहारा विषयाः निराहारस्य विषयेभ्यः प्रत्या

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभं ॥ नाभिनंदति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥ ५७ ॥ यदा संहरते चायं कूर्मोंगानी
व सर्वशः ॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥ ५८ ॥ विषया विनिवर्तंते निराहारस्य देहिनः ॥ रसवर्जं रसोप्य
स्य परं दृष्ट्वा निवर्तते ॥ ५९ ॥ यततो ह्यपि कौंतेय पुरुषस्य विपश्चितः ॥ इंद्रियाणि प्रमाथीनि हरंति प्रसभं मनः ॥ ६० ॥

हृतेंद्रियस्य देहिनो विषया विनिवर्तमाना रसवर्जं विनिवर्तंते ॥ रसो रागः विषयरागो न निवर्तत इत्यर्थः रसो रागो
प्यात्मस्वरूपं विषयेभ्यः परतरं सुखतरं च दृष्ट्वा निवर्तते ॥ ५९ ॥ आत्मदर्शनेन विना विषयरागो न निवर्तते ॥ अनि
वृत्ते विषयरागे विपश्चितो यतमानस्यापि पुरुषस्येंद्रियाणि प्रमाथीनि बलवंति मनः प्रसह्य हरंति ॥ एवमिंद्रियज
यस्यात्मदर्शनाधीनः ॥ आत्मदर्शनमिंद्रियजयाधीनमिति ज्ञाननिष्ठा दुःप्रापा ॥ ६० ॥ ॥ ॥ १९॥

सर्वस्य दोषस्य परिजिहीर्षया विषयानुरागयुक्ततया दुर्जयानींद्रियाणि संयम्य चेतसः शुभाश्रयभूते म
यि मनोवस्थाप्य समाहित आसीत मनसि मद्विषये सति निर्दग्धाशेषकल्मषतया निर्मलीकृतं निःशेष
विषयानुरागमलरहितं मन इंद्रियाणि स्ववशानि करोति ततो वश्येंद्रियं मन आत्मदर्शनाय भवति उक्तं
च यथाग्निरुद्धतशिखः कक्षं दहति सानिलः तथा चित्तस्थितो विष्णुर्योगिनां सर्वकिल्बिषमिति तदाह व
शे हीति ॥ ६१ ॥ एवं मय्यनिवेश्य मनः स्वीयगौरवेणेंद्रियजये प्रवृत्तो विनष्टो भवतीत्याह निरस्तविषयानु

॥ तानि सर्वाणि संयम्य युक्त आसीत मत्परः ॥ वशे हि यस्येंद्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥ ६१ ॥
॥ ध्यायतो विषयान्पुंसः संगस्तेषूपजायते ॥ संगात्संजायते कामः कामात्क्रोधोभिजायते ॥ ६२ ॥

रागस्य हि मय्यनिवेशितमनस इंद्रियाणि संयम्यावस्थितस्यापि अनादिपापवासनया विषयध्यानमव
र्जनीयं स्यात् ध्यायतो विषयान्पुंसः पुनरपि संगो विवृद्धो जायते संगात्संजायते कामः कामो नाम सं
गस्य विपाकदशा पुरुषो यां दशामापन्नो विषयान्भुक्त्वाऽस्थातुं न शक्नोति सा दशा कामः कामात्क्रोधोभि
जायते कामे सन्निहिते वर्तमाने विषये चासंनिहिते संनिहितान्पुरुषान्प्रति क्रोधो भवति ॥ ६२ ॥

॥गी॰भा॰ ॥२०॥ ॥क्रोधाद्भवति संमोहः कृत्याकृत्यविवेकशून्यतया सर्वं करोतीति॥ ततश्च शास्त्रे इंद्रियजयादिके प्रयत्ने स्मृतिभ्रंशो भवति॥ स्मृतिभ्रंशाद्बुद्धिनाशः आत्मज्ञानाय योऽध्यवसायः कृतस्तस्य नाशः स्यात् बुद्धिनाशात् पुनरपि संसारे निमग्नो नष्टो भवति॥६३॥ उक्तेन प्रकारेण मयि सर्वेश्वरे चेतसः समाश्रयेणैव समनानिर्दग्धकल्मषो रागद्वेषवियुक्तैरिंद्रियैर्विषयांश्चरन् विषयांस्तिरस्कृत्य वर्त्तमानो विधेयात्मा विधेयमनाः अ॰२॥

॥ क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः॥ स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्र ॥
॥ णश्यति॥६३॥ रागद्वेषवियुक्तैस्तु विषयानिंद्रियैश्चरन्॥ आत्मवश्यैर्विधेयात्मा प्र ॥
॥ सादमधिगच्छति॥६४॥ प्रसादे सर्वदुःखानां हानिरस्योपजायते॥ प्रसन्नचेतसो ॥
॥ ह्याशु बुद्धिः पर्यवतिष्ठते॥६५॥

प्रसादमधिगच्छति निर्मलांतःकरणो भवतीत्यर्थः॥६४॥ अस्य पुरुषस्य मनसः प्रसादे सति प्रकृतिसंसर्गप्रयुक्तसर्वदुःखानां हानिरुपजायते प्रसन्नचेतसः आत्मावलोकनात् विविधदोषरहितमनसः तदानीमेव हि विविक्तात्मविषया बुद्धिर्मेविपर्यवतिष्ठते॥ अतो मनःप्रसादेन दुःखहानिर्भवत्येव॥६५॥ २०॥

मय्यसंन्यस्तमनोरहितस्य प्रयत्नेनेंद्रियदमने प्रवृत्तस्य कदाचिदपि विविक्तात्मविषया बुद्धिर्न भवति अत एव नस्य तद्भावना न संभवति॥ विविक्तात्मानमभावयतो विषयस्पृहा शांतिर्न भवति॥ अशांतस्य विषयस्पृहायुक्तस्य कुतो नित्यनिरतिशयसुखप्राप्तिः॥६६॥ पुनरप्युक्तेन प्रकारेणेंद्रियनियमनमकुर्वतोऽनर्थमाह॥ इंद्रियाणां विषयेषु चरतां विषयेषु वर्त्तमानानां वर्त्तनमनु यन्मनोऽनुविधीयते प्रेरुपेणानुवर्त्यते तन्म

॥ नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना॥ न चाभावयतः शांतिरशांतस्य ॥
॥ कुतः सुखं॥६६॥ इंद्रियाणां हि चरतां यन्मनोऽनुविधीयते॥ तदस्य हरति प्रज्ञां॥
॥ वायुर्नावमिवांभसि॥६७॥ तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ॥
॥ इंद्रियाणींद्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥६८॥

नोऽस्य विविक्तात्मप्रवणतां हरति॥ विषयप्रवणतां करोतीत्यर्थः॥ यथांभसि नीयमानां नावं प्रतिकूलो वायुर्हरति॥६७॥ तस्मादुक्तेन प्रकारेण शुभाश्रये मयि निविष्टमनसो यस्येंद्रियाणींद्रियार्थेभ्यः सर्वशो निगृहीतानि तस्यैवात्मनि प्रज्ञा प्रतिष्ठिता भवति॥६८॥ ॥ ॥

एवंनियतेंद्रियस्यप्रसन्नमनसः स्थितिमाह ॥ याआत्मविषयाबुद्धिः सर्वभूतानांनिशानिशेवाप्रका
शिकातस्यामात्मविषयायांबुद्धाविंद्रियसंयमीप्रसन्नमनाजागर्तिआत्मानमवलोकयन्नास्तइत्य
र्थः ॥ यस्यांशब्दादिविषयायांबुद्धौसर्वाणिभूतानिजाग्रतिप्रबुद्धानिभवंति ॥ साशब्दादिविषयाबुद्धिरा
त्मानंपश्यतोमुनेर्निशावाप्रकाशिकाभवति ॥ ६९ ॥ यथात्मनैवापूर्यमाणमेकरूपंनादेयाआपःप्रवि

॥ यानिशासर्वभूतानांतस्यांजागर्तिसंयमी ॥ यस्यांजाग्रतिभूतानिसानिशापश्य ॥
॥ तोमुनेः ॥ ६९ ॥ आपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्व ॥
॥ त् ॥ तद्वत्कामायंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी ॥ ७० ॥

शंतिआसामपांप्रवेशः प्रवेशेऽपिचसमुद्रोनकंचनविशेषमापद्यतेएवंसर्वेकामाःशब्दादिविषयायंसंय
मिनंप्रविशंतितदिंद्रियगोचरतांप्राप्नुवंतिसशांतिमाप्नोतिशब्दादिभिरिंद्रियगोचरतामापन्नैरनापन्नैश्
चस्वात्मावलोकनतत्परोयोनविकारमाप्नोति सएवशांतिमाप्नोतीत्यर्थः ॥ नकामकामीशब्दादिभिर्यो
विक्रियतेसकदाचिदपिनशांतिमाप्नोति ॥ ७० ॥ ॥ ॐ ॥ ॥ श्री



काम्यंतइतिकामाः शब्दादयोविषयाः यः पुमान्शब्दादीन्सर्वान्विषयान्विहायतत्रनिःस्पृहः ममता
रहितश्चअनात्मनिदेहेआत्माभिमानरहितश्चरतिसआत्मानंदृष्ट्वाशांतिमधिगच्छति ॥ ७१ ॥ एषानित्यात्म
ज्ञानपूर्विकाऽसंगकर्मणिस्थितिः सैषास्थिरधीलक्षणाब्राह्मीब्रह्मप्रापिकाईदृशींकर्मस्थितिंप्राप्यनमुह्यतिन
पुनः संसारमाप्नोतिअस्यांस्थित्यामंतिमेवयस्यपिस्थित्वाब्रह्मनिर्वाणमृच्छतिनिर्वाणमयंब्रह्मसुखैकता

विहायकामान्यः सर्वान्पुमांश्चरतिनिःस्पृहः ॥ निर्ममोनिरहंकारः सशांतिमधिगच्छति ॥ ७१ ॥ एषाब्राह्मी
स्थितिः पार्थनैनांप्राप्यविमुह्यति ॥ स्थित्वास्यामंतकालेऽपिब्रह्मनिर्वाणमृच्छति ॥ ७२ ॥ इतिश्रीभगवद्गीतासू
पनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसांख्ययोगोनामद्वितीयोऽध्यायः ॥ २ ॥ ॥

नमधिगच्छतीत्यर्थः ॥ ७२ ॥ एवमात्मयाथात्म्यज्ञानपूर्वकयुद्धाख्यस्यकर्मणस्तत्प्राप्तिसाधनतामज्ञानतः शरी
रात्मज्ञानेनमोहितस्यतेनचमोहेनयुद्धान्निवृत्तस्यार्जुनस्यमोहशांतयेनित्यात्मविषयासांख्यबुद्धिस्तत्पूर्विका
चासंगकर्मानुष्ठानरूपाकर्मयोगविषयाबुद्धिः स्थितप्रज्ञतायोगसाधनभूताद्वितीयेध्यायेप्रोक्तातदुक्तं
नित्यात्मासंगकर्मेहागोचरासांख्ययोगधीः ॥ द्वितीयेस्थि प्रोक्तातन्मोहशांतयइति ॥ २ ॥ इतिश्रीमद्रामानु

स्थितधीलक्ष्या

सांख्ययोगकर्मयो
गधीः

द्वितीयोऽध्यायः

तदेवं मुमुक्षुभिः परमप्राप्यतया वेदान्तोदितनिरस्तनिखिलाविद्यादिदोषगंधानवधिकातिशयासंख्येयकल्या
णगुणगणपरब्रह्मपुरुषोत्तमप्राप्त्युपायभूतं वेदनोपासनध्यानादिशब्दवाच्यं तदैकान्तिकात्यंतिकभक्तियोगं व
क्तुं तदंगभूतं य आत्मापहतपाप्मेत्यादिप्रजापतिवाक्योदितं प्राप्तुरात्मनो याथात्म्यदर्शनं तन्नित्यताज्ञानपूर्वकासं
गकर्मनिष्पाद्यज्ञानयोगसाध्यमुक्तं प्रजापतिवाक्ये हि दहरविद्यावाक्योदितपरविद्याशेषतया प्राप्तुरात्मनः स्वरूपदर्श
नेप्सनमात्मानमन्विष्य विजानातीत्युक्त्वा जागरितस्वप्नसुषुप्तीनं प्रत्यगात्मस्वरूपमशरीरं प्रतिपाद्यैवमेवैष संप्रसादो
स्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इति दहरविद्याफलेनोपसंहृतं अध्यात्म
योगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहातीत्येवमादिषु देवं मत्वेति विधीयमानपरविद्यांगतया अध्यात्मयोगाधि
गमेनेति प्रत्यगात्मज्ञानं विधाय न जायते म्रियते वा विपश्चिदित्यादिना प्रत्यगात्मस्वरूपं विशोध्य अणोरणीयानि
त्यारभ्य महान्तं विभुमात्मानं मत्वा धीरो न शोचति नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृ
णुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वामित्यादिभिः परस्वरूपं तदुपासनमुपासनस्य च भक्तिरूपतां प्रतिपाद्या
त्मानं रथिनं विद्धीत्यादिना विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः सोध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति परविद्याफलेन संहृतं॥
अतः परमध्यायचतुष्टयेनेदमेव प्राप्तुः प्रत्यगात्मनो दर्शनं ससाधनं प्रपंच्यते॥ ॥ ॥ श्री ॥ ॥ २२ ॥

यदि कर्मणो बुद्धिरेव ज्यायसीति ते मतं किमर्थं तर्हि घोरे कर्मणि मां नियोजयसि॥ एतदुक्तं भवति ज्ञाननिष्ठैवा
त्मावलोकनसाधनं कर्मनिष्ठा तु तन्निष्पादिका आत्मावलोकनसाधनभूता तु ज्ञाननिष्ठा सकलेन्द्रियमन
सां शब्दादिविषयव्यापारोपरतिनिष्पाद्येत्यभिहिता इंद्रियव्यापारोपरतिनिष्पाद्यमात्मावलोकनं चेत्सिसाध
यिषितं तर्हि सकलकर्मनिवृत्तिपूर्वकज्ञाननिष्ठायामेवाहं नियोजयितव्यः किमर्थं॥

॥ अर्जुन उवाच ॥ ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन॥ तत्किं कर्मणि॥
॥ घोरे मां नियोजयसि केशव॥ १॥ व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे॥ तदेकं॥
॥ वद निश्चित्य येन श्रेयोऽहमाप्नुयां॥ २॥ ॥ ॥

घोरे सर्वेन्द्रियव्यापाररूपे आत्मावलोकनविरोधिनि कर्मणि मां नियोजयसीति॥ १॥ अतो व्यामिश्रवाक्ये
न मां मोहयसीवेति मे प्रतिभाति तथा ह्यात्मावलोकनसाधनभूतायाः सर्वेन्द्रियव्यापारोपरतिरूपाया ज्ञान
निष्ठायास्तद्विपर्ययरूपं कर्म साधनं तदेवं कुर्विति वाक्यं विरुद्धं व्यामिश्रमेव तस्मादेकमसंमिश्रं वाक्यं वद
येन वाक्येनाहमनुष्ठेयरूपं निश्चित्यात्मनः श्रेयः प्राप्नुयां॥ २॥ ॥ ॥

॥पुरोक्तंनसम्यगवधृतंत्वयापुरापूर्वस्मिंल्लोकेविचित्राधिकारपूर्णेद्विविधानिष्ठाज्ञानकर्मविषयाव्यधि
कारसंकीर्णामयोक्तानहिसर्वोलौकिकःपुरुषःसंजातमोक्षाभिलाषस्तदानीमेवज्ञानयोगाधिकारेभ
वति॥अपित्वनभिसंहितफलेनपरमपुरुषाराधनरूपेणानुष्ठितेनकर्मणाविध्वस्तमनोमलोऽव्याकुलेंद्रि
योज्ञाननिष्ठायामधिकारीनियतःप्रवृत्तिभूतानामित्यादिनापरमपुरुषाराधनैकविषयताकर्मणांवक्ष्यतेऽ
ह्यपिकर्मण्येवाधिकारस्तइत्यादिनानभिसंहितफलं॥

॥श्रीभगवानुवाच॥ लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ॥ज्ञानयोगेनसांख्यानांकर्म॥
॥योगेनयोगिनां॥३॥

॥कर्मानुष्ठेयंविधायतेनविषयव्याकुलतारूपमोहादुत्तीर्णबुद्धेःप्रजहातिय
दाकामानित्यादिनाज्ञानयोगउदितःअतःसांख्यानामेवज्ञानयोगेनज्ञानयोगस्थितिरुक्तायोगिनांकर्म
योगेनकर्मयोगस्थितिरुक्तासंख्याबुद्धिस्तद्युक्ताःसांख्याःआत्मैकविषययाबुद्ध्यायुक्ताःसांख्याःअतद्
र्हाःकर्मयोगाधिकारिणोयोगिनःविषयव्याकुलबुद्धियुक्तानांकर्मयोगाधिकारःअव्याकुलबुद्धीनांज्ञा
नयोगाधिकारइत्युक्तइतिनकिंचिदिहविरुद्धंनापिव्यामिश्रमभिहितं॥३॥ ॥ ॥ 

सर्वस्यलौकिकस्यपुरुषस्यमोक्षेच्छायांसंजातायांसद्यएवज्ञानयोगेऽधिकारइत्याह॥नशास्त्रीयाणांकर्मणा
मनारंभादेवपुरुषोनैःकर्म्यंज्ञानमाप्नोति॥सर्वेंद्रियव्यापारारब्धकर्मोपरतिपूर्विकांज्ञाननिष्ठांनप्राप्नोतीत्य
र्थः॥नचारब्धस्यशास्त्रीयस्यकर्मणःत्यागादनभिसंहितफलस्यपरमपुरुषाराधनविषयभूतस्यकर्म
णःसिद्धिःआत्मनिष्ठांसाधयतितत्स्तेनविनातांनप्राप्नोतीत्यनभिसंहितफलैःकर्मभिरनाराधितगोविंदैर् करले
विनष्टानादिकालप्रवृत्तानंतपापसंचयैरव्याकुलेंद्रियतापूर्विकात्मनिष्ठादुःसंपाद्या॥४॥

॥नकर्मणामनारंभान्नैःकर्म्यंपुरुषोश्नुते॥नचसंन्यसनादेवसिद्धिंसमधिगच्छति॥४॥
॥नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्॥कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः॥५॥

एतदेवोपपादयति॥नहीति॥नह्यस्मिन्लोकेवर्त्तमानःपुरुषःकश्चित्कदाचिदपिकर्माकुर्वाण
स्तिष्ठतिनकिंचित्करोमीतिव्यवसितोपिसर्वःप्रकृतिसमुद्भवैःसत्वरजस्तमोभिःप्राक्तनकर्मानुगुणप्र
वृद्धैर्गुणैःस्वोचितंकर्मप्रत्यवशःकार्यतेप्रयुज्यते॥अनेनोक्तलक्षणेनकर्मयोगेनप्राचीनपापसंचयंना
शयित्वागुणांश्चसत्वादीनवशीकृत्वानिर्मलांतःकरणेनसंपाद्योज्ञानयोगः॥५॥ ॥ ॥

अन्यथा ज्ञानयोगाय प्रवृत्तोऽपि मिथ्याचारो भवतीत्याह ॥ अविनष्टपापतया अजितबाह्यान्तःकरण
आत्मज्ञानाय प्रवृत्तो विषयप्रवणतयाऽऽत्मविमुखीकृतमनाः विषयानेव स्मरन्य आस्ते अन्यथा सं
कल्पोऽन्यथाचरतीति स मिथ्याचार उच्यते आत्मज्ञानाभावेन अयुक्तो विपरीतो विनश्यति भवतीत्यर्थः ॥६॥ ततः प्र

॥ कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ॥
॥ इन्द्रियार्थान्विमूढात्मा मिथ्याचारः स उच्यते ॥६॥
॥ यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ॥ ॥
॥ कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ॥७॥

र्यस्त्वविषयसञ्जातीये ज्ञात्वा स्त्रीये कर्मेन्द्रियाण्यात्मावलोकनप्रवर्तनेन मनसा नियम्य तैः स्वत एव क
र्मप्रवणैरिन्द्रियैरसंगपूर्वकं यः कर्मयोगमारभते सोऽसंभाव्यमानप्रमादत्वेन ज्ञाननिष्ठादपि पुरुषाद्वि
शिष्यते ॥७॥ ॥



नियतं व्याप्तं प्रकृतिसंसृष्टेन हि व्याप्तं कर्म प्रकृतिसंसृष्टस्त्वं मनोऽदिवासनया नियतत्वेन सुदुःशकत्वादसं
भावितप्रमादत्वाच्च कर्मणः कर्मैव कुरु अकर्मणो हि ज्ञाननिष्ठाया अपि कर्मैव ज्यायोऽनेः कर्मेषु पुरुषो
क्तन इति प्रक्रमात् ॥ अकर्मशब्देन ज्ञाननिष्ठैवोच्यते ॥ ज्ञाननिष्ठाधिकारिणोऽप्यनभ्यस्तपूर्वेन याचा
नियतत्वेन दुःशकत्वात्प्रमादत्वाच्च ज्ञाननिष्ठायाः कर्मनिष्ठैव ज्यायसी कर्मणि क्रियमाणे त्वात्मयाथा
त्म्यज्ञानेनात्मनोऽकर्तृत्वानुसंधानमनंतरमेव वक्ष्यते ॥ अत आत्मज्ञानस्यापि कर्मयोगान्तर्गतत्वात्स एव

॥ नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ॥ शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ॥८॥

ज्यायानित्यर्थः ॥ कर्मणो ज्ञाने (सकाशात्) निष्ठाया ज्यायस्त्वमवगतं ज्ञाननिष्ठायामधिकारे सत्यैवोपपद्यते ॥ यदि
सर्वं कर्म परित्यज्य केवलज्ञाननिष्ठायामधिकरोऽपि त्वं कर्मणस्ते ज्ञाननिष्ठस्य ज्ञाननिष्ठोपकारिणी श
रीरयात्रापि न सेत्स्यति ॥ यावत्साधनसमाप्ति शरीरधारणं चावश्यकं न्यायार्जितधनेन महायज्ञादि
कं कृत्वा तच्छिष्टान्नेनैव शरीरधारणं कार्यं आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिरिति श्रु
तेः ॥ ते त्वघं भुंजते पापा इति वक्ष्यति ॥ अतो ज्ञाननिष्ठस्यापि कर्मा कुर्वतो देहयात्रा न सेत्स्यतीत्यतो ज्ञा

ननिष्ठस्यापि विद्यमानशरीरस्य यावत्साधनसमाप्ति महायज्ञादिनित्यनैमित्तिककर्मावश्यं कार्यमत्र
न शक्यं कर्मयोगेऽप्यात्मनोऽकर्तृत्वभावनया आत्मयाथात्म्यानुसंधानमंतर्भूतं॥ अनादिप्रकृतिसंसृष्टस्य क
र्मयोगः सुशकः॥ अप्रमादश्च अतो ज्ञाननिष्ठायोग्यस्यापि ज्ञानयोगात्कर्मयोगो ज्यायान् तस्मात्त्वं कर्म
योगमेव कुर्विति निश्चयः॥८॥ एवं तर्हि द्रव्यार्जनादिकर्मणोऽहंकारममकारादिसर्वेन्द्रियव्याकुलताग
र्भत्वेनास्य पुरुषस्य कर्मवासनया बंधनं भ॥ ॥श्री॥ ॥

॥यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबंधनः॥ तदर्थं कर्म कौंतेय मुक्तसंगः समाचर॥९॥

विष्यतीत्यत आह॥ यज्ञादिशास्त्रार्थकर्मशेषभूतात् द्रव्यार्जनादेः कर्मणोऽन्यत्रात्मीयप्रयोजनशे
षभूते कर्मणि क्रियमाणेऽयं लोकः कर्मबंधनो भवति॥ अतस्त्वं यज्ञाद्यर्थं द्रव्यार्जनादिकं कर्म समाच
र॥ तत्रात्मप्रयोजनसाधनतया यः संगस्तस्मात्संगान्मुक्तस्त्वं समाचर॥ एवं मुक्तसंगेन यज्ञार्थ
तया कर्मणि क्रियमाणे यज्ञादिभिः कर्मभिराराधितः परमपुरुषोऽस्यानादिकालप्रवृत्तकर्मवास
नामुच्छिद्याव्याकुलात्मावलोकनं ददातीत्यर्थः॥९॥ श्रीनीलकंठनारायणाय नमोनमः॥ ॥



यज्ञशिष्टेनैव सर्वपुरुषार्थलक्षणसाधननिष्ठानां शरीरधारणं कर्तव्यं॥ अयज्ञशिष्टेन शरीरधारणं कु
र्वतां दोषं चाह॥ सहेति चतुर्भिः॥ पतिं विश्वस्येत्यादिश्रुतेर्निरुपाधिकः प्रजापतिशब्दः सर्वेश्वरं विश्व
स्रष्टारं विश्वात्मानं परायणं नारायणमाह॥ पुरा सर्गकाले भगवान् प्रजापतिरनादिकालप्रवृत्ताचि
त्संसर्गविवशा उपसंहृतनामरूपविभागाः स्वस्मिन् प्रलीनाः सकलपुरुषार्थानर्हाश्चेतनेतरकल्पाः प्र
जाः समीक्ष्य परमकारुणिकस्तदुज्जिजीविषया स्वाराधनभूतयज्ञनिर्वृत्तये यज्ञैः सहताः सृष्ट्वेव

॥सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः॥ अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥१०॥
॥देवान् भावयतानेन ते देवा भावयंतु वः॥ परस्परं भावयंतः श्रेयः परमवाप्स्यथ॥११॥ ॥

मुवाच॥ अनेन यज्ञेन प्रसविष्यध्वं आत्मनो वृद्धिं कुरुध्वं॥ एष वो यज्ञः परमपुरुषार्थलक्षणमोक्षाख्य
स्य कामस्य तदनुगुणानां च कामानां पूरयितास्त्वित्यर्थः॥१०॥ अनेन देवाराधनभूतेन देवान् मच्छरीरभू
तान् मदात्मकान् आराधयत॥ अहं हि सर्वयज्ञानां भोक्तेति हि वक्ष्यते॥ यज्ञेनाराधितास्ते देवा मदात्मकाः स्वाराध
नापेक्षितान्नपानाद्यैः स्वाराधकान् युष्मान् भावयंतु॥ एवं परस्परं भावयंतः परं श्रेयो मोक्षाख्यमवाप्स्यथ॥११॥

॥यज्ञभाविता यज्ञेनाराधिता मदात्मका देवा इष्टान् भोगान् वो दास्यन्ते परमपुरुषार्थलक्षणमोक्षसाधनता
यइष्टा भोगास्तान् पूर्वपूर्वयज्ञभाविता देवा उत्तरोत्तरस्वाराधनापेक्षितान् सर्वान् दास्यन्तीत्यर्थः स्वाराध
नाय तैर्दत्तान् भोगांस्तेभ्योऽप्रदाय यो भुंक्ते चोर एव सः चौर्यं हि नामाऽन्येन स्वप्रयोजनायैव कॢप्ते वस्तुनि स्व
कीयताबुद्धिं कृत्वा तेन स्वात्मपोषणं अतोऽस्य न परमपुरुषार्थानर्हतामात्रमपि तु निरयगामित्वं च भवती
निरयगामित्वं त्यर्थः॥१२॥ तदेव विवृणोति इन्द्राद्यात्मनावस्थितपरमपुरुषाराधना॥

॥इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः॥ तैर्दत्तानप्रदायैभ्यो यो भुंक्ते स्तेन एव सः॥१२॥
॥यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः॥ भुंजते ते त्वघं पापा ये पचंत्यात्मकारणात्॥१३॥

र्धनयैव द्रव्याण्युत्पाद्य विपच्य तैस्तत्यावस्थितं परमपुरुषमाराध्य तच्छिष्टाशनेन ये शरीरयात्रां कुर्वते ते
त्वनादिकालोपचितकिल्बिषैरात्मयाथात्म्यावलोकनविरोधिभिः सर्वैर्विमुच्यन्ते ये तु परमपुरुषेणेन्द्रा
द्यात्मना स्वाराधनाय दत्तान् भोगानात्मार्थत्वेनोपादाय विपच्याऽश्नन्ति ते पापात्मानोऽघमेव भुंजते॥
अघपरिणामित्वादघमित्युच्यते॥ आत्मावलोकनविमुखा नरकायैव पचंति॥१३॥ ॥ ॥ २६॥

पुनरपि लोकदृष्ट्या शास्त्रदृष्ट्या च सर्वस्य यज्ञमूलत्वं दर्शयित्वा यज्ञानुवर्तनस्यावश्यकार्यतामननुव
र्तने च दोषमाह॥ अन्नादिति॥ अन्नाद्भवंति भूतानि भवंति पर्जन्यादन्नसंभव इति सर्वलोकसाक्षिकं
यज्ञात् पर्जन्यो भवतीति शास्त्रेणावगम्यते॥ अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते॥ आदित्याज्जा
यते वृष्टिर्वृष्टेरन्नं ततः प्रजा इत्यादिना यज्ञश्च द्रव्यार्जनादिकर्तृपुरुषव्यापाररूपकर्मसमुद्भवः॥१४॥ कर्म
च ब्रह्मोद्भवं अत्र च ब्रह्मशब्दनिर्दिष्टं प्रकृतिपरिणामरूपं शरीरं तदेतत्कृत्स्नमापरूपमन्नं च जायते इ प्रकृतिः
अन्नात्मकशरीरं

॥अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसंभवः॥ यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः॥१४॥
॥कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवं॥ तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितं॥१५॥

स्थूलेतिशेषः ति ब्रह्मशब्देन प्रकृतिर्निर्दिष्टाऽन्यत्रापि मम योनिर्महद्ब्रह्मेति वक्ष्यते॥ अतः कर्म ब्रह्मोद्भवमिति प्रकृति
परिणामरूपशरीरोद्भवं कर्मेत्युक्तं भवति॥ ब्रह्माक्षरसमुद्भवमित्यत्राक्षरशब्दनिर्दिष्टो जीवात्मा अन्न
पानादिना तृप्ताक्षराधिष्ठितं शरीरं कर्मणे प्रभवति कर्मसाधनभूतं शरीरमक्षरसमुद्भवं तस्मात्सर्वग
तं ब्रह्म सर्वाधिकारिगतं शरीरं नित्यं यज्ञे प्रतिष्ठितं यज्ञमूलमित्यर्थः॥१५॥ ॥ ॥

॥गी॰भा॰ ॥२७॥ एवंपरमपुरुषेणप्रवर्त्तितमिदंचक्रंअन्नात्भूतशब्दनिर्दिष्टानिसजीवानिशरीराणिभवंतिपर्जन्यादन्नंयज्ञा अ॰३॥
त्पर्जन्यःयज्ञश्चकर्त्तृव्यापारानुरूपात्कर्मणःकर्मचसजीवात्शरीराच्छरीरंचपुनरन्नादित्यन्योन्यकार्य ॥२७
कारणभावेनचक्रवत्परिवर्त्तमानमिहसाधनेवर्त्तमानोयःकर्मयोगाधिकारीज्ञानयोगाधिकारीवा
नानुवर्त्तयतिनप्रवर्त्तयतिसोघायुर्भवतिअघारंभायैवाऽस्यायुरयपरिणतंवाऽभयरूपंवासोऽघायुःअतए
वेंद्रियारामोभवतिनत्वात्मारामःइंद्रियाण्येवास्योद्यानानिभवंति॥यज्ञशिष्टवर्द्धितदेहमनस्कत्वेनोद्रिक्त

एवंप्रवर्त्तितंचक्रंनानुवर्त्तयतीहयः॥अघायुरिंद्रियारामोमोघंपार्थसजीवति॥१६॥यस्त्वात्मरतिरेवस्या
दात्मतृप्तश्चमानवः॥आत्मन्येवचसंतुष्टस्तस्यकार्यंनविद्यते॥१७॥

रजस्तमस्कआत्मावलोकनविमु
खतयाविषयभोगैकरतिर्भवतिअतोज्ञानयोगादौयतमानोपिनिःफलप्रयत्नतयामोघंपार्थसजीवतीति
१६॥असाधनायत्तात्मदर्शनस्यमुक्तस्यैवमहायज्ञादिवर्णाश्रमोचितकर्मानारंभइत्याह॥यस्तुज्ञानयोग
कर्मयोगसाधननिरपेक्षःस्वत एवात्मरतिरात्माभिमुखःआत्मनैवतृप्तोनान्नपानादिभिरात्मव्यतिरिक्तैः॥आत्म
न्येवसंतुष्टोनान्यत्रकुत्रचिगीतवादित्रनृत्यादौधारणपोषणभोगादिकंसर्वमात्मैवयस्यतस्यात्मदर्शनायकर्त्तव्यं नविद्यतेस्वतएवसर्वदादृष्टात्मरूपत्वात् २७॥
न

अतएवतस्यात्मदर्शनायकृतेनतत्साधनेननार्थोनकिंचित्प्रयोजनं॥अकृतेनात्मदर्शनसाधनेननक
श्चिदनर्थः॥असाधनायत्तात्मदर्शनत्वात्स्वतएवात्मव्यतिरिक्तसकलविषयविमुखस्यास्यसर्वेषुप्रकृ
आकाशादिकार्यसहितेषु तिपरिणामविशेषेषुकाशादिभूतेषुसकार्येषुनकश्चित्प्रयोजनतयासाधनतयावाव्यपाश्रयःयतस्तद्वि
मुखीकरणायसाधनारंभःसहिमुक्तएव॥१७॥यस्मादसाधनायत्तात्मदर्शनस्यैवसाधनाप्रवृत्तिःयस्मा
च्चतत्साधनेप्रवर्त्तस्यापिमुमुक्षकत्वादप्रमादत्वात्तदंतर्गतात्मयाथात्म्यानुसंधानलाभज्ञानयोगिनोपिप्रा

॥नैवतस्यकृतेनार्थोनाकृतेनेहकश्चन॥नचास्यसर्वभूतेषुकश्चिदर्थव्यपाश्रयः॥१८॥
॥तस्मादसक्तःसततंकार्यंकर्मसमाचर॥असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः॥१९॥ र

प्यपाःकर्मानुष्टसपेक्षत्वाच्चकर्मयोगएवात्मदर्शनप्रवृत्तौश्रेयान्॥तस्मादसंगपूर्वकंकर्मकार्यमिति
वसततंयावदात्मप्राप्तिकर्मैवसमाचर॥असक्तःकर्मकार्यमितिवक्ष्यमाणाकर्तृत्वानुसंधानपूर्वकं
चकर्माचरन्पुरुषःकर्मयोगेनैवपरमाप्नोत्यात्मानंप्राप्नोतीत्यर्थः॥१९॥यतोज्ञानयोगाधिकारिणोपि
कर्मयोगएवात्मदर्शनेश्रेयान्अतएवजनकादयोराजर्षयोज्ञानिनामग्रेसराःकर्मयोगेनैवसंसिद्धि

मास्थिताः आत्मानं प्राप्तवंतः ॥ एवं मुमुक्षोः प्रथमं ज्ञानयोगानर्हत्वात् कर्मयोगाधिकारिणः कर्मयोग एव
कार्य इत्युक्त्वा ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगात् कर्मयोग एव श्रेयानित्युक्तं ॥ इदानीं शिष्टतया व्यपदे
श्यस्य सर्वथा कर्मयोग एव कार्य इत्युच्यते ॥ लोकसंग्रहं संपश्यन्नपि कर्मैव कर्तुमर्हसि ॥२०॥ श्रेष्ठः कृ
त्स्नशास्त्राभिज्ञतयानुष्ठातृतया च प्रथितो यद्यदाचरति तत्तदेवाकृत्स्नवित् जनोऽप्याचरति ॥ अनुष्ठीयमा
नमपि कर्म श्रेष्ठो यत्प्रमाणं यदंगयुक्तमनुतिष्ठति तदंगयुक्तमेवाकृत्स्नवित् लोकोऽनुतिष्ठति ॥ अतो लोकरक्षा

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ॥ लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि ॥२०॥ यद्यदाचरति श्रेष्ठ
स्तत्तदेवेतरो जनः ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ॥२१॥ न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किंचन ॥
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ॥२२॥

र्थं शिष्टतया प्रथितेन स्ववर्णाश्रमोचितं कर्म सकलं सर्वदानु
ष्ठेयं ॥ अन्यथा लोकनाशजनितं पापं ज्ञानयोगादप्येनं प्रच्यावयेत ॥२१॥ न मे सर्वेश्वरस्यावाप्तकामस्य
सर्वज्ञस्य सत्यसंकल्पस्य त्रिषु लोकेषु देवमनुष्यादिरूपेण स्वच्छंदतो वर्तमानस्य किंचिदपि कर्तव्यमस्ति
अतोऽनवाप्तं कर्मणावाप्तव्यं न किंचिदस्ति ॥ अथापि लोकरक्षार्थं कर्मण्येव वर्ते ॥२२॥ ॥



॥ अतः सर्वेश्वरः सत्यसंकल्पः स्वसंकल्पकृतजगदुदयविभवलयलीलोऽपि स्वच्छंदतो जगदुपकृतये मर्त्यो
जातोऽपि मनुष्येषु शिष्टजनाग्रेसरवसुदेवगृहेऽवतीर्णस्तत्कुलोचितकर्मण्यतंद्रितः सर्वदा यदि न वर्तेयं त
र्हि मम शिष्टजनाग्रेसरवसुदेवसूनोर्वर्त्माकृत्स्नविदः शिष्टाः सर्वप्रकारेणायमेव धर्म इत्यनुवर्तंते ते च स्वक
र्तव्याननुष्ठानेनात्मानमनुपलभ्य निरयगामिनो भवेयुः ॥२३॥ अहं कुलोचितं कर्म न चेत् कुर्यां तर्ह्येवमेवम
वे शिष्टलोकाः मदाचारायत्तधर्मनिश्चया अकरणादेवोत्सीदेयुः नष्टा भवेयुः शास्त्रीयाचाराणामपाल

॥ यदि ह्यहं न वर्तेयं जातु कर्मण्यतंद्रितः ॥ मम वर्त्मानुवर्तंते मनुष्याः पार्थ सर्वशः ॥२३॥
॥ उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहं ॥ संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः ॥२४॥

नात् सर्वेषां शिष्टानां संकरस्य च कर्ता स्यां अत एवेमाः प्रजा उपहन्यां ॥ एवमेवात्मविदपि शिष्टजनाग्रेसरत्वं
दृष्टवतो युधिष्ठिरानुजः सन् शिष्टतया प्रतिज्ञाननिष्ठायामधिकारोपितस्तस्वदाचारानुवर्तिनोऽकृत्स्नविदः
शिष्टा मुमुक्षवः स्वाधिकारमजानंतः कर्मनिष्ठायामनधिकुर्वतो विनश्येयुः ॥ अतः शिष्टतया व्यपदे
श्येनात्मविदा कर्मैव कर्तव्यं ॥२४॥ ॥ ॥ ॥

।अविद्वांसः॥ आत्मन्यकृत्स्नविदः कर्मण्यसक्ताः कर्मण्यवर्जनीयसंबंधा आत्मन्यकृत्स्नवित्त्
यानादभ्यासरूपज्ञानयोगेनाधिकृताः कर्मयोगाधिकारिणः कर्मयोगमेव यथात्मदर्शनाय कुर्वते त
थात्मनि कृत्स्नवित्तया कर्मण्यसक्तो ज्ञानयोगाधिकारयोग्योपि व्यपदेश्यः शिष्टलोकरक्षणार्थं स्वाचारे लोके शिष्टतया निर्दिष्टः
ण शिष्टलोकानां धर्मे निष्ठां चिकीर्षुः कर्मयोगमेव कुर्यात्॥२५॥ अज्ञानामात्मन्यकृत्स्नवित्तयाज्ञान

॥ सक्ताः कर्मण्यविद्वांसो यथा कुर्वंति भारत॥ कुर्याद्विद्वांस्तथास ॥
॥ क्तश्चिकीर्षुर्लोकसंग्रहं॥२५॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसंगि ॥
॥ नां जोषयेत्सर्वकर्माणि विद्वान्युक्तः समाचरन्॥२६॥ ॥

योगोपपादनाशक्तानां मुमुक्षूणां कर्मसंगिनामनादिकर्मवासनया कर्मण्येव नियतत्वेन कर्मयोगाधि
कारिणां कर्मयोगादन्यदात्मावलोकनसाधनमस्तीति न बुद्धिभेदं जनयेत् किंतर्हि आत्मनि कृत्स्नवित्त
याज्ञानयोगशक्तोपि पूर्वोक्तनीत्या कर्मयोग एव ज्ञानयोगनिरपेक्ष आत्मावलोकनसाधनमिति बु
द्ध्या युक्तः कर्मैवाचरन् सर्वकर्मस्वकृत्स्नविदां प्रीतिं जनयेत्॥२६॥ ॥ ॥ २९॥

॥अथ कर्मयोगमनुतिष्ठतो विदुषोऽविदुषश्च विशेषं दर्शयन् कर्मयोगापेक्षितमात्मनोऽकर्तृत्वानुसंधा
नप्रकारमुपदिशति॥ प्रकृतेरिति॥ प्रकृतेर्गुणैः सत्वादिभिः स्वानुरूपं क्रियमाणानि कर्माणि अ
हंकारविमूढात्माहं कर्तेति मन्यते अहंकारेण विमूढः आत्मा यस्यासौ अहंकारेणाहमर्थे प्रकृतावह
मित्यभिमानः तेनाज्ञानात्मस्वरूपो गुणकर्मस्वहं कर्तेति मन्यत इत्यर्थः॥२७॥ गुणकर्मविभागयोः सत्वा
दिगुणविभागे तत्तत्कर्मविभागे च तत्त्ववित् गुणाः सत्वादयः स्वगुणेषु स्वेषु कार्येषु वर्तंत इति मत्वा गुण

॥ प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः॥ अहंकारविमूढात्मा कर्ताहमिति मन्यते॥२७॥ तत्व ॥
॥ वित्तु महाबाहो गुणकर्मविभागयोः॥ गुणा गुणेषु वर्तंत इति मत्वा न सज्जते॥२८॥ प्रकृतेर्गुणसंमूढाः॥
॥ सज्जंते गुणकर्मसु॥

कर्मस्वहं कर्तेति न सज्जते॥२८॥ अकृत्स्नविद आत्मदर्शनाय प्रवृत्ताः प्रकृतिसंसृ
ष्टतया प्रकृतेर्गुणैर्यथावस्थितात्मनि संमूढाः गुणकर्मसु क्रियास्वेव सज्जंते न तद्वियुक्तात्मस्वरूपे अतो
ज्ञानयोगाय न प्रभवंति॥ कर्मयोग एव एतेषामधिकारः॥ एवंभूतांस्तान् मंदान् अकृत्स्नविदः कृत्स्नवित्
स्वयं ज्ञानयोगस्थो न विचालयेत् ते किल मंदाः श्रेष्ठजनाचारानुवर्तिनः॥ कर्मयोगावस्थितमेनं दृष्ट्वा क

र्मयोगान्न प्रचलितमनसो भवेयुः॥ अतः श्रेष्ठः स्वयमपि कर्मयोगे तिष्ठन्नात्मयाथात्म्यज्ञानेनात्मनो
कर्तृत्वमनुसंदधानः कर्मयोग एवात्मावलोकने निरपेक्षसाधनमिति दर्शयित्वानानःकृत्स्नविदो जो
षयेदित्यर्थः ॥२८॥ ज्ञानयोगाधिकारिणोऽपि ज्ञानयोगादस्यैव कर्मयोगस्य ज्यायस्त्वं पूर्वमेवोक्तं ॥ अतोऽप्य
एवं कर्मकुर्यात्रतु पदेश्यो लोकसंग्रहाय त्वमेवं कुर्याः। प्रकृतिविविक्तात्मस्वभावनिरूपणेन गुणेषु कर्तृत्वमारोप्य कर्मा
नुष्ठानप्रकार उक्तः। गुणेषु कर्तृत्वानुसंधानं चेदमेव आत्मनो न स्वरूपप्रयुक्तमिदं कर्तृत्वमपि तु गुण

॥ तानःकृत्स्नविदो मंदान्कृत्स्नविन्न विचालयेत् ॥२९॥ मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ॥

संबंधकृतमिति प्राप्ताप्राप्तविवेकेन गुणकृतमित्यनुसंधानं इदानीमात्मनां परमपुरुषशरीरतया तं परमपुरुषकृतनियाम्यत्वविशिष्टात्मस्वरूपनिरूपणेन
न्नियाम्यत्वस्वरूपनिरूपणेन भगवति पुरुषोत्तमे सर्वात्मभूते गुणकृतं च कर्तृत्वमारोप्य कर्म कर्तव्यता
मुच्यते॥ मयीति ॥ मयि सर्वेश्वरे सर्वभूतात्मभूते सर्वाणि कर्माणि अध्यात्मचेतसा संन्यस्य निराशीर्नि
र्ममो विगतज्वरो युद्धादिकं सर्वमेवोदितं कर्म कुरुष्व आत्मनि यच्चेतस्तदध्यात्मचेतः तेन आत्मस्वरू
पविषयेण श्रुतिशतसिद्धेन ज्ञानेनेत्यर्थः ॥ अंतः प्रविष्टः शास्ता जनानां सर्वात्मा अंतः प्रविष्टं कर्ता ३०॥

रमेनं य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आ
त्मांतर्याम्यमृत इत्येवमाद्याः श्रुतयः परमपुरुषप्रवर्त्यं तच्छरीरभूतमेतमात्मानं परमपुरुषं च प्रवर्त
यितारमाचक्षते॥ स्मृतयश्च प्रशासितारं सर्वेषामित्याद्याः सर्वस्य चाहं हृदि संनिविष्टः॥ ईश्वरः सर्वभू
तानां हृद्देशेऽर्जुन तिष्ठति॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया इति च वक्ष्यते॥ अतो मच्छरीरतया
मत्प्रवर्त्यात्मस्वरूपानुसंधानेन सर्वाणि कर्माणि मयैव क्रियमाणानीति मयि परमपुरुषे संन्यस्य तानि च

॥ निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३०॥

केवलं मदाराधनानीति कृत्वा तत्फले निराशीस्तत एव तत्र कर्मणि ममतारहितो भूत्वा विगतज्वरो युद्धा
प्रयोजककर्त्ता दिकं कुरुष्व॥ स्वकीयेनात्मना कर्त्रा स्वकीयैरेव करणैः स्वाराधनैकप्रयोजनो भूत्वा परमपुरुषः सर्वसा
क्षी सर्वेश्वरः स्वयमेव कर्माणि कारयतीत्यनुसंधाय कर्मसु ममतारहितः प्राचीनानादिकालप्रवृत्तानंत
हृदितत्रविष्टः पापसंचयेन कथमहं भविष्यामीत्येवंभूतान्तर्ज्वरविनिर्मुक्तः परमपुरुष एव कर्मभिराराधितो बंधान्मोच
यिष्यतीति सुखेन स्मरन् कर्मयोगमेव कुरुष्वेत्यर्थः ॥३०॥ ॥ ॥

॥ श्री·भा·
॥ ३१ ॥

॥ तमीश्वराणां परमं महेश्वरं पतिं विश्वस्येत्यादि श्रुतिसिद्धं हि सर्वेश्वरत्वं सर्वज्ञोपि तं ईश्वरत्वं नियंतृत्वं पतित्वं च प अ· ३ ॥
रमपुरुषस्यैवेत्य यमेव साक्षादुपनिषत्सारभूतोर्थ इत्याह ॥ ये मे मतमिति ॥ ये मानवा आत्मनिश्रेयसशास्त्राधिकारिणः अ
यमेव शास्त्रार्थ इति निश्चित्य मे मतं निश्चित्य तथानुतिष्ठंति ॥ ये चाननुतिष्ठंतोपि अस्मिन् शास्त्रार्थे श्रद्दधाना भवंति ये चाश्रद्ध
धाना अपि एवं शास्त्रार्थो न संभवतीति नाभ्यसूयंति अस्मिन् महागुणे शास्त्रार्थे दोषदर्शिनो न भवंतीत्यर्थः ॥ ते सर्वे बंधहेतुभिरना
दिकालप्रारब्धैः सर्वैः कर्मभिर्मुच्यंते ते पि कर्मभिरिति अपि शब्दादेषां पृथक्करणं ॥ इदानीमननुतिष्ठंतोपि अस्मिन् शास्त्रार्थे श्र

॥ ये मे मतमिदं नित्यमनुतिष्ठंति मानवाः ॥ श्रद्धावंतोनसूयंतो मुच्यंते ते पि कर्मभिः ॥ ३१ ॥ ये त्वेतदभ्यसूयंतो नानुतिष्ठं
॥ ति मे मतं ॥ सर्वज्ञानविमूढांस्तान् विद्धि नष्टानचेतसः ॥ ३२ ॥ इदानीं त्वनसूयवः श्रद्धया चानसूयया च क्षीणपापा
अचिरेणैव तमेव शास्त्रार्थमनुष्ठाय मुच्यंत इत्यर्थः ॥ ३१ ॥ भगवद्विमतोपनिषदर्थमननुतिष्ठतामश्रद्दधानानामभ्य
सूयतां च दोषमाह ॥ ये त्वेतेन सर्वं मामवस्तुमच्छरीरतया मदाधारं मच्छेषभूतं मदेकप्रवर्त्यमिति मे मतं नानुतिष्ठंति नैव ऽंशभूतं
मनुसंधाय सर्वाणि कर्माणि कुर्वंते ॥ ये च न श्रद्दधते ये चाभ्यसूयंतो वर्तंते ॥ तान् सर्वेषु ज्ञानेषु विशेषेण मूढांस्तत एव न
ष्टानचेतसो विद्धि चेतः कार्यादिवस्तुयाथात्म्यनिश्चयः ॥ तदभावादचेतसः विपरीतज्ञानाः सर्वत्र विमूढांश्च ॥ ३२ ॥ ३१ ॥

एवं प्रकृतिसंसर्गेण गुणेष्वहं कर्तेत्यकर्तृत्वं च परमपुरुषायत्तमित्यनुसंधाय कर्मयोगयोग्येन ज्ञानयोग
योग्येन च कर्मयोगस्य सुशकत्वात् अप्रमादत्वात् अनुगतात्मज्ञानतया निरपेक्षत्वादितरस्य दुःशकत्वात् सप्रमा ज्ञानयोगस्य तु
दत्वाच्छरीरधारणाद्यर्थतया कर्मापेक्षत्वात् कर्मयोग एव कर्तव्यः ॥ व्यपदेश्यस्य तु विशेषतः स एव कर्तव्य
इति चोक्तं ॥ अतः परमध्यायशेषेण ज्ञानयोगस्य दुःशकतया सप्रमादतोच्यते सदृशमिति ॥ प्रकृतेर्विविक्त
मीदृशमात्मस्वरूपं तदेव सर्वदानुसंधेयमिति शास्त्राणि प्रतिपादयंतीति ज्ञानवानपि स्वस्याः प्रकृतेः प्राची

॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि ॥ प्रकृतिं यांति भूतानि नि ॥
॥ ग्रहः किं करिष्यति ॥ ३३ ॥ इंद्रियस्येंद्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ॥

नवासनायाः सदृशं प्राकृतविषयेष्वेव चेष्टते ॥ ततः प्रकृतिं यांति भूतानि तद्धि शिष्टजंतवोऽनादिका व्यवस्थित
लप्रवृत्तवासनामेव यांति ॥ तानि वासनानुयायीनि भूतानि शास्त्रकृतो निग्रहः किं करिष्यति ॥ ३३ ॥
प्रकृत्यनुयायित्वप्रकारमाह श्रोत्रादिज्ञानेंद्रियस्यार्थे शब्दादौ वागादिकर्मेंद्रियस्यार्थे वचनादौ च
प्राचीनवासनाजनिततत्तदनुभूयारूपो रागोवर्जनीयो व्यवस्थितः तदनुभवे प्रतिहते चावर्जनीयो द्वे

॥गी॰रा॰ प्यवस्थितः। तौ हि ज्ञानयोगाय यतमानं नियमितसर्वेंद्रियं स्ववशे कृत्वा प्रमथ्य स्वकार्ये नियोजयतः। तत अ॰३॥
॥३२॥ श्चायमात्मस्वरूपानुभवविमुखो विनश्यति॥ तयोर्न वशमागच्छेत् ज्ञानयोगारंभेण रागद्वेषवशमागत्य
न विनश्येत् तौ रागद्वेषौ सर्वस्य दुर्जयौ शत्रू आत्मज्ञानाभ्यासं वारयतः॥३४॥ अतः सुशकतया स्वधर्मभूतः
कर्मयोगो विगुणोऽप्यप्रमादगर्भः प्रकृतिसंसृष्टस्य दुःशकतया परधर्मभूतात् ज्ञानयोगात् स्वनुष्ठितादपि किंचित्का कोष्ठागते

॥ तयोर्न वशमागच्छेत्तौ ह्यस्य परिपंथिनौ॥३४॥ श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्॥
॥ स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥३५॥

लमनुष्ठितात्प्रमादाच्छ्रेयान् स्वेनैवोपादातुं योग्यतया
स्वधर्मभूते कर्मणि वर्तमानस्यैकस्मिन् जन्मन्यप्राप्तफलतया निधनमपि श्रेयः। अनंतरायानुवृत्ततया
नेतरज्जन्मन्यप्यव्याकुलकर्मयोगारंभसंभवात् प्रकृतिसंसृष्टस्य स्वेनैवोपादातुमशक्यतया परधर्मभूतो
ज्ञानयोगः सप्रमादगर्भतया भयावहः॥३५॥ ॥ अथार्थं ज्ञानयोगाय प्रवृत्तः पुरुषः स्वयं विषयान
नुभवितुमनिच्छन्नपि केन प्रयुक्तो विषयानुभवरूपं पापं बलान्नियोजित इवाचरति॥३६॥ ॥ ३२

(भूत) अर्जुन उ॰ अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः॥ अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः॥३६॥

इत्यस्य स्वरूपेण वर्तमानायेगुणमयमहंसाक्यासंसृष्टस्य -

अस्योर्द्ववाभिभवरूपेण वर्तमानगुणमयप्रकृतिसंसृष्टस्य प्रारब्धज्ञानयोगस्य रजोगुणसमुद्भवः प्रा
चीनवासनाजनितशब्दादिविषयविषयः कामो महाशनः शत्रुः सर्वविषयेष्वेनमाकर्षति। एष एव प्रतिहतगतिः ब्रह्मसकः
प्रतिहतिहेतुभूतचेतनान् प्रति क्रोधरूपेण परिणतो महापाप्मा परहिंसादिषु प्रवर्तयति॥ एनं रजोगुणसमु
द्भवं सहजं ज्ञानयोगविरोधिनं वैरिणं विद्धि॥३७॥ यथा धूमेन वह्निराव्रियते॥ यथादर्शो मलेन॥ यथा चो

भगवानुवाच॥ काम एष क्रोध एष रजोगुणसमुद्भवः॥ महाशनो महापाप्मा विध्येनमिह वैरिणं॥३७॥ धूमेनाव्रियते व
ह्निर्यथादर्शो मलेन च॥ यथोल्वेनावृतो गर्भस्तथा तेनेदमावृतं॥३८॥ आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा॥ का
मरूपेण कौंतेय दुःपूरेणानलेन च॥३९॥ इंद्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते॥ एतैर्विमोहयत्येष ज्ञानमावृत्य दे
हिनं॥४०॥
॥ ल्वेन गर्भस्तथा तेन कामेनेदं जंतुज्ञानमावृतं॥३८॥ आवरणप्रकारमाह॥ अस्य जंतोर्ज्ञानिनो ज्ञा
नस्वभावस्यात्मविषयं ज्ञानं एतेन कामाकारेण विषयव्यामोहजननेन नित्यवैरिणावृतं दुःपूरेण प्राप्त्यनर्हवि
षयेणानलेन च पर्याप्तिरहितेन॥३९॥ अनेकरूपकरणैरयं काम आत्मानमधितिष्ठतीत्याह॥ अधितिष्ठत्ये
भिरयं काम आत्मानमितींद्रियाणि मनो बुद्धिरस्याधिष्ठानं एतैरिंद्रियमनोबुद्धिभिः कामाधिष्ठानभूतैर्विष

 यप्रवणैर्देहिनंप्रकृतिसंसृष्टंज्ञानमावृत्यविमोहयति आत्मज्ञानविमुखंविषयानुभवपरंकरोतीत्यर्थः 
 ४०॥यस्मात्सर्वेंद्रियव्यापारोपरतिरूपेज्ञानयोगेप्रवृत्तस्यायंकामरूपशत्रुर्विषयाभिमुख्यकरणेनात्मनिवि
मुख्यंकरोतितस्मात्प्रकृतिसंसृष्टतयेंद्रियव्यापारप्रवणस्त्वमादौमोक्षोपायारंभसमयएवेंद्रियव्यापाररूपेक
र्मयोगेइंद्रियाणिनियम्यैनंज्ञानविज्ञाननाशनंआत्मस्वरूपविषयस्यज्ञानस्यविवेकविषयस्यविज्ञानस्यच
नाशनंपाप्मानंकामरूपंवैरिणंप्रजहिनाशय॥४१॥ज्ञानविरोधिषुप्रधानमाह॥ज्ञानविरोधिनांप्रधानानीं
[illegible]

॥तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ॥पाप्मानंप्रजहिह्येनंज्ञानविज्ञाननाशनं॥४१॥
॥इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः॥मनसस्तुपराबुद्धिर्योबुद्धेःपरतस्तुसः॥४२॥

ब्रह्मेतेषु इंद्रियाण्याहुः॥यतइंद्रियेषुविषयव्यापृतेष्वात्मनिज्ञानंनवर्त्तते॥इंद्रियेभ्यःपरंमनःइंद्रियेषूपरतेष्वपिमन
सिविषयप्रवणेआत्मज्ञानंनभवति॥मनसस्तुपराबुद्धिःमनसिविषयांतरविमुखेपिविपरीताध्यवसाय
प्रवृत्तायांबुद्धौनात्मज्ञानंप्रवर्त्तते॥सर्वेषुबुद्धिपर्यंतेषूपरतेष्वपीच्छामयोयःकामोरजःसमुद्भवोवर्त्ततेचेत
सएवैतानींद्रियादीन्यपिस्वविषयेवर्त्तयित्वात्मज्ञानंनिरुणद्धितदिदमुच्यतेयोबुद्धेःपरतस्तुसइति॥बुद्धे ३३॥

एवंबुद्धेरपिपरंकामंज्ञानविरोधिनंवैरिणंबुद्ध्वात्मानंमनआत्मनाबुद्ध्याकर्मयोगेवस्थाप्यैनंकामरूपं
दुरासदंशत्रुंजहिनाशयेति॥४३॥इतिश्रीमद्रामानुजाचार्यविरचितेगीताभाष्येतृतीयोऽध्यायः॥३॥
॥तृतीयेध्यायेप्रकृतिसंसृष्टस्यमुमुक्षोःसहसाज्ञानयोगानधिकारात्कर्मयोगएवकार्यःज्ञानयोगाधिका
रिणोप्यकर्तृत्वानुसंधानपूर्वकंकर्मयोगएवश्रेयानितिसहेतुकमुक्तं॥शिष्टतयाव्यपदेश्यस्यतुविशेषतः

एवंबुद्धेःपरंबुद्ध्वासंस्तभ्यात्मानमात्मना॥जहिशत्रुंमहाबाहोकामरूपंदुरासदं४३॥इतिश्रीभगवद्गी
तासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेकर्मयोगोनामतृतीयोऽध्यायः॥३॥श्री
भगवानुवाच॥इमंविवस्वतेयोगंप्रोक्तवानहमव्ययं॥विवस्वान्मनवेप्राहमनुरिक्ष्वाकवेब्रवीत॥१॥

कर्मयोगएवकार्यइतिचोक्तं॥चतुर्थेत्विदानीमस्यैवकर्मयोगस्यनिखिलजगदुद्धरणायमन्वंतरादा
वेवोपदिष्टतयाकर्त्तव्यतांद्रढयित्वांतर्गतज्ञानतयास्यैवज्ञानयोगाकारतांप्रदर्श्यकर्मयोगस्वरूपंतद्भे कर्मयोगस्यैव
दाःकर्मयोगेज्ञानांशस्यैवप्राधान्यंचेहोच्यते॥प्रसंगाच्चभगवदवतारयाथात्म्यमुच्यते॥योयंतवोदि
तोयोगःसकेवलंयुद्धप्रोत्साहनायेदानीमुदितइतिनमंतव्यः॥मन्वंतरादावेवनिखिलजगदुद्धरणायप नं

रमपुरुषार्थलक्षणमोक्षसाधनतयेमं योगमहमेव विवस्वते प्रोक्तवान विवस्वांश्च मनवे मनुरिक्ष्वाक
वे इत्येवं संप्रदायपरंपरयाप्राप्तमिमं योगं पूर्वे राजर्षयो विदुः समहता कालेन तत्तच्छ्रोतृबुद्धिमांद्याद्वि
नष्टप्रायोऽभूत ॥ स एवास्वविच्छिन्नस्वरूपः पुरातनो योगः सख्येनातिभक्त्या च मामेव प्रपन्नायाद्य ते मया प्रो तुभ्यम
क्तः सपरिकरः सविस्तरमुक्तमित्यर्थः ॥ मदन्येन केनापि ज्ञातुं वक्तुं वा न शक्यत इत्यत इदं वेदांतोदितमुत्तमं

॥ एवं परंपराप्राप्तमिमं राजर्षयो विदुः ॥ स कालेनेह महता योगो नष्टः परंतप ॥ २ ॥ स एवायं ॥
॥ मया तेऽद्य योगः प्रोक्तः पुरातनः ॥ भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमं ॥ ३ ॥
अर्जुन उवाच ॥ अपरं भवतो जन्म परं जन्म विवस्वतः ॥ ॥ ॥

रहस्यं ज्ञानं ॥ ३ ॥ अस्मिन्प्रसंगे भगवदवतारयाथात्म्यं यथावज्ज्ञातुं ॥ अर्जुन उवाच ॥ कालसंख्यया पर
मस्मत्जन्म समकालं हि भवतो जन्म विवस्वतस्तु जन्मकालसंख्यया परमष्टाविंशतिचतुर्युगसंख्यया सं
ख्याते ॥ त्वमादौ प्रोक्तवानिति कथमेतदसंभावनीयं विशेषेण यथार्थं जानीयां ननु जन्मांतरेणापि वक्तुं
शक्यं जन्मांतरवृत्तस्य महतां स्मृतिश्च युज्यत इति नात्र कश्चिद्विरोधः नचासौ वक्ता रमेनं वसुदेवतन ३४ ॥

यं सर्वेश्वरं न जानानीति यतः स एव वक्ष्यति ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान ॥ पुरुषं शाश्वतं दिव्यमित्या
दिना युधिष्ठिरराजसूयादिषु भीष्मादिभ्यश्चासकृच्छ्रुतं ॥ कृष्ण एव हि लोकानामुत्पत्तिरपि चाप्ययः ॥ कृष्ण
स्य हि कृते भूतमिदं विश्वं चराचरमित्येवमादिः कृष्णस्य कृते कृष्णस्य प्रयोजनभूतं कृत्स्नं जगदित्यर्थः ॥ अतोऽत्र
ते जानात्येवायं भगवंतं वसुदेवतनयं पार्थः जानतोऽप्यजानत इव पृच्छतोऽयमाशयः ॥ निखिलदोषशून्यनी
ककल्याणैकतानस्य सर्वेश्वरस्य सर्वज्ञस्य सत्यसंकल्पस्यावाप्तकामस्य कर्मपरवशदेवमनुष्यादिसजा०

॥ कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ॥ ४ ॥ श्रीभगवानुवाच ॥ बहू ॥
॥ नि मे व्यतीतानि जन्मानि तव चार्जुन ॥ तान्यहं वेद सर्वाणि न त्वं वेत्थ परंतप ॥ ५ ॥

तीयं जन्म किं ॥ मिंद्रजालवन्मिथ्या किं वा सत्यं सत्यत्वे च कथं जन्मप्रकारः किमात्मको देहः कश्च जन्महे
२ तुः कदा जन्म किमर्थं च जन्मेति परिहारप्रकारेण प्रश्नार्थो ज्ञायते ॥ ४ ॥ परिहरति ॥ बहूनीति ॥ अनेन जन्म
नः सत्यत्वमुक्तं बहूनि मे व्यतीतानि जन्मानीति वचनात ॥ तव चेति दृष्टांतोपादानाच्च ॥ ५ ॥ आत्मनोऽव
तारप्रकारं देहयाथात्म्यं जन्महेतुं चाह ॥ अजोऽपीति ॥ अजत्वाव्ययत्वसर्वेश्वरत्वादि सर्वं पारमैश्वर्यप्रका

पुरुष:

रमजहदेवस्वांप्रकृतिमधिष्ठायात्ममाययासंभवामि॥प्रकृतिंस्वभावंस्वमेवस्वभावमधिष्ठायस्वेनैवरू
पेणस्वेच्छयासंभवामीत्यर्थः॥स्वरूपंतुआदित्यवर्णंतमसःपरस्तात्क्षयंतमस्यरजसःपराकेयए
षोंतरादित्येहिरण्मयंतस्मिन्नयंपुरुषोमनोमयोमृतोहिरण्मयःसर्वेनिमेषाजज्ञिरेविद्युतःपुरुषाद
धिभारूपःसत्यसंकल्पआकाशात्मासर्वकर्मासर्वकामःसर्वगंधःसर्वरसःतस्यहैतस्यपुरुषस्यरूपंय
थामहारजनंवासइत्यादिश्रुतिसिद्धं॥आत्ममाययात्मज्ञानेनमायावयुनंज्ञानमितिनिघंटुक्तेर्ज्ञा

॥अजोपिसन्नव्ययात्माभूतानामीश्वरोपिसन्॥प्रकृतिंस्वामधिष्ठायसंभवाम्यात्ममायया॥६॥

नपर्यायोत्रमायाशब्दःतथाचाभियुक्तप्रयोगः॥माययासततंवेत्तिप्राचीनानांशुभाशुभमिति॥आत्मी
येनज्ञानेनात्मसंकल्पेनेत्यर्थः॥अतोपहतपाप्मत्वादिसमस्तकल्याणगुणात्मकत्वंसर्वमैश्वरंस्वभाव
मजहदेवस्वमेवरूपंदेवमनुष्यादिसजातीयसंस्थानंकुर्वन्नात्मसंकल्पेनदेवादिरूपःसंभवामितदि
दमाह॥अजायमानोबहुधाविजायतइतिश्रुतिः॥इतरपुरुषसाधारणंजन्मकुर्वन्देवादिरूपेणस्वसंक
ल्पेनोक्तप्रकारेणजायतइत्यर्थः॥बहूनिमेव्यतीतानिजन्मानितवचार्जुनतान्यहंवेद॥तदात्मानंसृजाम्य

हं जन्मकर्मचमेदिव्यमेवंयोवेत्तितत्त्वतइतिप्र
वांपराविरोधाच्च॥६॥



जन्मकालमाहयदायदाहीति॥नकालनियमोस्मत्संभवस्ययदायदाहिधर्मस्यवेदोदितस्यचातुर्वर्ण्य
चातुराश्रम्यव्यवस्थयावस्थितस्यकर्तव्यस्यग्लानिर्भवति॥यदाचतद्विपर्ययस्याधर्मस्याभ्युत्थानंतदाहमेव
स्वसंकल्पेनोक्तप्रकारेणात्मानंसृजामि॥७॥जन्मनःप्रयोजनमाह॥साधवउक्तलक्षणधर्मशीलावैष्ण
वाग्रेसराःमत्समाश्रयणेप्रवृत्तामन्नामकर्मस्वरूपाणामवाङ्मनसगोचरतयामद्दर्शनादृतेस्वात्मधारण
पोषणसुखमलभमानाअणुमात्रंकालमपियुगसहस्रंमन्वानाःप्रशिथिलांगाभवेयुरितितानतम

॥यदायदाहिधर्मस्यग्लानिर्भवतिभारत॥अभ्युत्थानमधर्मस्यतदात्मानंसृजाम्यहं॥७॥
॥परित्राणायसाधूनांविनाशायचदुःकृतां॥धर्मसंस्थापनार्थायसंभवामियुगेयुगे॥८॥

त्स्वरूपचेष्टितावलोकनालापादिदानेनतेषांपरित्राणायतद्विपरीतानांविनाशायचक्षीणस्यवैदिक
स्यधर्मस्यमदाराधनरूपस्याराध्यस्वरूपप्रदर्शनेनस्थापनायचदेवमनुष्यादिरूपेणयुगेयुगेसंभवा
मिकृतत्रेतादियुगविशेषनियमोपिनास्तीत्यर्थः॥८॥एवंकर्ममूलभूतहेयत्रिगुणप्रकृतिसंसर्गरूप
जन्मरहितस्यसर्वेश्वरत्वसर्वज्ञत्वसत्यसंकल्पत्वादिसमस्तकल्याणगुणगणोपेतस्यममसाधुपरित्राण

णमत्समाश्रयणैकप्रयोजनं दिव्यमप्राकृतं मदसाधारणं जन्म चेष्टितं च तत्त्वतो यो वेत्ति स वर्तमानं दे
हं परित्यज्य पुनर्जन्म नैति मामेव प्राप्नोति मदीयदिव्यजन्मचेष्टितयाथात्म्यज्ञानेन विध्वस्तसमस्तमत्समाश्र
यणविरोधिपाप्मास्मिन्नेव जन्मनि यथोदितप्रकारेण मामाश्रित्य मदेकप्रियो मदेकचित्तो मामेवाप्नोति ॥९॥
तदाह मदीयजन्मकर्मतत्त्वज्ञानाख्येन तपसा पूता बहव एव संवृत्ताः तथा च श्रुतिः ॥ तस्य धीराः परिजा सं॰ सिद्धाः
श्रुतेरभिप्रायः नंति योनिमिति ॥ धीरा धीमतामग्रेसरा एव तस्य जन्मप्रकारं जानंतीत्यर्थः ॥१०॥ ये यथा मामिति ॥ न केव

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ॥ त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन ॥९॥ वीतरागभयक्रोधा मन्मया मामु
पाश्रिताः ॥ बहवो ज्ञानतपसा पूता मद्भावमागताः ॥१०॥ ये यथा मां प्रपद्यंते तांस्तथैव भजाम्यहं ॥ मम वर्त्मानुवर्तंते मनुष्याः
पार्थ सर्वशः ॥११॥

लं देवमनुष्यादिरूपेणावतीर्य मत्समाश्रयणापेक्षपरित्राणं करोमि अपि तु मत्समाश्र
यणापेक्षा यथा येन प्रकारेण स्वापेक्षानुरूपं मां संकल्प्य प्रपद्यंते समाश्रयंते ॥ तान् प्रति तथैव तन्मनी
षितप्रकारेण भजामि मां दर्शयामि किमत्र बहुना सर्वे मनुष्या मदनुवर्तनैकमनोरथा मम वर्त्म मत्स्वभावं स
र्वं योगिनामवाङ्मनसगोचरमपि स्वकीयैश्चक्षुरादिकरणैः सर्वशः स्वापेक्षितैः सर्वप्रकारैरनुभूयानुवर्तंते ३६ ॥
॥११॥

इदानीं प्रासंगिकं परिसमाप्य प्रकृतस्य कर्मयोगस्य ज्ञानाकारताप्रकारं वक्तुं तथाविधकर्मयोगाधिका
रिणो दुर्लभत्वमाह ॥ कांक्षंत इति ॥ सर्व एव पुरुषाः कर्मणां फलं कांक्षमाणा इंद्रादिदेवताः यथाशास्त्रं यजं
ते आराधयंति ॥ न हि केचिदनभिसंहितफला इंद्रादिदेवतात्मभूतं सर्वयज्ञानां भोक्तारं मां यजंते कुत एतत्
यतः क्षिप्रमस्मिन्नेव मानुषे लोके कर्मजा पुत्रपश्वन्नाद्यसिद्धिर्भवति मनुष्यलोकशब्दः स्वर्गादिलोकप्रदर्श
नार्थः ॥ सर्व एव हि लौकिकाः पुरुषाः अक्षीणानादिकालप्रवृत्तानंतपापसंचयतयाऽविवेकिनः क्षिप्रफ

कांक्षंतः कर्मणां सिद्धिं यजंत इह देवताः ॥ क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्मजा ॥१२॥ चातुर्वर्ण्यं मया सृष्टं गुणक
र्मविभागशः ॥ तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययं ॥१३॥

लाभिकांक्षिणः पुत्रपश्वन्नाद्यस्वर्गाद्यर्थतया स
र्वाणि कर्माणि इंद्रादिदेवताराधनमात्राणि कुर्वते ॥ न तु कश्चित्संसारोद्विग्नहृदयो मुमुक्षुरुक्तलक्षणं कर्म
योगं मदाराधनभूतमारभत इत्यर्थः ॥१२॥ यथोक्तकर्मारंभविरोधिपापक्षयहेतुमाह ॥ चातुर्वर्ण्यमिति
चातुर्वर्ण्यप्रमुखं ब्रह्मादिस्तंबपर्यंतं कृत्स्नं जगत्सत्त्वादिगुणविभागेन तदनुगुणशमादिकर्मविभागेन च विभ
क्तं मया सृष्टं सृष्टिग्रहणं प्रदर्शनार्थं मयैव रक्ष्यते मयैवोपसंह्रियते तस्य विचित्रसृष्ट्यादेः कर्तारमप्यकर्तारं मां विद्धि ॥१३॥

कथमित्यत आह न मामिति ॥ यतस्मानि विचित्रसृष्ट्यादीनि न मां कर्माणि लिंपंति न बध्नंति न मत्स्वयुक्तानीमानि
देवमनुष्यादिवैचित्र्याणि किं तु सृज्यानां पुण्यपापकर्मविशेषप्रयुक्तानीत्यर्थः ॥ अतः पापापापविवेके
न विचित्रसृष्ट्यादेर्नाहं कर्ता यतः क्षेत्रज्ञाः सृष्टिलब्धकरणकलेवराः सृष्टिलब्धं भोग्यजातं फलसंगादिहेतु
भिः स्वकर्मानुगुणं भुंजते सृष्ट्यादिकर्मफलं च तेषामेव स्यादिति न मे स्पृहा तथा च सूत्रकारः वैषम्यनैर्घृण्ये न सा
पेक्षत्वात्तथाहि दर्शयति ॥ तथा चाह भगवान्पराशरः ॥ निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि प्रधानका

॥ न मां कर्माणि लिंपंति न मे कर्मफले स्पृहा ॥ इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ १४ ॥

रणीभूता यतो वै सृज्यशक्तयः ॥ निमित्तमात्रमुक्त्वैव नान्यत्किंचिदपेक्षते ॥ नीयते तपतां श्रेष्ठ स्वशक्त्या वस्तु
वस्तुतामिति सृज्यानां क्षेत्रज्ञानां सृष्टेः कारणं निमित्तमात्रमेवायं परमपुरुषः देवादिविचित्रभावस्य तु प्रधान
कारणं सृज्यभूतक्षेत्रज्ञानां प्राचीनकर्मशक्तय एव अतो निमित्तमात्रमुक्त्वा सृष्टेः कर्तारं परमपुरुषमुक्त्वेदं क्षे
त्रज्ञवस्तु देवादिविचित्रभावेनान्यदपेक्षते स्वगतप्राचीनकर्मशक्त्यैव देवादिवस्तुभावमुपनीयत इत्यर्थः ॥ ए
वमुक्तेन प्रकारेण सृष्ट्यादेः कर्तारमप्यकर्तारं स्पृहादिकर्मफलसंगरहितं च यो मामभिजानाति स कर्मभि

एवमिति ॥ एवं मां ज्ञात्वा विमुक्तपापैः पूर्वैरपि मुमुक्षुभिरुक्तलक्षणं कर्म कृतं तस्मात्त्वमुक्तप्रकारं मद्विष
यज्ञानविधूतपापः पूर्वैर्विवस्वन्मन्वादिभिः कृतं पूर्वतरं पुरातनं तदानीमेव मया लोके वक्ष्यमाणाकारं क
र्मैव कुरु ॥ १५ ॥ वक्ष्यमाणस्य कर्मणोऽज्ञाननतामाह ॥ किं कर्मेति ॥ मुमुक्षूणामनुष्ठेयं कर्म किं स्वरूपं ॥ अ
कर्म च किं फलाभिसंधिरहितं भगवदाराधनरूपं कर्म अकर्मेति कर्तुरात्मनो याथात्म्यज्ञानमुच्यते ॥ अनु

॥ एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ॥ कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतं ॥ १५ ॥
॥ किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ॥ तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १६ ॥

ष्ठेयं कर्म तदंतर्गतं ज्ञानं च किं स्वरूपमित्यर्थः ॥ अत्र कवयो विद्वांसोऽपि मोहिता यथावत्तथा न जानंति ए
वमंतर्गतज्ञानं यत्कर्म तद्वक्ष्यामि यज्ज्ञात्वानुष्ठायाशुभात्संसारबंधान्मोक्ष्यसे ॥ १६ ॥ कर्तव्यं कर्मज्ञा
नेऽननुष्ठानफलं कुतो स्य दुर्ज्ञानतेत्यत आह ॥ कर्मण इति ॥ यस्मान्मोक्षसाधनभूते कर्मणां स्वरूपे बोद्ध
व्यमस्ति विकर्मणि च नित्यनैमित्तिककाम्यरूपे तत्साधनद्रव्यार्जनद्वारेण विविधतामापन्नं कर्म विकर्म

॥ गी॰ भा॰

॥ ३७ ॥

क्षेत्रज्ञानां

वि॰ अं॰ १ अ॰ ४ श्लो॰ ५१२

परमपुरुषः

कर्तारं

परमात्मा

अ॰ ४ ॥

॥ २७

३७ ॥

कर्मणः

तस्मिन्नकर्मणि ज्ञाने च बोद्धव्यमस्ति॥ गहना दुर्ज्ञाना मुमुक्षोः कर्मणो गतिः॥ विकर्मणि बोद्धव्यं नित्य
नैमित्तिककाम्यद्रव्यार्जनादौ कर्मणि फलभेदकृतं वैविध्यं परित्यज्य मोक्षैकफलतयैकशास्त्रार्थत्वानुसंधा
नेनैकत्वं व्यवसायात्मिका बुद्धिरेकेत्यत्रैवोक्तमिति नेह प्रपंच्यते॥१७॥ कर्माकर्मणोर्बोद्धव्यमाह॥ कर्मणीति अ
कर्मज्ञानं नात्र कर्मेतरत्प्रस्तुतमात्मज्ञानमुच्यते॥ कर्मणि क्रियमाण एवात्मज्ञानं यः पश्येत् अकर्मणि चात्म
ज्ञाने वर्तमान एव यः कर्म पश्येत्॥ किमुक्तं भवति॥ क्रियमाणमेव कर्मात्मयाथात्म्यानुसंधानेन ज्ञानाकारं

॥ कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः॥ अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः॥१७॥
॥ कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः॥ स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत्॥१८॥

यः पश्येत् ज्ञानं कर्मण्यंतर्गतं तथा कर्माकारं यः पश्येदित्युक्तं भवति क्रियमाणे हि कर्मणि कर्तृभूतात्मयाथा
त्म्यानुसंधाने सति तदुभयं संपन्नं भवति॥ एवमात्मयाथात्म्यानुसंधानगर्भं कर्म यः पश्येत् स बुद्धिमान् कृत्स्न
शास्त्रार्थवित्॥ मनुष्येषु युक्तः मोक्षार्हः स एव कृत्स्नकर्मकृत् कृत्स्नशास्त्रार्थकृत्॥१८॥ ॥ ३८॥

॥ प्रत्यक्षेण क्रियमाणस्य कर्मणो ज्ञानाकारता कथमुपपद्यत इत्यत्राह॥ यस्येति यस्य मुमुक्षोः सर्वे
द्रव्यार्जनादिलौकिककर्मपूर्वकनित्यनैमित्तिककाम्यरूपकर्मसमारंभाः॥ कामवर्जिताः फलसंगरहिताः
संकल्पवर्जिताश्च प्रकृत्या तद्गुणैश्चात्मानमेकीकृत्यानुसंधानं संकल्पः॥ प्रकृतिवियुक्तात्मस्वरूपानुसं
फलसंकल्पाने धानयुक्ततया तद्रहिताः॥ तमेवं कर्म कुर्वाणं पंडितं कर्मांतर्गतात्मयाथात्म्यज्ञानाग्निना दग्धप्राचीनक

॥ यस्य सर्वे समारंभाः कामसंकल्पवर्जिताः॥
॥ ज्ञानाग्निदग्धकर्माणं तमाहुः पंडितं बुधाः॥१९॥
॥ त्यक्त्वा कर्मफलासंगं नित्यतृप्तो निराश्रयः॥
॥ कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति सः॥२०॥

र्माणमाहुः तत्त्वज्ञा अतः कर्मणो ज्ञानाकारत्वमुपपद्यते॥१९॥ एतदेव विवृणोति॥ त्यक्त्वेति॥ कर्मफलासं
गं त्यक्त्वा नित्यतृप्तो नित्ये स्वात्मन्येव तृप्तः निराश्रयः अस्थिरप्रकृतावाश्रयबुद्धिरहितः यः कर्माणि करो
ति सः कर्मण्यभिप्रवृत्तोऽपि नैव किंचित्करोति॥ कर्मापदेशेन ज्ञानाभ्यासमेव करोतीत्यर्थः॥२०॥

पुनरपिकर्मणोऽज्ञानाकारत्वंमन्वैवविशेषोध्यते॥निराशीरिति॥निराशीः निर्गतफलाभिसंधिः यतचित्ता
त्मानियतचित्तमनाः॥त्यक्तसर्वपरिग्रहः आत्मैकप्रयोजनतया प्रकृतिप्राकृतवस्तुनिर्ममतारहितोपाव
ज्जीवं केवलंशारीरमेवकर्मकुर्वन्नकिल्बिषंसंसारंनाप्नोति॥ज्ञाननिष्ठाव्यवधानरहितकेवलकर्मयोगेनै
वंरूपेणात्मानंपश्यतीत्यर्थः॥२१॥यदृच्छालाभेति॥यदृच्छोपपन्नशरीरधारणहेतुवस्तुसंतुष्टः द्वंद्वा

॥निराशीर्यतचित्तात्मात्यक्तसर्वपरिग्रहः॥शारीरंकेवलंकर्मकुर्वन्नाप्नोतिकिल्बिषं॥२१॥यदृच्छाला
॥भसंतुष्टोद्वंद्वातीतोविमत्सरः॥समःसिद्धावसिद्धौचकृत्वापिननिबध्यते॥२२॥गतसंगस्यमुक्तस्यज्ञा
॥नावस्थितचेतसः॥यज्ञायाचरतःकर्मसमग्रंप्रविलीयते॥२३॥

तीतः यावत्साधनसमाप्तिवर्जनीयद्वंद्वा
तीतःशीतोष्णादिसहः॥विमत्सरः अन्यकृतोपद्रवपरिपातहेतुभूतंस्वकर्मेतिनिरूपणेनपरेष्वपिविगतमत्सरः
समःसिद्धावसिद्धौचयुद्धादिकर्मसुजयादिसिध्यसिध्योःसमचित्तःकर्मैवकृत्वापिज्ञाननिष्ठांविनापिननि
बध्यतेनसंसारंप्रतिपद्यते॥२२॥गतसंगस्येति॥आत्मविषयज्ञानावस्थितमनस्त्वेनविगततदितरसंगस्या
तएवनिखिलपरिग्रहविमुक्तस्योक्तलक्षणस्य यज्ञादिकर्मनिर्वर्त्तयेवर्त्तमानस्यपुरुषस्यबंधहेतुभूतंप्रा



प्रकृतिवियुक्तात्मस्वरूपानुसंधानयुक्ततयाकर्मणोऽज्ञानाकारत्वमुक्तं॥इदानींसर्वस्यसपरिकरस्यकर्म
णः परब्रह्मस्वरूपपरमपुरुषात्मकत्वानुसंधानयुक्ततयाज्ञानात्मकत्वमाह॥ब्रह्मार्पणमिति॥ब्रह्मार्पण
मितिहविर्विशिष्यते॥अर्प्यतेनेनेत्यर्पणंस्रुगादिवस्तुतद्ब्रह्मकार्यत्वाद्ब्रह्मतथाहविर्पणंतद्ब्रह्मार्पणं
ब्रह्महविः स्वयंचब्रह्मभूतं॥ब्रह्मभूतेग्नौब्रह्मणाकर्त्राहुतमितिसर्वंब्रह्मात्मकत्वाद्ब्रह्ममयमितियःस
माधत्तेसब्रह्मकर्मसमाधिः तेनब्रह्मकर्मसमाधिनाब्रह्मैवगंतव्यंब्रह्मात्मकतयाब्रह्मभूतमात्मस्वरूपं

॥ब्रह्मार्पणंब्रह्महविर्ब्रह्माग्नौब्रह्मणाहुतं॥ब्रह्मैवतेनगंतव्यंब्रह्मकर्मसमाधिना॥२४॥दैवमेवापरे
॥यज्ञंयोगिनःपर्युपासते॥ब्रह्माग्नावपरेयज्ञंयज्ञेनैवोपजुह्वति॥२५॥

गंतव्यं॥मुमुक्षुणाक्रियमाणंक
र्मैवंब्रह्मात्मकमेवेत्यनुसंधानयुक्ततयाज्ञानाकारंसाक्षादात्मावलोकनसाधनंनैज्ञाननिष्ठाव्यवधा
नेनेत्यर्थः॥२४॥एवंकर्मणोऽज्ञानाकारतांप्रतिपाद्यकर्मयोगभेदानाह॥दैवमिति॥दैवंदेवार्चनरूपंय
ज्ञमपरेकर्मयोगिनःपर्युपासतेसेवंतेतत्रैवनिष्ठांकुर्वंतीत्यर्थः॥अपरेब्रह्माग्नौयज्ञंयज्ञेनैवोपजुह्व
ति॥यज्ञंयज्ञरूपंब्रह्मात्मकंआज्यादिद्रव्यंयज्ञेनयज्ञसाधनभूतेनस्रुगादिनाउपजुह्वतिहोमएवनिष्ठां

॥गी॰भा॰ कुर्वंति॥ अत्रयज्ञशब्दोहविः स्रुगादियज्ञसाधनेवर्त्तते॥ ब्रह्मार्पणंब्रह्महविरितिन्यायेनयागंहोममयो अ॰४॥
॥४०१ निष्ठांकुर्वंतीत्यर्थः॥२५॥ श्रोत्रादीनीति॥ अन्येयोत्रादीनामिंद्रियाणांसंयमनेवर्त्तंते॥ अन्येपियोगि
नः इंद्रियाणांशब्दादिप्रवणतानिवारणेप्रयतंते॥२६॥ अन्येज्ञानदीपितेआत्मसंयमयोगाग्नौसर्वाणीं
द्रियकर्माणिप्राणकर्माणिचजुह्वति॥ मनसाइंद्रियप्राणानांकर्मप्रवणतानिवारणेप्रयतंतइत्यर्थः
२७॥ द्रव्ययज्ञाइति॥ केचित्कर्मयोगिनोद्रव्ययज्ञाः न्यायतोद्रव्याण्युपादायदेवार्चनेप्रयतंते केचिद्

॥ श्रोत्रादीनींद्रियाण्यन्येसंयमाग्निषुजुह्वति॥ शब्दादीन्विषयानन्यइंद्रियाग्निषुजुह्वति॥२६॥ रु
॥ सर्वाणींद्रियकर्माणिप्राणकर्माणिचापरे॥ आत्मसंयमयोगाग्नौजुह्वतिज्ञानदीपिते॥२७॥
॥ द्रव्ययज्ञास्तपोयज्ञायोगयज्ञास्तथापरे॥ स्वाध्यायज्ञानयज्ञाश्चयतयः संशितव्रताः॥२८॥

द्वे दानेषुकेचिद्यागेषुकेचिद्धोमेषुएतेसर्वेद्रव्ययज्ञाः केचित्तपोयज्ञाः कृच्छ्रचांद्रायणोपवासादिषुनिष्ठां
कुर्वंति योगयज्ञाश्चापरेपुण्यतीर्थपुण्यस्थानप्राप्तिसिद्धयोगशब्दो कर्मनिष्ठानेदप्रकरणात्तद्विषयः के
चित्स्वाध्यायाभ्यासपराः॥ केचित्तदर्थज्ञानाभ्यासपराः॥ यतयोयतनशीलाः संशितव्रताः दृढसंकल्पाः॥२८॥ ॥४०॥
वेदाभ्यासपराः

अपानइति॥ अपरेकर्मयोगिनः प्राणायामेअनुष्ठानंकुर्वंतियेतेचत्रिविधाः पूरकरेचककुंभकभेदे
न॥ अपानेजुह्वतिप्राणमितिपूरकं॥ प्राणेपानमितिरेचकं॥ प्राणापानगतीरुद्ध्वाप्राणान्प्राणेषुजु
ह्वतीतिकुंभकं॥ प्राणायामपरेषुविशेषणत्रयप्रकृतेनियताहाराइति॥ सर्वइति॥ द्रव्ययज्ञप्रभृतिप्राणा
यामपर्यंतेषुकर्मयोगभेदेषुस्वसमीहितेषुप्रवृत्ताएतेसहयज्ञैः प्रजाः सृष्ट्वेत्यभिहितमहायज्ञपूर्वकनि

॥ अपानेजुह्वतिप्राणंप्राणेपानंतथापरे॥ प्राणापानगतीरुद्ध्वाप्राणायामपरायणाः॥२९॥
॥ अपरेनियताहाराः प्राणान्प्राणेषुजुह्वति॥ सर्वेप्येतेयज्ञविदोयज्ञक्षपितकल्मषाः॥३०॥
॥ यज्ञशिष्टामृतभुजोयांतिब्रह्मसनातनं॥ नायंलोकोस्त्ययज्ञस्यकुतोन्यः कुरुसत्तम॥३१॥

त्यनैमित्तिककर्मरूपयज्ञविदस्तन्निष्ठास्तेनएवक्षपितकल्मषाः यज्ञशिष्टामृतेनशरीरधारणंकुर्वंत
एवंकर्मयोगेव्यावृत्ताः सनातनंब्रह्मयांति॥ नायमिति॥ अयज्ञस्यमहायज्ञादिपूर्वकनित्यनैमित्तिककर्म
रहितस्यनायंलोकः प्राकृतलोकसंबंधिप्राकृतेषस्तियोधर्मार्थकामाख्यः पुरुषार्थः सनविद्यते॥ कुतोन्यो
मोक्षाख्यपुरुषार्थः परमपुरुषार्थतयामोक्षस्यप्रस्तुतत्वादितरपुरुषार्थोयंलोकइतिनिर्दिश्यतेसद्भिःप्राकृ
तः॥२९॥३०॥३१॥

एवं बहुप्रकाराः कर्मयोगा ब्रह्मणो मुखे वितताः ॥ आत्मयाथात्म्यावाप्तिसाधनतया स्थिताः तानुक्तल
क्षणानुक्तभेदान् कर्मयोगान् सर्वान् कर्मजान् विद्धि ॥ अहरहरनुष्ठीयमाननित्यनैमित्तिककर्मानुष्ठानजा
न्विद्धि ॥ एवं ज्ञात्वा यथोक्तप्रकारेणानुष्ठाय मोक्ष्यसे ॥ ३२ ॥ अनुगतज्ञानतया कर्मणो ज्ञानाकारत्वमुक्तं त
दंतर्गतात्मज्ञाने कर्मणि ज्ञानांशस्यैव प्राधान्यमाह ॥ श्रेयानिति ॥ उभयाकारे कर्मणि द्रव्यमयादंशाज्ज्ञा

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे ॥ कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा विमोक्ष्यसे ॥ ३२ ॥ श्रेयान्द्रव्यमयाद्यज्ञा
ज्ज्ञानयज्ञः परंतप ॥ सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ॥ ३३ ॥ तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ॥ उपदे
क्ष्यंति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥ ३४ ॥

नमयोंशः श्रेयान् ॥ सर्वं कर्म कृत्स्नमितस्य चाखिलस्योपादेयस्य
ज्ञाने परिसमाप्तेः ॥ तदेवं सर्वैः साधनैः प्राप्यभूतं ज्ञानं कर्मांतर्गतत्वेनाभ्यस्यमानं तदेवाभ्यस्यमानं क्रमेण
प्राप्यदशां प्रतिपद्यते ॥ ३३ ॥ तद्विद्धीति ॥ तदात्मविषयं ज्ञानमविनाशि तु तद्विद्धीत्यारभ्य एषा तेभिहि
तेत्यंतेन मयोपदिष्टं मदुक्तकर्मणि वर्तमानस्त्वं विपाकानुगुणकाले प्रणिपातपरिप्रश्नसेवाभिर्विशदा
कारं ज्ञानिभ्यो विद्धि साक्षात्कृतात्मस्वरूपास्तु ज्ञानिनः प्रणिपातादिभिः सेविताः ज्ञानबुभुत्सया परितः

[illegible] ॥४१॥



आत्मयाथात्म्यविषयस्य ज्ञानस्य साक्षात्काररूपस्य लक्षणमाह ॥ यज्ज्ञात्वेति ॥ यज्ज्ञानं ज्ञात्वा पुनरेवं
देहाद्यात्माभिमानरूपं तत्कृतममत्वास्पदं च मोहं न यास्यसि येन च देवमनुष्याद्याकारेणानुसंहितानि
सर्वाणि भूतानि स्वात्मन्येव द्रक्ष्यसि ॥ यतस्तवान्येषां च जीवानां प्रकृतिवियुक्तानां ज्ञानैकाकारतया सा
म्यं प्रकृतिसंसर्गदोषवियुक्तमात्मस्वरूपं सर्वं सममिति च वक्ष्यते निर्दोषं हि समं ब्रह्मेति ॥ अथो मयि स

॥ यज्ज्ञात्वा न पुनर्मोहमेवं यास्यसि पांडव येन भूतान्यशेषेण द्रक्ष्यस्या॥
॥ त्मन्यथो मयि ॥ ३५ ॥ अपि चेदसि पापेभ्यः सर्वेभ्यः पापकृत्तमः ॥ सर्वं ॥
॥ ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ३६ ॥

र्वाणि भूतान्यशेषेण द्रक्ष्यसि ॥ मत्स्वरूपसाम्या
च्च परिशुद्धस्यात्मवस्तुनः इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागता इति वक्ष्यते ॥ तदा विद्वान्पुण्यपापे
विधूय निरंजनः परमं साम्यमुपैतीत्येवमादिषु नामरूपविनिर्मुक्तस्यात्मनः परमं साम्यमवगम्यते अ
तः प्रकृतिविनिर्मुक्तं सर्वमात्मवस्तु परस्परं सर्वेश्वरेण च समं ॥ ३५ ॥ अपि चेदिति ॥ यद्यपि सर्वेभ्यः पाप
कृत्तमोसि तथापि सर्वं पुरार्जितं वृजिनरूपं समुद्रमात्मविषयज्ञानरूपेण प्लवेनैव संतरिष्यसि ॥ ३६ ॥

यथेति॥ सम्यक् प्रवृद्धोऽग्निरिंधनसमूहमिवात्मयाथात्म्यज्ञानरूपोऽग्निर्जीवात्मगतानादिकालप्रव
त्तानेककर्मसंचयान्भस्मीकरोति॥३७॥ नहीति॥ यस्मादात्मज्ञानेन सदृशं पवित्रं शुद्धिकरमिह जगति
वस्त्वंतरं न विद्यते तस्मादात्मज्ञानं सर्वं पापं नाशयतीत्यर्थः तत्तथाविधं ज्ञानं यथोपदेशमहरहरुपची

॥ यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरुतेऽर्जुन॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा॥३७॥
॥ नहि ज्ञानेन सदृशं पवित्रमिह विद्यते॥ तत्स्वयं योगसंसिद्धः कालेनात्मनि विंदति॥३८॥
॥ श्रद्धावाल्लभते ज्ञानं तत्परः संयतेंद्रियः॥ ज्ञानं लब्ध्वा परां शांतिमचिरेणाधिगच्छति॥३९॥

॥ यमानं ज्ञानाकारकर्मयोगेन
संसिद्धः कालेनात्मन्यात्मनिष्ठमेव लभते॥३८॥ तदेव स्पष्टमाह॥ श्रद्धावानिति॥ उपदिष्टज्ञाने दृढोऽस्मद्वा
वांस्तत्परस्तत्रैव नियमितमनास्तदितरविषयान्संयतेंद्रियोऽचिरेण कालेनोक्तलक्षणविपाकदशाप
न्नो ज्ञानं लभते॥ तथाविधं ज्ञानं लब्ध्वा परां शांतिमधिगच्छति परं निर्वाणं प्राप्नोति॥३९॥ ॥ ४२॥

अज्ञश्चेति॥ अज्ञ एवमुपदेशालब्धज्ञानरहितः॥ उपदिष्टज्ञानं श्रद्धापायेऽचाश्रद्दधानः॥ अत्वरमाणः॥ उप
दिष्टे च ज्ञाने संशयात्मा संशयितमना विनश्यति विनष्टो भवति॥ अस्मिन्नुपदिष्टे आत्मयाथात्म्यविषये ज्ञा
ने संशयात्मनोऽयमपि प्राकृतलोको नास्ति न च परः॥ धर्मकामादिपुरुषार्थाश्चात्र सिध्यंति कुतो मोक्ष इत्यर्थः
शास्त्रीयकर्मसिद्धिरूपत्वात्सर्वेषां पुरुषार्थानां शास्त्रीयकर्मजन्यसिद्धेश्च देहातिरिक्तात्मनिश्चयपूर्वकत्वात्

॥ अज्ञश्चाश्रद्दधानश्च संशयात्मा विनश्यति॥ नायं लोकोऽस्ति न परो न॥
॥ सुखं संशयात्मनः॥४०॥ योगसंन्यस्तकर्माणं ज्ञानसंछिन्नसंशयं॥
॥ आत्मवंतं न कर्माणि निबध्नंति धनंजय॥४१॥

अतः सुखलवभागित्वं संशयात्मनो न भवति॥४०॥ योगेति॥ यथोपदिष्टयोगेन संन्यस्तकर्माणं ज्ञाना
कारतापन्नकर्माणं यथोपदिष्टेन चात्मज्ञानेनात्मनि संछिन्नसंशयं आत्मवंतं मनस्विनमुपदिष्टार्थे स
दावस्थितमनसं बंधहेतुभूतप्राचीनानंतकर्माणि न निबध्नंतीति॥४१॥ ॥ ॥

तस्मादिति॥ तस्मादनाद्यज्ञानसंभूतं हृत्स्थमात्मविषयं संशयं मयोपदिष्टेनात्मज्ञानासिना छित्वा मयो
पदिष्टं कर्मयोगमातिष्ठ तदर्थमुत्तिष्ठ भारतेति॥४२॥ इति श्रीमद्रामानुजाचार्यविरचिते गीताभाष्ये चतुर्थो
ऽध्यायः॥ ४ ॥ चतुर्थेऽध्याये कर्मयोगस्य ज्ञानाकारतापूर्वकस्वरूपभेदो ज्ञानांशस्य च प्राधान्यमुक्तं ज्ञानयो
गाधिकारिणोपि कर्मयोगस्यांतर्गतात्मज्ञानत्वादप्रमादत्वात्सुकरत्वान्निरपेक्षत्वाच्च ज्यायस्त्वं तृतीय एव

॥तस्मादज्ञानसंभूतं हृत्स्थं ज्ञानासिनात्मनः॥ छित्त्वैनं संशयं योगमातिष्ठोत्तिष्ठ भारत॥४२॥ इति श्रीभगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे कर्मसंन्यासयोगो नाम चतुर्थोऽध्याय
॥४॥ अर्जुन उवाच॥ संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि॥ यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितं १

वोक्तं॥ इदानीं कर्मयोगस्यात्मप्राप्तिसाधनत्वे ज्ञाननिष्ठायाः श्रैष्ठ्यं कर्मयोगांतर्गताकर्तृत्वानुसंधानप्र
कारं च प्रतिपाद्य तन्मूलं ज्ञानं परिशोध्यते॥ संन्यासमिति कर्मणां संन्यासं ज्ञानयोगं पुनः कर्मयोगं च शंस
सि॥ एतदुक्तं भवति॥ द्वितीयेऽध्याये मुमुक्षोः प्रथमं कर्मयोग एव कार्यः कर्मयोगेन मृदितांतःकरणकषा
यस्य ज्ञानयोगेनात्मदर्शनं कार्यमिति प्रतिपाद्य पुनस्तृतीयचतुर्थयोर्ज्ञानाधिकारदशामापन्नस्यापि 

म

कर्मनिष्ठैव ज्यायसी सैव ज्ञाननिष्ठानिरपेक्षात्मप्राप्त्येकसाधनमिति कर्मनिष्ठां प्रशंससीति॥ तत्रैव ज्ञानयो
गकर्मयोगयोरात्मप्राप्तिसाधनभावे यदेकं सौकर्याच्छैघ्र्याच्च श्रेयः श्रेष्ठमिति सुनिश्चितं तन्मे ब्रूहि॥१॥ संन्या
सः ज्ञानयोगः कर्मयोगश्च ज्ञानयोगशक्तस्याप्युभौ निरपेक्षौ निःश्रेयसकरौ तयोस्तु कर्मसंन्यासाज्ज्ञानयो
गात्कर्मयोग एव विशिष्यते॥२॥ कुत इत्यत आह॥ ज्ञेय इति॥ यः कर्मयोगी तदंतर्गतात्मानुभवतृप्तस्तद्व्यति

भगवानुवाच॥ संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ॥ तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते २
ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न कांक्षति॥ निर्द्वंद्वो हि महाबाहो सुखं बंधात्प्रमुच्यते॥३॥ सांख्ययोगौ पृथ
ग्बालाः प्रवदंति न पंडिताः॥ एकमप्यास्थितः सम्यगुभयोर्विंदते फलं॥४॥ रिक्तं किमपि न कांक्षति॥ नत एव

किमपि न द्वेष्टि न त एव द्वंद्वसहः स सुनित्यसंन्यासी नित्यज्ञाननिष्ठ इति ज्ञेयः स हि सुकरकर्मयोगनिष्ठया सु
खं बंधात्प्रमुच्यते॥३॥ ज्ञानयोगकर्मयोगयोरात्मप्राप्तिसाधनभावेऽन्योन्यनैरपेक्ष्यमाह॥ सांख्ययोगावि
ति॥ ज्ञानयोगकर्मयोगौ फलभेदात्पृथग्भूतौ प्रवदंति ये ते बालाः अनिष्पन्नज्ञाना न पंडिताः अकृत्स्न
विदः कर्मयोगो ज्ञानयोगमेव साधयति॥ ज्ञानयोगस्त्वात्मावलोकनं साधयति॥ तयोः फलभेदेन पृथ

त्वं प्रवदंतो न पंडिता इत्यर्थः ॥ उभयोरात्मावलोकनैकफलयोरेकफलत्वेनैकमप्यास्थितस्तदेव फलं
लभते ॥४॥ एतदेव विवृणोति यदिति सांख्यैर्ज्ञाननिष्ठैर्यदात्मावलोकनरूपं फलं प्राप्यते तदेव कर्मयो
गनिष्ठैरपि प्राप्यते ॥ एवमेकफलत्वेनैकं वैकल्पिकं सांख्यं योगं च यः पश्यति स पश्यति स एव पंडित इत्य
र्थः ॥ इयांस्तु विशेष इत्याह ॥ ॥ संन्यासो ज्ञानयोगस्त्वयोगादृते प्राप्तुमशक्यः योगयुक्तः स्वयमेव मु
॥५॥

॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥
॥ एकं सांख्यं च योगं च यः पश्यति स पश्यति ॥५॥
॥ संन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः ॥
॥ योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति ॥६॥

॥ निरात्ममननशीलः सुखे
न कर्मयोगं साधयित्वा नचिरेणाल्पकालेनैव ब्रह्माधिगच्छत्यात्मानं प्राप्नोति ॥ ज्ञानयोगयुक्तस्तु म
हता दुःखेन ज्ञानयोगं साधयति ॥ दुःखसाध्यत्वात् दुःखप्राप्यत्वादात्मानं चिरेण प्राप्नोतीत्यर्थः ॥६॥ 

योगयुक्त इति ॥ योगयुक्तस्तु शास्त्रीये परमपुरुषाराधनरूपे विशुद्धे कर्मणि वर्त्तमानस्तेन विशुद्धात्मा
विशुद्धमनाः स्वाभ्यस्ते कर्मणि व्यापृतमनस्त्वेन सुखेन विजितमनास्तत एव विजितेंद्रियः कर्तुरात्म
नो याथात्म्यानुसंधाननिष्ठतया सर्वभूतात्मभूतात्मा सर्वेषां देवादिभूतानामात्मभूतः आत्मा यस्य असौ
सर्वभूतात्मभूतात्मा ॥ आत्मयाथात्म्यमनुसंदधानस्य हि देवादीनां स्वस्य चैकाकारत्वात् देवादिभेदानां

॥ योगयुक्तो विशुद्धात्मा विजितात्मा जितेंद्रियः ॥ सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥७॥
॥ नैव किंचित्करोमीति युक्तो मन्येत तत्त्ववित् ॥ पश्यन्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्गच्छन्स्वपन्श्वसन् ८ ॥

प्रकृतिपरिणामविशेषरूपतयात्माकारत्वासंभवात् प्रकृतिवियुक्तः सर्वत्र देवादिदेहेषु ज्ञानैका
कारतया समानाकार इति निर्दोषं हि समं ब्रह्मेत्यनंतरं वक्ष्यते स एवंभूतः कर्म कुर्वन्नप्यनात्मन्यात्मा
२ भिमानेन न लिप्यते ॥ अतो नचिरेणात्मानमाप्नोतीत्यर्थः अतः सौकर्याच्छैघ्र्याच्च कर्मयोग एव श्रेयान् ॥७॥

लेति। प्रलपन्निति

अनलद्देक्षितं शृणु ॥ एवमात्मतत्त्ववित् श्रोत्रादिज्ञानेंद्रियाणि वागादीनि कर्मेंद्रियाणि प्राणाश्च स्वस्वविष
येषु वर्तंत इति धारयन्ननुसंदधानो नाहं किंचित्करोमीति मन्येत ॥ ज्ञानैकस्वभावस्य मम कर्ममूलेंद्रियप्राण
संबंधकृतमीदृशं कर्तृत्वं न स्वरूपप्रयुक्तमिति मन्येतेत्यर्थः ॥९॥ ब्रह्मणीति ॥ ब्रह्मशब्देन प्रकृतिरिहोच्य ॥९॥
ते ॥ मम योनिर्महद्ब्रह्मेति वक्ष्यते ॥ इंद्रियाणां प्रकृतिपरिणामविशेषरूपत्वेनेंद्रियाकारेणावस्थितायां प्रकृ

॥ प्रलपन्विसृजन्गृह्णन्नुन्मिषन्निमिषन्नपि ॥ इंद्रियाणींद्रियार्थेषु वर्तंत इति धारयन् ॥९॥
॥ ब्रह्मण्याधाय कर्माणि संगं त्यक्त्वा करोति यः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥१०॥
॥ कायेन मनसा बुध्या केवलैरिंद्रियैरपि ॥ योगिनः कर्म कुर्वंति संगं त्यक्त्वात्मशुद्धये ॥११॥

तौ प्रलपन्नृ एवं नेत्यादिनोक्तप्रकारेण कर्माण्याधाय फलसंगं त्यक्त्वा नैव किंचित्करोमीति यः कर्माणि
करोति स प्रकृतिसंसृष्टतया वर्तमानोपि प्रकृत्यात्माभिमानरूपेण बंधहेतुना पापेन न लिप्यते यथा पद्म
पत्रमंभसा संसृष्टमपि न लिप्यते तथा ऽऽत्मा न लिप्यत इत्यर्थः ॥१०॥ कायेनेति ॥ कायमनोबुद्धींद्रियसाध्यं
कर्म स्वर्गादिफलसंगं त्यक्त्वा योगिन आत्मशुद्धये कुर्वंति आत्मगतप्राचीनकर्मबंधनविनाशाय कुर्वं ॥४५॥
तीत्यर्थः ॥११॥

युक्त इति ॥ युक्तः [illegible] आत्मव्यतिरिक्तफलेष्वचपलः ॥ आत्मैकप्रवणः कर्मफलं त्यक्त्वा केवलात्मशुद्ध्ये
कर्मानुष्ठानान्नैष्ठिकीं शांतिमाप्नोति स्थिरामात्मानुभवरूपां निर्वृतिं प्राप्नोति ॥ अयुक्तः आत्मव्यतिरिक्त
फलेषु चपलः आत्मावलोकनविमुखः कामकारेण फले सक्तः कर्माणि कुर्वन्नित्यं कर्मभिर्बध्यते नित्यं
संसारी भवति ॥ अतः फलसंगरहित इंद्रियाकारेण परिणतायां प्रकृतौ कर्माणि संन्यस्यात्मनो बंधमोच

॥ युक्तः कर्मफलं त्यक्त्वा शांतिमाप्नोति नैष्ठिकीं ॥ अयुक्तः कामकारेण फले सक्तो निबध्यते ॥१२॥
॥ सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ॥ नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ॥१३॥

नायैव कर्माणि कुर्वीत मुक्तं भवति ॥१२॥ अतो देहाकारेण परिणतायां प्रकृतौ कर्तृत्वसंन्यास उच्यते ॥ स
र्वेति ॥ आत्मनः प्राचीनकर्ममूलदेहसंबंधप्रयुक्तमित्यं कर्मणां कर्तृत्वं न स्वरूपप्रयुक्तमिति विवेक
विषयेण मनसा सर्वाणि कर्माणि नवद्वारे पुरे संन्यस्य वशी देही स्वयं देहाधिष्ठानममत्वमकुर्वन्देहं नैव
कारयन् सुखमास्ते ॥१३॥

साक्षादात्मनः स्वाभाविकं रूपत्वमाह ॥ न कर्तृत्वमिति ॥ अयस्य देवतिर्यङ्मनुष्यस्थावरात्मना प्रकृतिसंसर्गेण
वर्त्तमानस्य लोकस्य देवाद्यसाधारणं कर्तृत्वं देवाद्यसाधारणानि कर्माणि तत्कर्मजन्यदेवादिफलसंयोगं
चायं प्रभुरकर्मवश्यः स्वाभाविकात्मस्वरूपेणावस्थित आत्मा न सृजति नोत्पादयति किंतर्हि सृजति स्वभावस्तु प्रव
र्त्तते ॥ स्वभावः प्रकृतिवासना अनादिकालप्रवृत्तपूर्वकर्मजनितदेवाद्याकारप्रकृतिसंसर्गकृततत्तदात्मा
भिमानजनितवासनाकृतमीदृशं कर्तृत्वादिकं न स्वरूपप्रयुक्तमित्यर्थः ॥१४॥ नादत्त इति ॥ कस्यचित्संबंधि

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ॥ न कर्मफलसंयोगं स्वभावस्तु प्रवर्त्तते ॥१४॥ नादत्ते कस्यचित्पापं
नचैव सुकृतं विभुः ॥ अज्ञानेनावृतं ज्ञानं तेन मुह्यंति जंतवः ॥१५॥

तयाभिमतस्य पुत्रादेः पापं दुःखं नादत्ते
नापनुदति कस्यचित्प्रतिकूलतयाभिमतस्य सुकृतं सुखं नादत्ते नापनुदति यतोयं विभुः न कचित्के नचि
द्देवादिदेहेन साधारणदेहः अत एव न कस्यचित्संबंधी न कस्यचित्प्रतिकूलश्च सर्वमिदं वासनाकृतं ए
वं स्वभावस्य कथमियं विपरीतवासनोत्पद्यते तत्राह ॥ अज्ञानेनावृतं ज्ञानं ज्ञानविरोधिना पूर्वकर्मणा स्वफ
लानुभवयोग्यत्वाय स्वज्ञानमावृतं संकुचितं तेन ज्ञानावरणरूपेण पूर्वकर्मणा देवादिदेहयोगः तत्तदा

अ॰५॥ [illegible] ॥४६॥

सर्वं ज्ञानप्लवेनैव वृजिनं संतरिष्यसि ॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा ॥ न हि ज्ञानेन सदृशं पवि
त्रमिति पूर्वोक्तं स्वकाले संगमयति ॥ ज्ञानेनेति एवं वर्त्तमानेषु सर्वात्मसु येषामात्मनामुक्तलक्षणेनात्मया
थात्म्योपदेशजनितेनात्मविषयेणाहरहरभ्यासाधेयातिशयेन निरतिशयपवित्रेण ज्ञानेन तदज्ञानावरणमनादि
कालप्रवृत्तानंतकर्मसंचयरूपमज्ञानं नाशितं तेषां तत्स्वाभाविकं परं ज्ञानमपरिमितमसंकुचितमादित्य

॥ ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः ॥ तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परं ॥१६॥ तद्बुद्धयस्तदात्मा
॥ नस्तन्निष्ठास्तत्परायणाः ॥

वत्सर्वं यथावस्थितं प्रकाशयति तेषामादित्यवत् ज्ञानमिति विनष्टाज्ञानानां
बहुत्वाभिधानादात्मस्वरूपबहुत्वं न त्वेवाहं जातु नासं न त्वं नेमे इत्युपक्रमावगतमत्र स्पष्टतरमुक्तं नचे
दं बहुत्वमुपाधिकृतं विनष्टाज्ञानानामुपाधिगंधाभावात् तेषामादित्यवज्ज्ञानमिति व्यतिरेकनिर्देशात्
ज्ञानस्य स्वरूपानुबंधिधर्मत्वमुक्तं ॥ आदित्यदृष्टांतेन च ज्ञातृज्ञानयोः प्रभाप्रभावतोरिवावस्थानं च त
त एव च संसारदशायां ज्ञानस्य कर्मणा संकोचः मोक्षदशायां विकाशश्चोपपद्यते ॥१६॥ तद्बुद्धय इति ॥ तद्बु
द्धयस्तथाविधात्मदर्शनव्यवसायाः तदात्मानस्तद्विषयमनसः ॥ तन्निष्ठास्तदभ्यासनिरताः तत्परायणाः

 स्तदेव परमयनं प्रयोजनं येषां ते॥ एवमभ्यस्यमानेन ज्ञानेन निर्धूतकल्मषास्तथाविधमात्मानमपुनरावृत्तिं गच्छं 
ति यदवस्थात्मनः पुनरावृत्तिर्न विद्यते स ह्यात्माऽपुनरावृत्तिः स्वेन स्वरूपेणावस्थितः॥ तमात्मानं गच्छंतीत्य
र्थः॥१७॥ विद्याविनयसंपन्न इति॥ विद्याविनयसंपन्नब्राह्मणगोहस्तिश्वपाकादिषु अत्यंतविषमाका
रतया प्रतीयमानेषु आत्मसु पंडिताः आत्मयाथात्म्यविदो ज्ञानैकाकारतया सर्वत्र समदर्शिनः विषमाका

॥ गच्छंत्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषाः॥१७॥ विद्याविनयसंपन्ने ब्राह्मणे गवि हस्तिनि॥
॥ शुनि चैव श्वपाके च पंडिताः समदर्शिनः॥१८॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः॥
॥ निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः॥१९॥

रस्तु प्रकृतेर्नात्मनः॥ आत्मा तु सर्वत्र ज्ञानैकाकारतया सम इति पश्यंतीत्यर्थः॥१८॥ इहैवेति॥ इहैव सा
धनानुष्ठानदशायामेव तैः सर्गो जितः संसारो जितः येषामुक्तरीत्या सर्वेष्वात्मसु साम्ये स्थितं मनः॥ निर्दो
षं हि समं ब्रह्म प्रकृतिसंगदोषविमुक्ततया सममात्मवस्तु हि ब्रह्म आत्मसु साम्ये स्थिता श्चेत् ब्रह्मणि स्थि
ता एव ते ब्रह्मणि स्थितिरेव हि संसारजयः॥ आत्मसु ज्ञानैकाकारतया साम्यमनुसंदधाना मुक्ता एवेत्यर्थः 
१९

॥ येन प्रकारेणावस्थितस्य कर्मयोगिनः समदर्शनरूपो ज्ञानविपाको भवति तं प्रकारमुपदिशति न प्रहृ
ष्येदिति॥ यादृशदेहस्थस्य यदवस्थस्य प्राचीनकर्मवासनया यत्प्रियं यच्चाप्रियं तदुभयं प्राप्य हर्षोद्वेगौ
न कुर्यात्॥ कथं स्थिरायामात्मनि बुद्धिर्यस्य स स्थिरबुद्धिः असंमूढः अस्थिरेण शरीरेण स्थिरमात्मान
मेकीकृत्य संमोहः स नाम॥ तच्च कथं॥ ब्रह्मविद्ब्रह्मणि स्थितः॥ उपदेशेन ब्रह्मवित् संस्तस्मिन् ब्रह्मण्य
भ्यासयुक्तः एतदुक्तं भवति॥ तत्त्वविदामुपदेशादाविर्भूतात्मयाथात्म्यवित्तत्रैव यतमानो देहाभिमानं प

॥ न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियं॥ स्थिरबुद्धिरसंमूढो ब्रह्मविद्ब्रह्मणि स्थितः॥२०॥
॥ बाह्यस्पर्शेष्वसक्तात्मा विंदत्यात्मनि यत्सुखं॥ स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते॥२१॥

रित्यज्य स्थिररूपात्मावलोकनप्रियानुभवे व्यवस्थितोऽस्थिरे प्राकृते प्रियाप्रिये प्राप्य हर्षोद्वेगौ न कुर्यादि
ति॥२०॥ बाह्यस्पर्शेष्विति॥ एवमुक्तेन प्रकारेण बाह्यस्पर्शेष्वात्मव्यतिरिक्तविषयानुभवेष्वसक्तमनाः अं
तरात्मन्येव यः सुखं विंदति लभते स प्रकृताभ्यासं विहाय ब्रह्मयोगयुक्तात्मा ब्रह्माभ्यासयुक्तमना ब्रह्मानु
भवरूपमक्षयं सुखं प्राप्नोति॥२१॥ ॥ ॥

शक्तस्त्वबाह्यसुखस्पृहोऽस्य सुलभ नामाह॥ ये हीति॥ विषयेंद्रियस्पर्शजा ये भोगा दुःखयोनय एव ते दुःखोदर्का
आद्यंतवंतः अल्पकालवर्तिनश्चपलस्थं तेन तेषु बुध आत्मानुभवायार्हः सएव शरीरविमोक्षणोत्तरकालं विद्
मते॥२२॥ शक्नोतीति॥ शरीरमोक्षणात्प्रागिहैव साधनदशायामेवात्मानुभवप्रीत्या कामक्रोधोद्भवं वेगं सोढुं
निरोद्धुं यः शक्नोति स युक्तः॥ आत्मानुभवायार्हः सएव शरीरविमोक्षणोत्तरकालमात्मानुभवसुखं संपद्यते॥
२३॥ यदनिर्योन्नासविषयानुभवं सर्वं विहायांतःसुखः आत्मानुभवैकसुखः अंतराराम आत्मैकाधीनः रु

ये हि संस्पर्शजा भोगा दुःखयोनय एव ते॥ आद्यंतवंतः कौंतेय न तेषु रमते बुधः॥२२॥ शक्नोतीहैव यः सोढुं प्राक्शरीर
विमोक्षणात्॥ कामक्रोधोद्भवं वेगं स युक्तः स सुखी नरः॥२३॥ योंऽतःसुखोंऽतरारामस्तथांतर्ज्योतिरेव यः॥ स योगी ब्रह्मनि
र्वाणं ब्रह्मभूतोऽधिगच्छति॥२४॥ लभंते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः॥ छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः २५

गुणैरात्मैव सुखवर्द्धको यस्य स तथोक्तः तथांतर्ज्योतिरात्मैकज्ञानो यो वर्तते स ब्रह्मभूतो योगी ब्रह्मनिर्वाणमा
त्मानुभवसुखं प्राप्नोति॥२४॥ छिन्नद्वैधाः शीतोष्णादिद्वंद्वैर्विमुक्ताः॥ यतात्मानः आत्मन्येव नियमितमनसः स
र्वभूतहिते रताः आत्मवत्सर्वेषां भूतानां हितेष्वेव निरताः ऋषयः द्रष्टारः आत्मावलोकनपराः अत एवंभूता
स्ते क्षीणाशेषात्मप्राप्तिविरोधिकल्मषाः ब्रह्मनिर्वाणं लभंते॥२५॥ ४८॥

उक्तगुणानां ब्रह्मास्त्वं सुलभमित्याह॥ कामक्रोधवियुक्तानामिति॥ यतीनां यत्नशीलानां यतचेतसां नि
यमितमनसां जितात्मनां विविक्तमनसां ब्रह्मनिर्वाणमभितो वर्त्तते एवंभूतानां हस्तस्थं ब्रह्मनिर्वाणमित्य
र्थः॥२६॥ उक्तं कर्मयोगं स्वलक्ष्यभूतयोगशिरस्कमुपसंहरति॥ स्पर्शानिति द्वाभ्यां बाह्यान् विषयस्पर्शान्
बहिः कृत्वा बाह्येंद्रियव्यापारं सर्वमुपसंहृत्य योगयोग्यासने ऋजुकाय उपविश्य चक्षुर्भ्रुवोरंतरे नासाग्रे
विन्यस्य नासाभ्यंतरचारिणौ प्राणापानौ समौ कृत्वा उच्छ्वासनिःश्वासौ समगती कृत्वा॥ आत्मावलोक

॥ कामक्रोधवियुक्तानां यतीनां यतचेतसां॥ अभितो ब्रह्मनिर्वाणं वर्त्तते विदितात्मनां॥२६॥
॥ स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवांतरे भ्रुवोः॥ प्राणापानौ समौ कृत्वा नासाभ्यंतरचारिणौ॥२७॥
॥ यतेंद्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः॥ विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः॥२८॥

नादन्यत्र प्रवृत्त्यनर्हेंद्रियमनोबुद्धिः॥ अत एव विगतेच्छाभयक्रोधो मोक्षपरायणो मोक्षैकप्रयोजनो मुनिरा
त्मावलोकनशीलो यः सदा मुक्त एव सः साध्यदशायामिव साधनदशायामपि मुक्त एव स इत्यर्थः॥२७॥२८

॥गी०भा०॥ सर्वेषांलोकेश्वरेश्वराणांमपीश्वरम्। तमीश्वराणांपरमंमहेश्वरमितिश्रुतेः२९ अ०६॥

॥४९॥

रूपस्यनित्यनैमित्तिककर्मेतिकर्तव्यताकस्यकर्मयोगस्ययोगशिरस्कस्यसुशकतामाह॥भोक्तारमिति॥य
ज्ञतपसांभोक्तारं॥सर्वलोकमहेश्वरं णांपरमंमहेश्वरंसर्वभूतानांसुहृदंमांज्ञात्वाशांतिमृच्छतिकर्मयोगकरण
एवसुखमृच्छति॥सर्वलोकमहेश्वरंसर्वसुहृदंचमांज्ञात्वामदाराधनरूपेकर्मयोगएवसुखेनतत्रवर्त्ततइत्यर्थः
सुहृदामाराधनायहिसर्वेप्रवर्त्तंते॥२९॥इतिश्रीमद्रामानुजाचार्यविरचितेगीताभाष्येपंचमोऽध्यायः॥

॥भोक्तारंयज्ञतपसांसर्वलोकमहेश्वरं॥सुहृदंसर्वभूतानांज्ञात्वामांशांतिमृच्छति॥२९॥इतिश्रीभगवद्गीता
सूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेसंन्यासयोगोनामपंचमोऽध्यायः॥५॥श्रीभ
गवानुवाच॥अनाश्रितःकर्मफलंकार्यंकर्मकरोतियः॥ससंन्यासीचयोगीचननिरग्निर्नचाक्रियः॥१॥

५॥उक्तःकर्मयोगःसपरिकरःइदानींज्ञानयोगकर्मयोगसाध्यात्मावलोकनरूपयोगाभ्यासविधिरुच्यते॥त
त्रकर्मयोगस्यनिरपेक्षयोगसाधनत्वंद्रढयितुंज्ञानाकारकर्मयोगोयोगशिरस्कःप्रदर्श्यतेकर्मफलंस्वर्गा
दिकमनाश्रितःकार्यंकर्मकर्मानुष्ठानमेवकार्यंसर्वात्मनास्मत्सुहृद्भूतपरमपुरुषाराधनरूपतयाकर्मैवमम
प्रयोजनंतत्साध्यंनकिंचिदितियःकर्मकरोतिससंन्यासीचज्ञानयोगनिष्ठश्चयोगीचकर्मयोगनिष्ठश्च। ४९॥

आत्मावलोकनसाधनभूतोभयनिष्ठश्चननिरग्निर्नचाक्रियःचोदितयज्ञादिकर्मस्वप्रवृत्तः॥नकेवलं
ज्ञाननिष्ठः॥तस्यहिज्ञाननिष्ठैवकर्मयोगनिष्ठस्यतूभयमस्तीत्यभिप्रायः॥१॥उक्तलक्षणेकर्मयोगेज्ञानमप्य
स्तीत्याह॥यंसंन्यासमिति॥ज्ञानयोगइति॥आत्मयाथात्म्यज्ञानविदःप्राहुःतंकर्मयोगमेवविद्धि॥तदु
पपादयति॥नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चनेति॥आत्मयाथात्म्यानुसंधानेनानात्मनिप्रकृतावा
त्मसंकल्पःसंन्यस्तःपरित्यक्तोयेनससंन्यस्तसंकल्पःअनेवंभूतोयःसोऽसंन्यस्तसंकल्पःनह्युक्तेषुकर्म

॥यंसंन्यासमितिप्राहुर्योगंतंविद्धिपांडव॥नह्यसंन्यस्तसंकल्पोयोगीभवतिकश्चन॥२॥
॥आरुरुक्षोर्मुनेर्योगंकर्मकारणमुच्यते॥योगारूढस्यतस्यैवशमःकारणमुच्यते॥३॥

योगेष्वनेवंभूतःकश्चनकर्मयोगीभवति॥२॥यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताइत्युक्तंहिकर्मयोगएवा ६त्
प्रमादेनयोगंसाधयतीत्याह॥आरुरुक्षोरिति॥योगमात्मावलोकनंप्राप्तुमिच्छोर्मुमुक्षोःकर्मयोगएवकारण आत्मावलोकनमपिमु क्षसाधनम्॥
समाधिनिष्ठस्य मुच्यतेतस्यैवयोगारूढस्यप्रतिष्ठितयोगस्यशमःकर्मनिवृत्तिःकारणमुच्यते॥यावदात्मावलोकनरूपमोक्षप्रा
प्तिस्तावत्कर्मकार्यमित्यर्थः॥३॥

कदा प्रतिष्ठितयोगो भवतीत्यत्राह ॥ यदा हीति ॥ यदायं कर्मयोगी आत्मैकानुभवस्वभावतयाइंद्रियार्थेषा
त्मव्यतिरिक्तप्राकृतविषयेषु तत्संबंधिषु कर्मसु च नानुषक्तेन संगमर्हति ॥ तदा हि सर्वसंकल्पसंन्यासी योगा-
रूढ इत्युच्यते ॥ तस्मादारुरुक्षोर्विषयानुषंगवार्हतया तदनुषंगाभ्यासरूपः कर्मयोग एव निष्पत्तिकारणं अ-
तो विषयानुषंगाभ्यासरूपं कर्मयोगमेवारुरुक्षुः कुर्यादित्येवाह ॥ ४ ॥ उद्धरेदिति ॥ आत्मना मनसा विष-
याननुषक्तेनात्मानमुद्धरेत् ॥ विपरीतेन मनसा नात्मानमवसादयेत् ॥ आत्मैव मनः ह्यात्मनो बंधुस्तदेव

॥ यदा हि नेंद्रियार्थेषु न कर्मस्वनुषज्जते ॥ सर्वसंकल्पसंन्यासी योगारूढस्तदोच्यते ॥ ४ ॥
॥ उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ॥ आत्मैव ह्यात्मनो बंधुरात्मैव रिपुरात्मनः ॥ ५ ॥
॥ बंधुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ॥ अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥ ६ ॥

ह्यात्मनो रिपुः ॥ ५ ॥ येन पुरुषेण स्वेनैव स्वमनो विषयेभ्यो जितं तन्मनस्तस्य बंधुः ॥ अनात्मनः अजितमनसः स्व-
कीयमेव मनः स्वस्य शत्रुवत् शत्रुत्वे च वर्तेत स्वनिःश्रेयसविपरीते वर्तेत इत्यर्थः ॥ यथोक्तं भगवता पराशरे-
णापि मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ बंधस्य विषयासंगि मुक्त्यै निर्विषयं तथेति ॥ ६ ॥ ॥



योगारंभयोग्यावस्थोच्यते ॥ जितात्मन इति शीतोष्णसुखदुःखेषु मानापमानयोश्च जितमनसः विकार-
रहितमनसः प्रशांतस्य मनसि परमात्मा समाहितः सम्यगाहितः स्वरूपेणावस्थितः प्रत्यगात्मात्र पर-
मात्मेत्युच्यते तस्यैव प्रकृतत्वात् पारध्वत्वात् तस्यापि पूर्वपूर्वावस्थापेक्षया परमात्मत्वात् ॥ आत्मा परं स-
माहित इति वानुसंधेयः ॥ ७ ॥ ज्ञानेति ॥ ज्ञानविज्ञानतृप्तात्मा आत्मस्वरूपविषयेण ज्ञानेन तस्य च प्रकृति-

॥ जितात्मनः प्रशांतस्य परमात्मा समाहितः ॥ शीतोष्णसुखदुःखेषु तथा मानापमानयोः ॥ ७ ॥
॥ ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेंद्रियः ॥ युक्त इत्युच्यते योगी समलोष्टाश्मकांचनः ॥ ८ ॥

विसजातीयाकारविषयेण च विज्ञानेन तृप्तमनाः कूटस्थः देहाद्यवस्थास्वनुवर्तमानसर्वसाधारणज्ञानै-
काकारात्मनि स्थितः तत एव विजितेंद्रियः समलोष्टाश्मकांचनः प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृ-
तवस्तुविशेषेषु भोग्यत्वाभावात् लोष्टाश्मकांचनेषु समप्रयोजनो यः कर्मयोगी स युक्त इत्युच्यते ॥ आ-
त्मावलोकनरूपयोगाभ्यासार्ह उच्यते ॥ ८ ॥ ॥ ॥

सर्वाधिनिवृत्तः
संसारंभोधौ निमज्जयेत्
आत्मनः

॥गी०भा० ६ ॥५१॥ अ० ६॥

॥तथाहि॥ सुहृदिति॥ वयोविशेषानंगीकारेण हितैषिणः सुहृदः समवयसो हितैषिणो मित्राणि अर
यो निमित्तेनानर्थेच्छवः॥ उभयहेतुत्वाभावादुभयरहिता उदासीनाः जन्मत एवोभयरहिता मध्यस्थाः जन्म
त एवानिष्टेच्छवो द्वेष्याः॥ जन्मत एव हितैषिणो बंधवः साधवो धर्मशीलाः पापाः पापशीलाः आत्मैकत्र
योजनतया सुहृन्मित्रादिभिः प्रयोजनाभावाद्विरोधाभावाच्च तेषु समबुद्धिर्योगाभ्यासार्हत्वे विशिष्यते॥ ९

॥सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबंधुषु॥ साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते॥ ९॥
॥योगी युंजीत सततमात्मानं रहसि स्थितः॥ एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥ १०॥

॥योगीति॥ योगी उक्तप्रकारकर्मयोगनिष्ठः सततमहरहर्योगकाले आत्मानं युंजीत युक्तं कुर्वीत स्व
ज्ञाननिष्ठं कुर्वीतेत्यर्थः॥ रहसि जनवर्जिते निःशब्ददेशे स्थितः एकाकी तत्रापि न सद्वितीयः तत्रापि य
तचित्तात्मा यतचित्तमनस्कः॥ निराशीः आत्माभ्यासातिरिक्ते कुत्रापि वस्तुनि निरपेक्षः अपरिग्रहः तद
तिरिक्ते कस्मिंश्चिदपि ममतारहितः॥ १०॥ ५१॥

दार्वा

शुचाविति शुचौ देशे अशुचिभिः पुरुषैरपरिगृहीते अशुचिवस्तुभिरस्पृष्टे च पवित्रभूते देशे दर्भादिनि
र्मिते नात्युच्छ्रितं नातिनीचं कुशाजिनचैलोत्तरं आसनं प्रतिष्ठाप्य तस्मिन्मनः प्रसादकरे समाश्रयन् उपवि
श्य अव्याकुलं मनः कृत्वा सर्वात्मनोपसंहृतचित्तेंद्रियक्रियः आत्मशुद्धये बंधविमुक्तये योगं युंज्यात् आत्मा
त्मावलोकनं कुर्वीत ११ समनिति कायशिरोग्रीवं सममचलं समाश्रय तथा स्थिरं धारयन् दिशश्चानव
॥१२॥ प्रशांतात्मेति साथा

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं ११ तत्रैकाग्रं मनः कृत्वा
यतचित्तेंद्रियक्रियः उपविश्यासने युंज्याद्योगमात्मविशुद्धये १२ समं कायशिरोग्रीवं धारयन्नचलं स्थिरः सं
प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् १३ प्रशांतात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो
युक्त आसीत मत्परः १४ युंजन्नेवं सदात्मानं योगी नियतमानसः शांतिं निर्वाणपरमां मत्संस्थामधिगच्छति १५

लोकयन् स्वनासिकाग्रं प्रेक्ष्य प्रशांतात्मा अत्यंतनिर्मलमनाः विगतभीः ब्रह्मचर्ययुक्तो मनः संयम्य मच्चित्तो यु
क्तः अवहितात्मा मत्परः आसीत मामेव चिंतयन्नासीत १३ १४ एवं मयि परस्मिन् ब्रह्मणि पुरुषोत्तमे मनः
समाश्रयभूते सदात्मानं युंजन् नियतमानसः मत्स्पर्शपवित्रीकृतमानसतया निश्चलमानसः निर्वाणपरमां शांति

[illegible] साथा

॥गी॰भा॰६ ॥५२॥ एवमात्मयोगमारभमाणस्य मनोनैर्मल्यहेतुभूतां मनसो भगवति स्थैर्यस्थितिमभिधायान्यदपि योगो अ॰ ६॥
पकरणमाह॥ नात्यश्नत इति॥ अत्यन्तमनशनं योगविरोधि नित्यमतिविहारो विहारे च तथातिमात्रं स्वप्ने जा
गरे च तथा आयासानायासौ च॥१६॥ युक्तेति॥ मिताहारविहारस्य मितायासस्य मितस्वप्नावबोधस्य च सकल
दुःखहा बंधनाशनो योगः संपन्नो भवति॥१७॥ यदेति॥ यदा यस्य योजनविपर्ययं चित्तमात्मन्येव विनियतं वि

नात्यश्नतस्तु योगोऽस्ति न चैकांतमनश्नतः॥ न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन॥१६॥ युक्ताहारविहारस्य युक्तचेष्ट
स्य कर्मसु॥ युक्तस्वप्नावबोधस्य योगो भवति दुःखहा॥१७॥ यदा विनियतं चित्तमात्मन्येवावतिष्ठते॥ निःस्पृ
हः सर्वकामेभ्यो युक्त इत्युच्यते तदा॥१८॥ यथा दीपो निवातस्थो नेंगते सोपमा स्मृता॥ योगिनो यतचित्तस्य युंजतो योगमा

ज्ञेषेण नियंतं निरतिशययोजनतया तत्रैव नियतं निश्चलं भवति तिष्ठते तदा सर्वकामेभ्यो निःस्पृहः स युक्त इत्यु
च्यते योगारूढ इत्युच्यते॥१८॥ यथेति॥ निवातस्थो दीपो यथा नेंगते न चलति॥ अचलः सन्प्रभासयति एवं चि
त्तस्य निरस्तसकलेतरमनोवृत्तेर्योगिन आत्मनि योगं युंजत आत्मस्वरूपस्य सोपमा स्मृता निवातस्थ तथा नि
श्चलं सप्रभं दीपवन्निरस्तसकलेतरमनोवृत्तितया निश्चलं ज्ञानप्रभमात्मानं भासत इत्यर्थः॥१९॥ ५२॥

अभ्यासेन
यत्रेति योगसेवया हेतुना सर्वतो निरुद्धं चित्तं यत्र योगे तु परमते अतिशयितसुखमिदमेवेति रमते यत्र च योगे आ
एकाग्रतया
त्मना मनसा आत्मानं पश्यन्नात्मनि स्वे एवात्मन्येव तुष्यति॥२०॥ सुखमिति॥ यत्र तदतींद्रियमात्मबुद्ध्यैकग्रा
आत्यंतिकस्य सुखस्य दर्शनं ह्यमात्यंतिकं सुखं यं च योगे वेत्ति अनुभवति यत्र च योगे स्थितः सुखातिरेकेण तत्त्वतः तज्ज्ञावान्न चलति॥२० आत्यंतिकसुखस्यानुभवात्
यमिति॥ यं योगं लब्ध्वा तत्सम एव कोऽस्य मार्गो वा परं लाभं मन्यते यस्मिन्स्थ योगे स्थितोऽविरक्तोऽपि गुणवत्सु च वि

यत्रोपरमते चित्तं निरुद्धं योगसेवया॥ यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति॥२०॥ सुखमात्यंतिकं यत्तद्बुद्धिग्राह्य
मतींद्रियं॥ वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः॥२१॥ यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः॥ यस्मिन्स्थितो
न दुःखेन गुरुणापि विचाल्यते॥२२॥ तं विद्याद्दुःखसंयोगवियोगं योगसंज्ञितं॥ स निश्चयेन योक्तव्यो योगोऽनि
र्विण्णचेतसा॥२३॥ संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः॥ मनसैवेंद्रियग्रामं विनियम्य समंततः॥२४॥

दुःखसंयोगं
योगादिना गुरुणापि दुःखेन न विचाल्यते॥२२॥ तमिति॥ तं दुःखसंयोगस्य वियोगं यत्न नीकाकारं योगं ज्ञात्वा दुःखस्य संयोगः तस्य वियोगो यस्मात्तं
भिधेयं ज्ञानं विद्यात्॥ स एवंभूतो योग इत्याह मदाज्ञायां निश्चयेनाऽनिर्विण्णचेतसा दृढचेतसा योक्तव्यः॥२३॥
संकल्पेति॥ स्पर्शजाः संकल्पजाश्चेति द्विविधाः कामाः स्पर्शजाः शीतोष्णादयः॥ संकल्पजाः पुत्रपौत्रसे
अशेषत इति

चादयः॥ ततः संकल्पप्रभवान्स्वरूपेणैवत्यक्तुमशक्यांस्तान्सर्वान्मनसैवतदनन्वयानुसंधानेनसक्का
स्पर्शजेष्ववर्जनीयेषुतन्निमित्तहर्षोद्वेगौत्यक्त्वासमंततः सर्वस्माद्विषयात्सर्वमिंद्रियग्रामंविनियम्यशनैःश
नैर्धृतिगृहीतयाविवेकविषययाबुद्ध्यासर्वस्मादात्मव्यतिरिक्तादुपरम्यात्मसंस्थंमनःकृत्वानकिंचिदपिचिंत
येत॥२५॥ यतइति॥ चलस्वभावतयास्थिरंमनः यतोयतोविषयप्रावण्यहेतोर्निश्चरति॥ ततस्ततोमनोनि

॥शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया॥ आत्मसंस्थंमनःकृत्वानकिंचिदपिचिंतयेत॥२५॥ यतोयतोनिश्चरतिमनश्चं
चलमस्थिरं॥ ततस्ततोनियम्यैतदात्मन्येववशंनयेत॥२६॥ प्रशांतमनसंह्येनंयोगिनंसुखमुत्तमं॥ उपैतिशांतरजसंब्र
ह्मभूतमकल्मषं॥२७॥ युंजन्नेवंसदात्मानंयोगीविगतकल्मषः॥ सुखेनब्रह्मसंस्पर्शमत्यंतंसुखमश्नुते॥२८॥

यम्यात्मन्येवातिशयितसुखभावनयावशंनयेत॥२६॥ प्रशांतमनसं आत्मनिनिश्चलमनसंअतएवहेतोर्दग्धा प्रशांतेति
शेषकल्मषंततएवशांतरजसंब्रह्मभूतंस्वस्वरूपेणावस्थितमेनंयोगिनमात्मानुभवरूपमुत्तमंसुखमुपैतीतिहे
तोरुत्तमसुखरूपमात्मस्वरूपमुपैतीत्यर्थः॥२७॥ युंजन्निति॥ एवमुक्तप्रकारेणात्मानंयुंजंस्तेनविगतप्राचीनस मनः २ अन्यस्थले
मस्तकल्मषोब्रह्मसंस्पर्शंब्रह्मानुभवरूपंसुखमत्यंतमपरिमितंसुखेनानायासेनसदाश्नुते॥२८॥ ॥५३॥

अथयोगविपाकदशाचतुःप्रकाराउच्यंते॥ सर्वभूतस्थमिति॥ स्वात्मनःपरेषांचभूतानांप्रकृतिवियुक्तस्व
रूपाणांज्ञानैकाकारतयासाम्याद्वैषम्यस्यप्रकृतिगतत्वाद्योगयुक्तात्मा॥ प्रकृतिवियुक्तेष्वात्मसुसर्वत्रज्ञानै
काकारतयासमदर्शनः॥ सर्वभूतस्थंस्वात्मानंसर्वभूतानिचस्वात्मनीक्षते॥ सर्वभूतसमानाकारंस्वात्मानंस्वा
त्मसमानाकाराणिचसर्वभूतानिपश्यति॥ एकस्मिन्नात्मनिदृष्टेसर्वस्यात्मवस्तुनस्तत्साम्यात्सर्वमात्मवस्तुदृष्टंभ
वतीत्यर्थः॥ सर्वत्रसमदर्शनइतिवचनात्॥ योयंयोगस्त्वयाप्रोक्तः साम्येनेत्यनुभाषणाच्चनिर्दोषंहिसमंब्र

सर्वभूतस्थमात्मानंसर्वभूतानिचात्मनि॥ ईक्षतेयोगयुक्तात्मासर्वत्रसमदर्शनः॥२९॥ योमांपश्यतिसर्वत्रस
र्वंचमयिपश्यति॥ तस्याहंनप्रणश्यामिसचमेनप्रणश्यति॥३०॥

ह्मेतिवचनाच्च॥२९॥ योमामिति॥ ततोवि
पाकदशामापन्नोममसाधर्म्यमागतः निरंजनःपरमंसाम्यमुपैतीत्युच्यमानेसर्वस्यात्मवस्तुनोविधूतपु
ण्यपापस्यस्वरूपेणावस्थितस्यमत्साम्यंपश्यन्यःसर्वत्रात्मवस्तुनिमांपश्यतिसर्वमात्मवस्तुचमयिपश्यति
अन्योन्यसाम्यादन्यतरदर्शनेनान्यतरमपीदृशमितिपश्यतितस्यस्वात्मस्वरूपंपश्यतोहंतत्साम्यान्नप्रणश्या
मिनादर्शनमुपयामिममापिमांपश्यन्मत्साम्यात्स्वात्मानंमत्समवलोकयन्सनादर्शनमुपयाति॥३०॥

ततोपि विपाकदशामाह ॥ सर्वभूतस्थितमिति ॥ योगदृष्टाभ्यां सर्वभूतस्थितं मां मसंकुचितज्ञानैकाकारतया
एकत्वमास्थितः प्राकृतभेदपरित्यागेन स्वदृष्ट्या यो भजते स योगी ध्यानकालेपि यथा तथा वर्तमानः स्वात्मानं स
र्वभूतानि च पश्यन्नपि वर्तते मामेव पश्यति स्वात्मनि सर्वभूतेषु च सर्वदा समत्वमेव पश्यतीत्यर्थः ॥३१॥ ततोपि
काष्ठामाह ॥ आत्मौपम्येनेति ॥ आत्मनस्त्वान्येषां च आत्मना मसंकुचितज्ञानैकाकारतयौपम्येन साम्येन स्वात्म
नि चान्येषु सर्वत्र वर्तमानं सुखजन्मादिरूपं कर्त्वं तन्मरणादिरूपं च दुःखं समं संबंधसाम्यात् समं यः पश्यति पर

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ॥ सर्वथा वर्तमानोपि स योगी मयि वर्तते ॥३१॥ आत्मौपम्येन सर्वत्र
समं पश्यति योर्जुन ॥ सुखं वा यदि वा दुःखं स योगी परमो मतः ॥३२॥ अर्जुन उवाच ॥ योयं योगस्त्वया प्रो
क्तः साम्येन मधुसूदन ॥ एतस्याहं न पश्यामि चंचलत्वात् स्थितिं स्थिरां ॥३३॥

पुत्रजन्ममरणादिसमं स्वपुत्रजन्मम
रणादिवः पश्यतीत्यर्थः ॥ स योगी परमो योगकाष्ठां गतो मतः ॥३२॥ इदानीं अथ नेदानिक्रमनाशादौ एवं श्रुतं योग
माहात्म्यं यथावच्छ्रोतुमंतर्गतात्मज्ञानतया योगशिरस्कतया च कर्मयोगस्य माहात्म्यं तत्रोदितं तच्च योगमाहात्म्य
मेव पृच्छति ॥ योयंदेवमनुष्यादिभेदेन जीवेश्वरभेदेन चालं तन्निमित्तयैतावंतं कालमनुभूतेषु सर्वेषामस्य सुज्ञानैका
कारतया परस्परसाम्येनाकर्मवत्पश्यतया चेश्वरसाम्येन सर्वं च समदर्शनरूपो योगस्त्वया प्रोक्तः ॥ एतस्य यो

तथाह्यनवरताभ्यस्तविषयेष्वपि स्वत एव चंचलं पुरुषेणैकत्र स्थापयितुमशक्यं मनः पुरुषं बलात्स्वैरं परच्छ
यान्यत्र चरति तस्य स्वाभ्यस्तविषयेष्वपि चंचलस्वभावस्य मनसस्तद्विपरीताकारात्मनि स्थापयितुं विनिग्रहं
प्रतिकूलगतेर्महावातस्य व्यजनादिनेव सुदुःकरमहं मन्ये मनो निगृह्णो वायोरिव दुःशक्यः तस्तन्निग्रहोपा
योवक्तव्यस्त्वभिप्रायः ॥३४॥ चंचलस्वभावतया मनो दुर्निग्रहमेवेत्यत्र न संशयः अथाप्यात्मनो गुणा

चंचलं हि मनः कृष्ण प्रमाथि बलवद्दृढं ॥ तस्याहं निग्रहं मन्ये वायोरिव सुदुःकरं ॥३४॥ श्रीभगवानुवाच ॥ अ
सं संशयं महाबाहो मनो दुर्निग्रहं चलं ॥ अभ्यासेन तु कौंतेय वैराग्येण च गृह्यते ॥३५॥ असंयतात्मना योगो दुः
प्राप इति मे मतिः ॥ वश्यात्मना तु यतता शक्योवाप्तुमुपायतः ॥३६॥

कारत्वाभ्यासजनितात्मसुखेनात्म
व्यतिरिक्तेषु विषयेषु दोषाकारत्वदर्शनजनितवैतृष्ण्येन च कथंचिद्गृह्यते ॥३५॥ असंयतात्मनाजितम
नसा महतापि बलेन योगो दुःप्राप एव तदुपायतस्तु वश्यात्मना पूर्वोक्तेन मदाराधनरूपेणांतर्गतज्ञाने
न कर्मणा जितमनसा यतमानेनायमेव समदर्शनरूपो योगो वाप्तुं शक्यः ॥३६॥ अथ नेदानिक्रमनाशो स्वी
मादौ एवं श्रुतं योगमाहात्म्यं यथावच्छ्रोतुमर्जुनः पृच्छति ॥ अंतर्गतात्मज्ञानतया योगशिरस्कतया च कर्मयोग

अप्रवृत्तिरिति॰ कश्चिन्नेति॰ एतदिति॰ ... अप्रवृत्तिरित्यस्य नावाकीयां वत्

माहात्म्यं यत्त्वचोदितं तद्योगमाहात्म्यमेवेति त्रयमः॥ श्रद्धया योगे प्रवृत्तो दृढतराभ्यासरूपयत्नेनैव केवलेन योगसं
सिद्धिमप्राप्य योगाच्चलितमानसः कां गतिं गच्छति॥ उभयविभ्रष्टो ऽयं छिन्नाभ्रमिव कच्चिन्न नश्यति॥ यथा मेघखं
डः पूर्वस्मान्महतो मेघाच्छिन्नः परं महान्तं मेघमप्राप्य विनष्टो भवति तथैव कच्चिन्न नश्यतीति कथमुभयविभ्रष्टता
अप्रतिष्ठः विमूढो ब्रह्मणः पथीति॥ यथावस्थितस्वर्गादिसाधनभूतकर्मफलानि संधिरहितस्यास्य पुरुषस्य फलस्या

अर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमानसः॥ अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति॥ ३७॥ कच्चि
न्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति॥ अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि॥ ३८॥ एतन्मे संशयं कृष्ण छेत्तु
मर्हस्यशेषतः॥ त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥ ३९॥ श्रीभगवानुवाच॥ पार्थ नैवेह नामुत्र विनाशस्तस्य
विद्यते नहि कल्याणकृत्कश्चिद्दुर्गतिं तात गच्छति॥ ४०॥ ॥ धनत्वेन प्रतिष्ठानभवतीत्यप्रतिष्ठः॥ पक्कांते ब्रह्मणः

पथि विमूढस्तत्साधनात् त्रयमं प्रच्युतस्तु मयमप्रष्टतया किमयं नश्यत्येव तत न नश्यतीतमेतं संशयमशेषतः छेत्तु
मर्हसि त्वत्सकाशेण युगपत्सर्वैः सदा स्वत एव यत्न पतस्मत्तो ऽन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते॥ ३७॥ ३८॥ ३९॥ प्रवृत्तयो
गोपक्रांतस्य तस्मात् प्रच्युतस्येह चामुत्र च विनाशो न विद्यते प्राकृतस्वर्गादिभोगे ब्रह्मानुभवे चाभिलषितानवाप्तिरू
पः प्रत्यवायाख्यानिष्टावाप्तिरूपश्च विनाशो न विद्यत इत्यर्थः नहि निरतिशयकल्याणरूपयोगकृत्कश्चित्कालत्रये

दुर्गतिं गच्छतीत्यर्थः॥ प्रक्रांतीय भोगाकांक्षया योगात्प्रच्युतो ऽयमतिपुण्यकृतां लोकान् प्राप्य तत्र कांती
यानति कल्याणभोगान्ज्ञानोपाययोगमाहात्म्यादेवं भुंजानो यावत्तद्भोगतृष्णावसानं शाश्वतीः समास्तत्रो
षित्वा तस्मिन् भोगे वितृष्णः शुचीनां श्रीमतां योगोपक्रमयोग्यानां कुले योगोपक्रमभ्रष्टो योगमाहात्म्याज्जा
यते॥ ४१॥ परिपक्वयोगश्चलितश्चेद्योगिनां धीमतां योगं कुर्वतां स्वयमेव योगोपदेष्टॄणां कुले भवति तद्वेतद्

॥ प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः॥ शुचीनां श्रीमतां गेहे योगभ्रष्टो ऽभिजायते॥ ४१॥
॥ अथवा योगिनामेव कुले भवति धीमताम्॥ एतद्धि दुर्लभतरं लोके जन्म यदीदृशम्॥ ४२॥ तत्र॥
॥ तं बुद्धिसंयोगं लभते पौर्वदेहिकम्॥ यतते च ततो भूयः संसिद्धौ कुरुनंदन॥ ४३॥

प्रविधं योगयोग्यानां योगिनां च कुले जन्म लोके सर्वकृतानां दुर्लभतरमेतद्योगमाहात्म्यकृतं ४२ तत्र त
मिति॥ न च जन्म नित्यमेव पौर्वदेहिकं योगविषयैकबुद्धिसंयोगं लभते ततः सुप्तप्रतिबुद्धवद्भूयः संसिद्धौ
यतते यथा नान्तरायहतो भवति तथा यतते तेन पूर्वाभ्यासेन पूर्वेण योगविषयेणाभ्यासेन स योगभ्रष्टो
ऽवशोपि योग एव क्रियते प्रसिद्धं ह्येतद्योगमाहात्म्यमित्यर्थः॥ ४३॥

॥ गी॰ भा॰ ॥ जिज्ञासुरिति ॥ अप्रवृत्तयोगो योगे जिज्ञासुरपि तत्रस्खलितमानसः पुनरपि तामेव जिज्ञासां प्राप्य कर्मयोगा अ॰ ६ ॥
॥ ५६ ॥ दिकं योगमनुष्ठाय शब्दब्रह्मातिवर्तते ॥ शब्दब्रह्म देवमनुष्यान्तरिक्षस्वर्गादिशब्दाभिलापयोग्यं ब्रह्म प्रकृति
संबंधाद्विमुक्तो देवमनुष्यादिशब्दाभिलापानर्हं ज्ञानानन्दैकतानमात्मानं प्राप्नोतीत्यर्थः ॥ ४४ ॥ प्रयत्ना ६२
दिति ॥ यत एवं योगमाहात्म्यं ततोऽनेकजन्मार्जितपुण्यसंचयैः संशुद्धकिल्बिषः संसिद्धः संजातः प्र

॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः ॥ जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥ ४४ ॥
॥ प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः ॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिं ॥ ४५
॥ तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः ॥ कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६

त्नाद्यतमानस्तु योगी च जितोऽपि पुनः परां गतिं यात्येव ॥ ४५ ॥ अतिज्ञाय पुरुषार्थनिष्ठतया योगिनः स
र्वस्मादाधिक्यमाह ॥ तपस्विभ्य इति केवलं तपोनिर्यैः पुरुषार्थः साध्यते ॥ आत्मज्ञानव्यतिरिक्तैर्ज्ञानैश्च
यः यश्च केवलैरश्वमेधादिभिः कर्मभिः तेभ्यः सर्वेभ्योऽप्यधिकपुरुषार्थसाधनत्वात् योगस्य तपस्वि
भ्यः ज्ञानिभ्यश्च कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ॥ ४६ ॥ ॥ ॥ ५६ ॥

तदेवं परविद्यांगभूतं प्रजापतिवाक्योदितं प्रत्यगात्मदर्शनमुक्तं ॥ अथ परविद्यां प्रस्तौति योगिनामिति ॥ पं
चम्यर्थे षष्ठी सर्वभूतस्थमित्यादिना चतुर्विधा योगिनः प्रतिपादिताः तेषां अंतर्गतत्वाद्वक्ष्यमाणस्य योगिनो न
निर्धारणे षष्ठी भवति ॥ अपि सर्वेषामिति सर्वशब्दनिर्दिष्टास्तपस्विप्रभृतयः तत्राप्युक्तन्यायेन पंचम्यर्थो गृ
हीतव्यः योगिभ्योऽपि सर्वेभ्यो वक्ष्यमाणो योगी युक्ततमः तदपेक्षया वरत्वं तपस्विप्रभृतीनां योगिनां चानेक
श्छिद्रेपदस्यार्थः मोक्षापेक्षया विषयाणामिव यद्यपि विशिष्टेषु अन्योन्यन्यूनाधिकभावो विद्यते तथापि मो

॥ योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ॥ श्रद्धावान्भजते यो मां स मे युक्ततमो मतः ॥ ४७ ॥ इति श्रीभगव
द्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादेऽभ्यासयोगो नाम षष्ठोऽध्यायः ६ ॥

क्षापेक्षया वरत्वनिर्देशः समानः मेर्वपेक्षया सर्षपाणामिव यद्यपि सर्षपेषु अन्योन्यन्यूनाधिकभावो वि
द्यते तथापि मेर्वपेक्षया वरत्वनिर्देशः समानः मत्प्रियत्वातिरेकेणानन्यसाधारणस्वभावतया मद्ग
तेनान्तरात्मना मनसा बाह्याभ्यन्तरसकलवृत्तिविशेषाश्रयभूतं मनो मद्गतं यस्य ॥ अत्यर्थमत्प्रियत्वेन म
या विना स्वधारणालाभान्मद्गतेन मनसा श्रद्धावान् अत्यर्थमत्प्रियत्वेन तत्क्षणमात्रवियोगासहनतया म

स्त्वामिश्रद्धावान्भजते यो मां स भजत इति मां विचित्रानंतभोग्यभोगोपकरणभोगस्थानपरिपूर्णनिखि
लजगदुदयविभवलयलीलमस्पृष्टाशेषदोषमनवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः प्रभृत्यसं
ख्येयकल्याणगुणगणनिधिं स्वाभिमतानुरूपैकरूपाचिंत्यनित्याद्भुतनिरवद्यनिरतिशयौज्ज्वल्यसौंदर्यसौ
गंध्यसौकुमार्यलावण्ययौवनाद्यनंतगुणनिधिं दिव्यरूपं वाङ्मनसापरिच्छेद्यस्वरूपस्वभावमपारकारु
ण्यसौशील्यवात्सल्यौदार्यैश्वर्यमहोदधिमनालोचितविशेषाशेषलोकशरण्यं प्रणतार्तिहरमाश्रितवा
त्सल्यैकजलधिमखिलमनुजनयनविषयतां गतमजहत्स्वस्वभावं वसुदेवगृहे अवतीर्णमनवधिकातिशय
तेजसा निखिलजगद्भासयंतमात्मकांत्या विश्वमाप्याययंतं भजते सेवते उपास्ते स मे युक्ततमो मतः
स सर्वेभ्यः श्रेष्ठतम इति सर्वं सर्वदा यथावस्थितं स्वत एव साक्षात्कुर्वन्नहं मन्ये ॥४७॥ इति श्रीमद्रामानुजा
चार्यविरचिते गीताभाष्ये षष्ठोऽध्यायः ॥६॥ प्रथमेनाध्यायषट्केन परमप्राप्यभूतस्य परस्य ब्रह्मणो निर
वद्यस्य निखिलजगदेककारणस्य सर्वज्ञस्य सत्यसंकल्पस्य महाविभूतेः श्रीमतो नारायणस्य प्राप्त्युपाय
भूतं तदुपासनं वक्तुं तदंगभूतमात्मज्ञानपूर्वककर्मानुष्ठानसाध्यं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनमु
क्तं ॥ इदानीं मध्यमेन षट्केन परब्रह्मभूतपरमेश्वरस्वरूपं तदुपासनं च भक्तिशब्दवाच्यमुच्यते तदुत्तरत्र ५७॥

उपासनस्य भक्तिशब्दवाच्यत्वं

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्यारभ्य विमुच्य निर्ममः
शांतो ब्रह्मभूयाय कल्पते ॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते प
रामिति वक्ष्यति ॥ उपासनं तु भक्तिरूपमेवाभिहितं ॥ एतदेव परप्राप्त्युपायभूतमिति वेदांतवाक्यसिद्धं
तमेव विदित्वातिमृत्युमेति तमेवं विद्वानमृत इह भवतीत्यादिनाभिहितं वेदनं तु आत्मा वा अरे द्रष्टव्यः श्रोत
व्यो मंतव्यो निदिध्यासितव्यः ॥ आत्मानमेव लोकमुपासीत ॥ सत्त्वशुद्धौ ध्रुवा स्मृतिः स्मृतिलंभे सर्वग्रं
थीनां विप्रमोक्षः ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे
इति विवेकात् स्मृतिसंतानरूपं दर्शनसमानाकारं ध्यानमुपासनशब्दवाच्यमित्यवगम्यते ॥ पुनश्च ना
यमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन ॥ यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते
तनुं स्वामिति विशेषणांतरेणात्मना वरणीयताहेतुभूतं स्मर्यमाणविषयस्यात्यर्थप्रियत्वेन स्वयमप्य
त्यर्थप्रियरूपं स्मृतिसंतानमेवोपासनशब्दवाच्यमिति निश्चीयते तदेव हि भक्तिरित्युच्यते स्नेहपूर्वं ध्या
नं भक्तिरित्युच्यते बुधैरिति वचनात् ॥ अत एव तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यते ॥ ना
हं वेदैर्न तपसा न दानेन न चेज्यया ॥ शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा ॥ भक्त्या त्वनन्यया शक्य अ
हमेवं विधोऽर्जुन ॥

॥ गी· भा· ७ ॥ ॥ ५८ ॥ रा· १ ॥

ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतपेत्यनयोरेकार्थत्वं सिद्धं भवति ॥ तत्र सप्तमे तावदुपास्यभूतपरमपुरुषस्व
रूपयाथात्म्यं प्रकृत्या तत्तिरोधानं तन्निवृत्तये भगवत्प्रपत्तिरुपासकविधाभेदो ज्ञानिनः श्रैष्ठ्यं चोच्यते ॥ मयी
ति मय्याभिमुख्येनासक्तमनाः मत्प्रियत्वातिरेकेण मत्स्वरूपेण गुणैः चेष्टितेन मद्विभूत्या विश्लेषे सति तत्क्षणा
देव विशीर्यमाणस्वभावतया मयि सुगाढबद्धमनाः मदाश्रयस्तथा स्वयं च मया विना विशीर्यमाणतया मदाश्रयः
मदेकाधारः मद्योगं युञ्जन् योक्तुं प्रवृत्तो योगविषयभूतं मामसंशयं निःसंशयं समग्रं सकलं यथा ज्ञास्यसि येन

॥ मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ॥ असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ॥ १

॥ ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः ॥ यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते ॥ २ ॥

ज्ञानेनोक्तेन ज्ञास्यसि तज्ज्ञानमवहितमनाः शृणु ॥ १ ॥ ज्ञानमिति ॥ अहं च ते मद्विषयमिदं ज्ञानं विज्ञानेन सह
अशेषतो वक्ष्यामि विज्ञानं विविक्ताकारविषयं ज्ञानं ॥ यथाहं मद्व्यतिरिक्तात्समस्तचिदचिद्वस्तुजातान्निखिल
हेयप्रत्यनीकतयानवधिकातिशयासंख्येयकल्याणगुणगणानन्तमहाविभूतितया च विविक्तः तेन विविक्तविष
यज्ञानेन सह मत्स्वरूपज्ञानं वक्ष्यामि किं बहुना यज्ज्ञानं ज्ञात्वा मयि पुनरन्यज्ज्ञातव्यं नावशिष्यते ॥ २ ॥ ५८ ॥

॥ वक्ष्यमाणज्ञानस्य दुष्प्रापतामाह ॥ मनुष्याणामिति ॥ मनुष्याः शास्त्राधिकारयोग्यास्तेषां सहस्रेषु क
श्चिदेव सिद्धिपर्यन्तं यतते सिद्धिपर्यन्तं यतमानानां सहस्रेषु कश्चिदेव मां विदित्वा सिद्धये यतते मद्विदां सहस्रे
षु कश्चिदेव तत्त्वतो यथावस्थितं मां वेत्ति न च कश्चिदित्यभिप्रायः स महात्मा सुदुर्लभः मां तु वेद न कश्च
नेति वक्ष्यते ॥ ३ ॥ अस्य विचित्रानन्तभोग्यभोगोपकरणभोगस्थानरूपेणावस्थितस्य जगतः प्रकृतिरियं गंधा

॥ मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ॥ यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥ ३ ॥
॥ भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥
॥ अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ॥ जीवभूतां महाबाहो ययेदं धार्यते जगत् ॥ ५ ॥

दिगुणक पृथिव्यप्तेजोवाय्वाकाशरूपेण मनः प्रभृतीन्द्रियरूपेण च महदहंकाररूपेण चाष्टधा भिन्ना मदीये
ति विद्धि ॥ ४ ॥ अपरेयमिति ॥ इयं ममापरा प्रकृतिः इतस्त्वन्यामितोऽचेतनायाश्चेतनभोग्यभूतायाः प्रकृ
तेर्विजातीयाकारां जीवभूतां परां तस्या भोक्तृत्वेन प्रधानभूतां चेतनरूपां मदीयां प्रकृतिं विद्धि ययेदमचेतनं
कृत्स्नं जगद्धार्यते ॥ ५ ॥

त्वमिति शेषः

शुद्धजीवविषयं

भूम्यादीति

एतच्चेतनाचेतनसमष्टिरूपमदीयप्रकृतिद्वययोनीनि ब्रह्मादिस्तंबपर्यंतानि उच्चावचभावेनावस्थिता-
नि चिदचिन्मिश्राणि सर्वाणि भूतानि मदीयानीत्युपधारय मदीयप्रकृतिद्वययोनि निहितानि मदीयान्येव तथा प्र-
कृतिद्वययोनित्वेन कृत्स्नस्य जगतस्तयोर्द्वयोरपि मद्योनित्वेन मदीयत्वेन च कृत्स्नस्य जगतोऽहमेव प्र-
भवः अहमेव प्रलयः अहमेव शेषी (स्वामी) इत्युपधारय ॥ एतयोश्चिदचित्समष्टिभूतयोः प्रकृतिपुरुषयोरपि पर

॥ एतद्योनीनि भूतानि सर्वाणीत्युपधारय ॥ अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥ ६ ॥

(प्रकृते)
मपुरुषयोर्नित्यं प्रकृतिस्मृतिसिद्धं महानव्यक्ते लीयते अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः (महत्प्रकृतौ)
(महपुरुषे मद्देवेन भवति) परे देव एकीभवति विष्णोः स्वरूपात्परतो हि ते द्वे रूपे प्रधानं पुरुषश्च विप्र ॥ प्रकृतिर्या मयाख्याता व्यक्ता- (अमे)
व्यक्तस्वरूपिणी पुरुषश्चाप्युभावेतौ लीयेते परमात्मनि ॥ परमात्मा च सर्वेषामाधारः परमेश्वरः विष्णुना-
मा स वेदेषु वेदांतेषु च गीयते इत्यादिका हि श्रुतिस्मृतयः ॥ ६ ॥ ॥ ॥ ५९ ॥

मत्तः परतरं नान्यदिति यथा सर्वकारणस्यापि प्रकृतिद्वयस्य कारणत्वेन सर्वाचेतनवस्तुशेषिणश्चेतनस्या-
पि शेषित्वेन कारणतया शेषितया चाहं परतरस्तथा ज्ञानशक्तिबलादिगुणयोगेन चाहमेव परतरः मत्तो-
न्यन्मद्व्यतिरिक्तं किंचित् ज्ञानबलादिगुणांतरयोगि परतरं नास्ति सर्वमिदं चिदचिद्वस्तुजातं कार्यावस्थं का-

॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥
मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ७ ॥

(सूत्रवर्मितेन)
रणावस्थं च मच्छरीरभूतं सूत्रे मणिगणवदात्मतयावस्थिते मयि प्रोतं आश्रितं ॥ यस्य पृथिवी शरीरं यस्य
आत्मा शरीरं एष सर्वभूतांतरात्मापहतपाप्मा दिव्यो देव एको नारायण इत्यात्मशरीरभावेनावस्था-
नं जगद्ब्रह्मणोरंतर्यामिब्राह्मणादिषु प्रसिद्धं ॥ ७ ॥ पुराले स्वकधारि वदे हे आद्यात्मे स्थाराम ॥ तं तत्वर्थ मित्राभातेमासिकं ॥

नित्यमहं त्रिभिर्निबन्धनौ ह्यात्मानो नैकस्मिन्नपि पृथिव्यां समानाधिकरण्यम्

॥ गी॰ भा॰ ७ परमपुरुषस्य अतः सर्वस्य परमपुरुषशरीरत्वेनात्मभूतपरमपुरुषप्रकारत्वात् सर्वप्रकारः परमपुरुष एवावस्थित इति सर्वैः अ॰ ७ ॥
॥ ६० ॥ शब्दैस्तस्यैवाभिधानमिति तत्सामानाधिकरण्येनाहं रसोऽहमिति चतुर्भिः एते सर्वे विलक्षणा भावा मत्त ए
वोत्पन्ना मच्छेषभूता मच्छरीरतया मय्येवावस्थितास्ततस्तत्प्रकारोऽहमेवावस्थितः किं विशिष्याभिधीयते ॥ ८ ॥

॥ रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्ययोः ॥ प्रणवः सर्ववेदेषु शब्दः खे पौरुषं नृषु ॥ ८ ॥ पुण्यो ॥
॥ गन्धः पृथिव्यां च तेजश्चास्मि विभावसौ ॥ जीवनं सर्वभूतेषु तपश्चास्मि तपस्विषु ॥ ९ ॥ बीजं मां स ॥
॥ र्वभूतानां विद्धि पार्थ सनातनं ॥ बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहं ॥ १० ॥ बलं बलवतां चा ॥
॥ हं कामरागविवर्जितं ॥ धर्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ॥ ११ ॥ ये चैव सात्त्विका भावा राजसा ॥
॥ स्तामसाश्च ये ॥ मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ॥ १२ ॥ ॥ १० ॥ ११ ॥ ये इति सात्त्विका राजसास्तामसा

श्च जगति देहत्वेनेन्द्रियत्वेन भोग्यत्वेन तत्तद्धेतुत्वेन चावस्थिता ये भावास्तान् सर्वान्मत्त एवोत्पन्नान् विद्धि ते मच्छ
रीरतया मयि स्थिता इति च न त्वहं तेषु नाहं कदाचिदपि तदायत्तस्थितिः ॥ अन्यत्रात्मायत्तस्थितित्वेऽपि शरीरस्य
शरीरेणात्मनोऽवस्थितावपि प्रकारो विद्यते मम तु तैर्न कश्चित्तथाविधप्रकारः केवलं लीलैव प्रयोजनमित्यर्थः ॥ १२ ॥ ६० ॥

त्रिभिर्गुणमयैरिति ॥ तदिदं चेतनाचेतनात्मकं कृत्स्नं जगत् मदीयं मत्त एवोत्पद्यते मयि प्रलीयते मय्येवा
वस्थितं मच्छरीरभूतं मदात्मकं चेत्यहमेव कार्यावस्थायां कारणावस्थायां च सर्वशरीरतया सर्वप्रकारो
ऽवस्थितः अतः कारणत्वेन शेषित्वेन च ज्ञानाद्यसंख्येयकल्याण गुणैश्चाहमेव सर्वैः प्रकारैः पर
तरो मत्तोऽन्येन केनापि कल्याणगुणेन परतरं न विद्यते एवंभूतं मां तेभ्यः सात्त्विकराजसतामसेभ्यो भावे
भ्यः परं मदसाधारणैः कल्याणगुणैस्तद्भोग्यताप्रकारैश्च परं कृत्स्नमन्यमव्ययं सदैकरूपमपि तैरेव त्रि

॥ त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ॥ मोहितं नाभिजानाति मामेभ्यः परमव्ययं ॥ १३ ॥

भिर्गुणमयैर्हीनतरैः क्षणविध्वंसिभिः पूर्वकर्मानुगुणदेहेन्द्रियभोग्यत्वेनावस्थितैः पदार्थैर्मोहितं देव
तिर्यङ्मनुष्यस्थावरात्मनावस्थितं त्रिजगदिदं नाभिजानाति ॥ १३ ॥ कथं स्वत एवानधिकातिशयानन्दं नि न
त्यसदैकरूपं लौकिकवस्तुभोग्यताप्रकारैश्चोत्कृष्टतमं त्वयि स्थितेऽप्यत्यन्तविहीनेषु गुणमयेषु क्षयिषु
भावेषु सर्वस्य भोक्तृवर्गस्य भोग्यत्वबुद्धिरुपजायते इत्यत्राह ॥ दैवीति ॥ ममैषा गुणमयी सत्त्वरजस्त
मोमयी माया स्याद्धि दैवी देवेन क्रीडाप्रवृत्तेन मयैव निर्मिता तस्मात् सर्वैर्दुरत्यया तदुरतिक्रमा ऽस्या माया

शब्दवाच्यत्वमासुरराक्षसशस्त्रास्त्रादीनामिव विचित्रकार्यकरत्वेन यथा च ततो भगवता तस्य रक्षार्थं चक्रमु
त्तमं॥ आजगाम समाज्ञप्तं तज्ज्वालामालि सुदर्शनं तेन मायासहस्रं तच्छम्बरस्याशुगामिना बालस्य रक्षता देह
मेकैकशो विसूदितमित्यादौ। अतो मायाशब्देन मिथ्यार्थवाचीन्द्रजालिकादिप्रयुक्तेन चिन्मंत्रौषधादि
ना मिथ्यार्थविषयायाः पारमार्थिकत्वबुद्धेरुत्पादकत्वेन मायावीति शब्दप्रयोगः तथा मंत्रौषधादिभेदेन
मायाशब्दप्रयोगेष्वनुगतस्यैकस्यैव शब्दार्थत्वात् तत्र मिथ्यार्थेषु मायाशब्दप्रयोगो मायाकार्यबुद्धिविषय

॥ दैवी ह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरंति ते ॥१४॥

त्वेनौपचारिकः मंचाः क्रोशन्तीतिवत्। एषा गुणमयी पारमार्थिकी भगवन्माया एवं मायां तु प्रकृतिं विद्या
न्मायिनं तु महेश्वरमित्यादिकमभिधीयते। अस्याः कार्यं भगवत्स्वरूपतिरोधानं स्वस्वरूपभोग्यत्वबु
द्धिश्च अतो भगवन्मायामोहितं सर्वं जगद्भगवंतमनवधिकातिशयानंदरूपं नाभिजानाति मायाविमोच
नोपायमाह। मामिति। मामेव सत्यसंकल्पं परमकारुणिकमनालोचितविशेषाशेषलोकशरण्यं ये शरणं
प्रपद्यन्ते ते एतां गुणमयीं मायां तरंति। मायामुक्त्यर्थं मामेवोपासत इत्यर्थः॥१४॥ ॥ ६१॥

किमिति भगवदुपासनापादिनीं भगवत्प्रपत्तिं सर्वे न कुर्वंतीत्यत आह। न मामिति। मां दुष्कृतिनः पापकर्मा
णो दुष्कृतिनारम्याच्चतुर्विधा न प्रपद्यंते। मूढाः नराधमाः माययापहृतज्ञानाः आसुरं भावमाश्रिताः इति
मूढाः विपरीतज्ञानाः मत्स्वरूपापरिज्ञानात् प्राकृतेष्वेव विषयेषु सक्ताः पूर्वोक्तप्रकारेण भगवच्छेषतये
करसमात्मानं भोग्यजातं च स्वशेषतया मन्यमानाः नराधमाः सामान्येन ज्ञातेऽपि मत्स्वरूपे मदौन्मुख्यानर्ह
त्वात्। माययापहृतज्ञानास्तु मद्विषयं मदैश्वर्यविषयं च ज्ञानं प्रस्तुतमप्येषां तदसंभावनापादनीभिः

॥ न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः। माययापहृतज्ञाना आसुरं भावमाश्रिताः ॥१५॥

कुदृष्टियुक्तिभिरपहृतं तेन तथोक्ताः आसुरं भावमाश्रितास्तु मद्विषयं मदैश्वर्यविषयं च ज्ञानं सुदृढमुत्पन्नं
द्वेषायैव भवति तेन यथा उत्तरोत्तरपापिष्ठतमाः॥१५॥ सुकृतिनः पुण्यकर्माणो मां शरणमुपगम्य मामे
व भजंते ते च सुकृततारतम्येन चतुर्विधाः॥ सुकृतगरीयस्त्वेन प्रपत्तिविशेषप्राप्त्या उत्तरोत्तराधिकतमा भवंती
त्यर्थः॥ आर्त्तः प्रतिष्ठाहीनो भ्रष्टैश्वर्यः पुनस्तत्प्राप्तिकामः अर्थार्थी अप्राप्तैश्वर्यविषयतयैश्वर्यकामः
तयोर्मुखभेदमात्रमैश्वर्यविषयतया एक एवाधिकारः॥ जिज्ञासुः प्रकृतिवियुक्तात्मस्वरूपावाप्तीच्छुः ज्ञा

तेषां ज्ञानी नित्य

न मेवात्मस्वरूपमितिजिज्ञासुरित्युक्तं॥ज्ञानी इतस्त्वन्यां प्रकृतिं विद्धि मे परामित्यादिना निर्दिष्टभगवच्छे
षत्वैकरसात्मकस्वरूपे प्रकृतिवियुक्तकेवलात्मन्यपर्यवस्यन्भगवंतं प्रेप्सुर्भगवंतमेव परमप्राप्यं
मन्वानः॥१६॥तेषां ज्ञानी विशिष्यते कुतः नित्ययुक्तः एकभक्तिरिति च तस्य हि मदेकप्राप्यस्य मया योगो
नित्यः॥इतरेषां तु यावत्स्वाभिलषितप्राप्तिमयायोगः तथा ज्ञानिनो मय्येकस्मिन्नेव भक्तिः इतरेषां तु स्वा
भिलषिते तत्साधनत्वेन मयि च अतः स एव विशिष्यते किंच प्रियो हीति॥अत्रात्यर्थशब्दो न अभिधेयवचनः ज्ञा

॥ चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ॥ आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ १६॥
॥ तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ॥ प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ॥१७॥

नि
निनोऽहं यथा प्रियस्तथा मया सर्वज्ञेन सर्वशक्तिनाप्यभिधातुं न शक्यत इत्यर्थः॥प्रियत्वस्येयत्ता
रहितत्वात्॥यथा ज्ञानिनामग्रेसरस्य प्रह्लादस्य सत्वासक्तमतिः कृष्णेदृश्यमानो महोरगैः न विवेदा
त्मनो गात्रं तत्स्मृत्याह्लादसमास्थित इति सोऽपि तथैव मम प्रियः॥१७॥ ॥ ॥६२॥



ज्ञानिनः

उदारा इति॥सर्व एवैते मामेवोपासत इत्युदाराः वदान्याः ये मत्तोऽन्यत्किंचित्गृह्णंति ते हि मम सर्वस्वदा
यिनः ज्ञानी त्वात्मैव मे मतं तदायत्तधारणोऽहमिति मन्ये कस्मादेवं यस्मादयं मया विनात्मधारणासंभावन
या मामेवानुत्तमं प्राप्यमास्थितः॥अतस्तेन विनाममाप्यात्मधारणं न संभवति ततो ममात्मा हि सः॥१८॥
बहूनामिति॥नाल्पसंख्यासंख्यातानां पुण्यजन्मनां फलमिदं यत्मच्छेषतैकरसात्मयाथात्म्यज्ञानपूर्वं
कं मत्प्रपदनं॥अपि तु बहूनां पुण्यजन्मनामवसाने वासुदेवशेषतैकरसोऽहं तदायत्तस्वरूपस्थितिप्रवृ

वासुदेव

॥ उदाराः सर्व एवैते ज्ञानी त्वात्मैव मे मतं ॥ आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिं ॥१८॥
॥ बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ॥ वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥१९॥

वासुदेवः
त्तिः स चासंख्येयैः कल्याणगुणैः परतर इति ज्ञानवान्भूत्वा वासुदेव एव मम परमप्राप्यं प्रापकं चान्य
देपि यन्मनोरथवर्ति स एव मम तत्सर्वमिति मां यः प्रपद्यते मामुपास्ते स महात्मा महामना दुर्लभतरो लोके
वासुदेवः सर्वमित्यस्यायमेवार्थः प्रियो हि ज्ञानिनोऽत्यर्थमहमास्थितः स हि युक्तात्मा मामेवानुत्तमां गति
मिति प्रक्रमात् ज्ञानवांश्चायमुक्तलक्षण एव अस्यैव पूर्वोक्तज्ञानित्वात् भूमिरापइत्यारभ्य जीवभूतामित्यं

तेनचेतनाचेतनस्यप्रकृतिद्वयस्यपरमपुरुषशेषतैकरसतोक्ता अहंकृत्स्नस्यजगतइत्यारभ्ययेचैवसात्त्वि
काभावाराजसास्तामसाश्चयेमत्तएवेतितान्विद्धिनत्वहंतेषुतेमयीतिप्रकृतिद्वयस्यकार्यकारणोभयावस्थ
स्यपरमपुरुषायत्तस्वरूपस्थितिप्रवृत्तित्वंपरमपुरुषस्यचसर्वैःप्रकारैः स र्वस्मात्परतरत्वमुक्तम्अतःसर्व
वाज्ञानीत्युच्यते॥१९॥तस्यज्ञानिनोदुर्लभत्वमेवोपपादयति॥कामैरिति॥सर्वएवहिलौकिकाःपुरुषाः
वा स्वयाप्रकृत्यानयागुणमयभावविषययानियताः नित्यान्वितास्तैस्तैःस्ववासनानुरूपैर्गुणमयैरेवका

॥ कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ॥ तंतंनियममास्थायप्रकृत्यानि ॥
॥ यताः स्वया ॥ २०॥

मैरिच्छाविषयभूतैर्हृतमत्स्वरूपविषयज्ञानास्तत्तत्कामसिद्ध्यर्थंमदन्यदेवतामद्व्यतिरिक्ताः केवलेन्द्रादिदे
वतास्तंतंनियममास्थायतत्तद्देवताविशेषमात्रप्रीणनायासाधारणंनियममास्थायप्रपद्यन्तेताएवाश्रि
त्यार्चयन्तिनमत्स्वरूपमभिजानन्तीति॥२०॥ ॥श्री॥ ६३॥

ता अपिदेवतामदीयास्तनवः यआदित्येतिष्ठन्नादित्यादन्तरोयमादित्योनवेदयस्यादित्यःशरीरमित्या
दिश्रुतिभिःप्रतिपादितामदीयास्तनवइत्यजानन्नपियोयोयांयामिन्द्रादिकांतनुंभक्तःश्रद्धयार्चितुमिच्छ
तितस्यतस्याजानतोपिमत्तनुविषयैषाश्रद्धेत्यहमेवानुसंधायतामेवाचलांनिर्विघ्नांविदधामि॥२१॥सतये
ति॥सतयानिर्विघ्नयाश्रद्धयायुक्तस्तस्येन्द्रादेराराधनंप्रतीहतेचेष्टते॥ततोमत्तनुभूतेन्द्रादिदेवताराधनात्
तानेवहिस्वाभिलषितान्कामान्मयैवविहितान्लभतेयद्यप्याराधनकालइन्द्रादयोमदीयास्तनवस्त

॥ योयोयांयांतनुंभक्तःश्रद्धयार्चितुमिच्छति तस्यतस्याचलांश्रद्धांतामे
॥ वविदधाम्यहं २१ सतयाश्रद्धयायुक्तस्तस्याराधनमीहते लभतेच
॥ ततःकामान्मयैवविहितान्हितान् २२

नएवंतदर्चनंचमदाराधनमितिनजानन्तितथापिवस्तुतोमदाराधनत्वादाराधकाभिलषितमहमेवविदधा
मि॥२२॥अन्तवत्त्विति॥तेषामल्पमेधसामल्पबुद्धीनामिन्द्रादिमात्रयाजिनांतदाराधनफलंस्वल्पमन्तवच्च
भवतिकुतःदेवानेवदेवयजोयान्तियतइन्द्रादिदेवास्तद्याजिनोयान्तिइन्द्रादयोपिपरिच्छिन्नभोगाःपरिमि

तत्कालवर्त्तिनश्च ततस्तत्साम्यं प्राप्य तैः सह प्रच्यवंते मद्भक्ता अपि तेषामेव कर्मणां मदाराधनस्वरूपतां
ज्ञात्वा परिछिन्नफलसंगं त्यक्त्वा मम प्रीणनैकप्रयोजनाः मामेव प्राप्नुवंति न च पुनर्निवर्त्तंते ॥ मामुपेत्य तु
कौंतेय पुनर्जन्म न विद्यत इति वक्ष्यति ॥२३॥ इतरे तु सर्वसमाश्रयणीयत्वाय मम मनुष्यादिष्ववतारमप्यकिंचि
त्करं कुर्वंतीत्याह ॥ अव्यक्तमिति सर्वैः कर्मभिराराध्योऽहं सर्वेश्वरः परमकारुण्यादाश्रितवात्सल्याच्च सर्वेषां स

अंतवत्तु फलं तेषां तद्भवत्यल्पमेधसां ॥ देवान्देवयजो यांति मद्भक्ता यांति मामपि ॥२३॥ अव्यक्तं व्यक्तिमापन्नं मन्यं
ते मामबुद्धयः ॥ परं भावमजानंतो ममाव्ययमनुत्तमं ॥२४॥ नाहं प्रकाशः सर्वस्य योगमायासमावृतः ॥ मूढोऽयं ना
भिजानाति लोको मामजमव्ययं ॥२५॥

माश्रयणीयत्वाय अजहत्स्वभाव एव वसुदेवगृहेऽवतीर्ण इति ममेमं परं
भावमव्ययमनुत्तममजानंतः प्राकृतराजसुतसमानमितः पूर्वमनभिव्यक्तमिदानीं कर्मणा जन्मविशेषं प्रा
प्य व्यक्तिमापन्नमबुद्धयो मां मन्यंते अतो मां नाश्रयंते न कर्मभिराराधयंति च ॥२४॥ कुत एवं न प्रकाशत इ
त्यत्राह ॥ नाहमिति ॥ मनुष्यत्वादिसमानसंस्थानयोगाख्यमायया समावृतोऽहं न सर्वस्य प्रकाशः मयि मनु
ष्यत्वादिसमानसंस्थानदर्शनमात्रेण मूढोऽयं लोको मामतिवाय्विंद्रकर्माणमतिसूर्याग्नितेजसमुपलभ्य ॥६४॥
मानमपि अजमव्ययं निखिलजगदेककारणं सर्वेश्वरं सर्वसमाश्रयणीयत्वाय मनुष्यत्वसमानसंस्थानमास्थितं नाभिजानाति ॥२५॥

अतीतानि वर्त्तमानान्यनागतानि च सर्वाणि भूतान्यहं वेद जानामि मां तु वेद न कश्चन मत्यानुसंधीयमा
नेषु कालत्रयवर्त्तिषु भूतेषु मामेवंविधं वासुदेवं सर्वसमाश्रयणीयत्वायावतीर्णं विदित्वा मामेव समाश्रयन्न
कश्चिदुपलभ्यत इत्यर्थः अतो ज्ञानी दुर्लभ एव ॥२६॥ तथा हीत्याह ॥ इच्छाद्वेषाभ्यां समुत्थेन शीतोष्णादिद्वंद्वाख्ये
न मोहेन सर्वभूतानि सर्गे जन्मकाल एव संमोहं यांति ॥ एतदुक्तं भवति ॥ गुणमयेषु सुखदुःखादिषु द्वंद्वेषु पूर्व

॥ वेदाहं समतीतानि वर्त्तमानानि चार्जुन ॥ भविष्याणि च भू ॥
॥ तानि मां तु वेद न कश्चन ॥२६॥ इच्छाद्वेषसमुत्थेन द्वंद्वमोहे ॥
॥ न भारत ॥ सर्वभूतानि संमोहं सर्गे यांति परंतप ॥२७॥

स्वरःस्वरो पूर्वजन्मनि यद्विषयाविच्छाद्वेषौ रागद्वेषावभ्यस्तौ तद्वासनया पुनरपि जन्मकाल एव तदेव द्वंद्वमिच्छाद्वेष
विषयत्वेन समुत्थितं भूतानां संमोहनं भवति ॥ तेन मोहेन सर्वभूतानि संमोहं यांति तद्विषयेच्छाद्वेषस्वभावानि भ मोहन
वंति न मच्छ्लेषवियोगसुखदुःखस्वभावानि ज्ञानी तु मच्छ्लेषवियोगैकसुखदुःखस्वभावः न तत्स्वभावं कि
मपि भूतं जायत इति ॥२७॥
ज्ञानिनःस्वभावः इच्छाभावोयस्यतत्र–

येषामिति॥ येषां त्वनेकजन्मार्जितोत्कृष्टपुण्यसंचयेन गुणमयद्वंद्वमोहहेतुभूतं मदौन्मुख्यविरो-
धि चानादिकालप्रवृत्तं पापमंतंगतं क्षयितं ते तु पूर्वोक्तेन सुकृततारतम्येन मां शरणमनुप्रपद्य गुणमयान्मो-
हात् विनिर्मुक्ता जरामरणमोक्षाय प्रकृतिवियुक्तात्मस्वरूपदर्शनाय महते चैश्वर्याय मत्प्राप्तये च दृढव-

॥ येषां त्वंतगतं पापं जनानां पुण्यकर्मणां॥ ते द्वंद्वमोहनि ॥
॥ र्मुक्ता भजंते मां दृढव्रताः॥२८॥ जरामरणमोक्षाय मामा ॥
॥ श्रित्य यतंति ये॥ ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलं॥२९॥

जरेति

ताः दृढसंकल्पा मामेव भजंते॥२८॥ ततस्तेषां त्रयाणां भगवंतं भजमानानां ज्ञातव्यविशेषानुपादेयांश्च
प्रस्तौति जरामरणमोक्षाय प्रकृतिवियुक्तात्मस्वरूपदर्शनाय मामाश्रित्य ये भजंते ते तेन तद्ब्रह्म विदुः अध्या-
त्मं च कृत्स्नं विदुः कर्म चाखिलं विदुः॥२९॥ ॥श्री॥ कैवल्यार्थिनः ॥



ऐश्वर्यार्थिनः

अत्र च इति पुनर्निर्देशात् पूर्वनिर्दिष्टेभ्योऽन्येऽधिकारिणो ज्ञायंते साधिभूतं साधिदैवं मामैश्वर्यार्थिनो ये विदु-
रित्येतदनुवादस्वरूपमप्यप्राप्तार्थत्वाद्विधायकमेव तथा साधियज्ञमित्यपि त्रयाणामधिकारिणामविशे- आर्तार्थार्थिजिज्ञासूनां
षेण विधीयते सर्वेषामात्मनां च यागादि नित्यनैमित्तिकरूपमहायज्ञाद्यनुष्ठानमवर्जनीयं ते च प्रयाणकाले
अधिभूतादिशब्दानामर्थं श्रीभगवानेवोत्तराध्याये वक्ष्यति

॥ साधिभूताधिदैवं मां साधियज्ञं च ये विदुः॥ प्रयाणकालेपि च मां ते ॥
॥ विदुर्युक्तचेतसः॥३०॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्या ॥
॥ यां योगशास्त्रे श्रीकृष्णार्जुनसंवादे ज्ञानयोगो नाम सप्तमोऽध्यायः॥७॥

कैवल्यार्थिनः

पि स्वप्राप्यानुगुणं मां विदुः॥ ते च इति चकारात् पूर्वे जरामरणमोक्षाय यतमानाश्च प्रयाणकाले विदुरिति स-
मुच्चीयते॥ अनेन ज्ञानिनोऽप्यर्थस्वाभाव्यात् साधियज्ञं मां विदुः प्रयाणकालेपि स्वप्राप्यानुगुणं मां विदुरित्यु-
क्तं भवति॥३०॥ इति श्रीमद्रामानुजाचार्यविरचिते गीताभाष्ये सप्तमोऽध्यायः॥ ७ ॥

दुर्लभत्वं चाक्रान्तेन तत्तदविदितानां ब्रह्माध्यात्मादिसप्तपदार्थानां तत्त्वं पृच्छति

सप्तमे परस्य ब्रह्मणो वासुदेवस्य सर्वेश्वरस्य निखिलचेतनाचेतनवस्तुशेषित्वं कारणत्वमाधारत्वं सर्वशरीर
तया सर्वप्रकारत्वेन सर्वशब्दवाच्यत्वं सर्वनियन्तृत्वं सर्वैश्च कल्याणगुणैरेकाश्रयत्वं च सत्त्वरजस्तमोमयैर्देहे
न्द्रियत्वेन भोग्यत्वेन चावस्थितैर्भावैरनादिकालप्रवृत्तदुष्कृतप्रवाहहेतुकैस्तस्य तिरोधानमत्युत्कृष्टसुकृतहे
तुकभगवत्प्रपत्त्या च तन्निवर्तनं सुकृततारतम्येन च प्रपत्तिवैशिष्ट्यादैश्वर्याक्षरयाथात्म्यभगवत्प्राप्त्यपेक्ष
योपासकभेदं भगवन्तं प्रेप्सोर्नित्ययुक्ततयैकभक्तितया चात्यर्थं परमपुरुषप्रियत्वेन च श्रैष्ठ्यं दुर्लभत्वं च प्रति

॥अर्जुन उवाच॥ किं तद्ब्रह्म किमध्यात्मं किं कर्म पुरुषोत्तम॥ अधिभूतं च किं प्रोक्तमधिदैवं किमुच्यते॥१॥
॥अधियज्ञः कथं कोऽत्र देहेऽस्मिन्मधुसूदन॥ प्रयाणकाले च कथं ज्ञेयोऽसि नियतात्मभिः॥२॥

पादितमैश्वर्याक्षराधिकारिणां

प्रादुर्भावं चैषां त्रयाणां ज्ञातव्योपादेयभेदांश्च प्रस्तौषीत॥ इदानीमष्टमे प्रस्तुतानां ज्ञातव्योपादेयभेदान्निर्दिश
ति किं तदिति द्वाभ्याम्॥ जरामरणमोक्षाय भगवन्तमाश्रित्य यतमानानां ज्ञातव्यतयोक्तं तद्ब्रह्माध्यात्मं च कर्म
च किमिति वक्तव्यम्॥ ऐश्वर्यार्थिनां ज्ञातव्यमधिभूतमधिदैवं च किं त्रयाणां ज्ञातव्योऽधियज्ञशब्दनिर्दिष्टः कः
तस्य चाधियज्ञभावः कथं प्रयाणकाले चैभिस्त्रिभिर्नियतात्मभिः कथं ज्ञेयोऽसि॥२॥ ॥



अक्षरमिति

ब्रह्मेति निर्दिष्टं परममक्षरं न क्षरतीत्यक्षरं क्षेत्रज्ञसमष्टिरूपं तथा च श्रुतिः अव्यक्तमक्षरे लीयते अक्ष
रं तमसि लीयत इत्यादिका परममक्षरं प्रकृतिविनिर्मुक्तात्मस्वरूपं स्वभावोऽध्यात्ममुच्यते स्वभावः प्रकृ

ब्रह्मेति
जीवात्मस्वरूपं प्र
कृतिः

तिः अनात्मभूतमात्मनि संबध्यमानं भूतसूक्ष्मं तद्वासनादिकं च पञ्चाग्निविद्यायां ज्ञातव्यतयोदितं तदुभ
यं प्राप्यतया त्याज्यतया च मुमुक्षुभिर्ज्ञातव्यं भूतेति भूतभावो मनुष्यादिभावः तदुद्भवकरो यो विसर्गः पञ्चम्या
माहुताचापः पुरुषवचसो भवन्ति॥

॥श्रीभगवानुवाच॥ अक्षरं ब्रह्म परमं स्वभावोऽध्यात्म॥
॥मुच्यते॥ भूतभावोद्भवकरो विसर्गः कर्मसंज्ञितः॥३॥

तिश्रुतिसिद्धो योषित्संबन्धजः स कर्मसंज्ञितः॥ तदखिलं सानुबन्धं उद्वेजनीयतया परिहरणीयतया च मुमु

श्लो॰११

क्षुभिर्ज्ञातव्यं परिहरणीयता चानन्तरमेव वक्ष्यते यदिच्छन्तो ब्रह्मचर्यं चरन्तीति॥३॥ अधिभूतं क्षरो भाव इत्यैश्व

श्रि॰

र्यार्थिनां ज्ञातव्यतया निर्दिष्टमधिभूतं क्षरो भावः वियदादिभूतेषु वर्तमानस्तत्परिणामविशेषः क्षरस्वभा

ल

वः विलक्षणशब्दस्पर्शादिः साश्रयः विलक्षणाः साश्रयाः शब्दस्पर्शरूपरसगन्धाः ऐश्वर्यार्थिभिः प्राप्यास्ते

देवतोपरिवर्तमानं

नुसंधेयाः॥ पुरुषश्चाधिदैवतं॥ अधिदैवतशब्दनिर्दिष्टः पुरुषः अधिदैवतं इंद्रप्रजापतिप्रभृतिकृत्स्नदेवतोप
रिवर्त्तमानं इंद्रप्रजापतिप्रभृतीनां तेभ्यो जातविलक्षणत्वाद्धैरण्यगर्भो लिंगात्मा पुरुषः स च भोक्तृत्वाच्च स्वात्मैश्वर्यार्थि
भिः उपास्यतयानुसंधेयः अधियज्ञशब्दनिर्दिष्टोऽहमेव अधियज्ञः यज्ञेराराध्यतयावर्त्तमानः अत्रैव देहे मदंशे
भूतेष्वात्मतयावस्थितोऽहमेव यज्ञेराराध्य इति मद्भाव्यत्वात् नित्यनैमित्तिकानुष्ठानवेलायां च योगिनामधिका
रिणामनुसंधेयमेतत्॥४॥ अंतकाल इति॥ इद मपि त्रयाणां साधारणं अंतकाले मामेव स्मरन्कलेवरं त्य

अधिभूतं क्षरो भावः पुरुषश्चाधिदैवतं॥ अधियज्ञोऽहमेवात्र देहे देहभृतां वर॥४॥ अंतकाले च मामेव स्मर
न्मुक्त्वा कलेवरं॥ यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः॥५॥ यं यं वापि स्मरन्भावं त्यजत्यंते कलेवरं॥ तं
तमेवैति कौंतेय सदा तद्भावभावितः॥६॥

स्मरणात्

क्त्वा यः प्रयाति स मद्भावं याति मत्पोन्नावस्तंतदानीं यथा मामनुसंध
ते तथाविधाकारेण वर्त्तत इत्यर्थः॥ यथादिभरतादयः तदानीं स्मर्यमाणमृगादिसजातीयाकारसंभूता॥५॥ स्म
र्तुः स्वविषयसजातीयाकारतापादनमंत्यप्रत्ययस्य स्वभाव इति सुस्पष्टमाह॥ यं यमिति॥ अंते प्रांतकाले यं यं वा
पि भावं स्मरन्कलेवरं त्यजति तं तं भावमेव मरणानंतरमेवैति॥ अंत्यप्रत्ययस्य पूर्वभावितविषयत्व
ज्ञापने॥६॥

६७॥

तस्मादिति॥ यस्मात्पूर्वकालाभ्यस्तविषय एवांत्यप्रत्ययो जायते तस्मात्सर्वेषु कालेषु आप्रयाणादहरह
र्मामनुस्मर॥ अहरहरनुस्मृतिकरं गुर्वादिकं वर्णाश्रमानुबंधि श्रुतिस्मृतिचोदितं नित्यनैमित्तिकं च कर्म कु
रु॥ एतदुपायेन मय्यर्पितमनोबुद्धिरंतकाले च मामेव स्मरन्यथाभिलषितप्रकारं मामेवैष्यसि नात्र संशयः

॥७॥ एवं सामान्येन सर्वत्र स्वप्राप्त्यावाप्तिरेस्मरणस्याधीनेत्युक्त्वा तदर्थं त्रयाणामुपासनप्रकारभेदं वक्तुमुप

आर्तजिज्ञासुरर्थार्थी

॥ तस्मात्सर्वेषु कालेषु मामनुस्मर युध्य च॥ मय्यर्पितमनोबुद्धिर्मामेवैष्यस्यसंशयः॥७॥
॥ अभ्यासयोगयुक्तेन चेतसा नान्यगामिना॥ परमं पुरुषं दिव्यं याति पार्थानुचिंतयन्॥८॥

क्रमते॥ तत्रैश्वर्यार्थिनामुपासनप्रकारं यथोपासनमंत्यप्रत्ययप्रकारं चाह॥ अभ्यासेति॥ अहरहरभ्या

आगतौ छे

सयोगाभ्यां युक्ततया नान्यगामिना चेतसांतकाले परमं पुरुषं दिव्यं मां वक्ष्यमाणप्रकारं चिंतयन्मामेव याति
आदिभरतमृगत्ववत्प्राप्स्यति इति॥ ऐश्वर्यविशिष्टतया मत्समानाकारो भवति॥ अभ्यासो नित्यनैमित्तिकाविरुद्धेषु
सर्वेषु कालेषु मनसोपास्यसंनिधीकरणं योगस्तु अहरहर्योगकाले वर्द्धमानं यथोक्तलक्षणमुपासनं॥८॥

कालात्तरतैरहराद्यौर्न तस्य कालस्य नास्यैवास्य कालस्य नाशर्ईत स्मृतं च निरंतरमिति श्रुतिः ९

तदिति



कविं सर्वज्ञं पुराणं पुरातनं ॥ अनुशासितारं विश्वस्य नियंतारं अणोरणीयांसं जीवादपि सूक्ष्मतरं सर्वस्य धातारं सर्वस्य पोषकं अचिंत्यरूपं सकलेतरविषयज्ञानातीतस्वरूपं ॥ आदित्यवर्णं तमसः परस्तात् ॥ प्रकृतेः परं स्वप्रकाशरूपं ॥ ९ ॥ तमेवंभूतमहरहरभ्यस्यमानभक्तियुक्तो योगबलेनाभ्यस्तसंस्कारतयाऽचलेन मनसा प्रयाणकाले भ्रुवोर्मध्ये प्राणमावेश्य संस्थाप्य ततश्च भ्रुवोर्मध्ये दिव्यं पुरुषं योऽनुस्मरेत् स तमेवोपैति तमेव प्राप्नोति



॥ कविं पुराणमनुशासितारमणोरणीयांसमनुस्मरेद्यः ॥ सर्वस्य धातारमचिंत्यरूपमादित्यवर्णं तमसः परस्तात् ॥ ९ ॥ प्रयाणकाले मनसाऽचलेन भक्त्या युक्तो योगबलेन चैव ॥ भ्रुवोर्मध्ये प्राणमावेश्य सम्यक् स तं परं पुरुषमुपैति दिव्यं ॥ १० ॥ यदक्षरं वेदविदो वदंति विशंति यद्यतयो वीतरागाः ॥ यदिच्छंतो ब्रह्मचर्यं चरंति तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ ११ ॥

तज्ज्ञानैश्वर्यो भवतीत्यर्थः ॥ १० ॥ अथ केवल्यार्थिनां स्मरणप्रकारमाह ॥ यदक्षरमिति ॥ यदक्षरमस्थूलत्वादिगुणं वेदविदो वदंति ॥ वीतरागाश्च यतयो यदक्षरं विशंति ॥ यदक्षरं प्राप्तुमिच्छंतो ब्रह्मचर्यं चरंति ॥ तत्ते पदं संग्रहेण प्रवक्ष्ये ॥ पद्यते गम्यते चेतनेनेति पदं तन्निखिलवेदांतवेद्यं मक्षररूपमक्षरं यथोपास्यं तत्तथा संक्षेपेण प्रवक्ष्यामीत्यर्थः ॥ ११ ॥



सर्वद्वाराणीति

सर्वाणि श्रोत्रादीनींद्रियाणि तानि द्वारभूतानि संयम्य स्वस्वविषयेभ्यो निवर्त्य हृदयकमले निविशेषमध्यक्षरे मनो निरुध्य योगाख्यां धारणां समाश्रितः सम्यगेव निश्चलां स्थितिमाश्रितः ॥ १२ ॥ ओमित्येकाक्षरं ब्रह्मवाचकं व्याहरन्नुच्चरन् वाच्यं मामनुस्मरन्नात्मनः प्राणं मूर्ध्न्याधाय देहं त्यजन् यः प्रयाति स याति परमां गतिं प्रकृतिविमुक्तं मत्स्वमानाकारमपुनरावृत्तिमात्मानं यातीत्यर्थः ॥ यः स सर्वं प्रकृते पुनरस्त्यनुनविन

ओमितीति

॥ सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ॥ मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणां ॥ १२ ॥ ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ॥ यः प्रयाति त्यजन्देहं स याति परमां गतिं ॥ १३ ॥ अनन्यचेताः सततं यो मां स्मरति नित्यशः ॥ तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ॥ १४ ॥

श्यति ॥ अयं क्रोध्यरस्तु कस्त्रमाक्रमः परमां गतिमित्यनंतरमेव वक्ष्यते ॥ १३ ॥ एवमैश्वर्यार्थिनः कैवल्यार्थिनश्च स्वप्राप्त्यनुगुणं भगवदुपासनप्रकारमुक्तः ॥ अथ ज्ञानिनो भगवदुपासनप्रकारं प्राप्तिप्रकारं चाह ॥ अनन्यचेता इति ॥ नित्यशो मामुद्योगप्रभृति सततं सर्वकालमनन्यचेता यः स्मरति अत्यर्थं मत्प्रियत्वेन मत्स्मृत्या विनात्मधारणमलभमानो निरतिशयप्रियं मां यः स्मरति तस्य नित्ययुक्तस्य नित्यं यो

॥ गी॰ भा॰ ॥ श्री॰ ८ ॥

॥ ६८ ॥

गं कांक्षमाणस्य योगिनोऽहं सुलभः अहमेव प्राप्यः न मद्भाव ऐश्वर्यादिकः तद्वियोगमसहमानो ह्यहमेव वृतं
वृणोमि तस्याप्यनुगुणोपासनविपाकं तद्विरोधिनिरसनमत्यर्थमत्प्रियत्वादिकं चाहमेव ददामीत्यर्थः ॥ यमे
वैष वृणुते तेन लभ्य इति हि श्रूयते वक्ष्यते च ॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ॥ ददामि बुद्धियोगं तं ये
न मामुपयांति ते ॥ तेषामेवानुकंपार्थमहमज्ञानजं तमः ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वतेति ॥ १४

॥ मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतं ॥
॥ नाप्नुवंति महात्मानः संसिद्धिं परमां गताः ॥ १५ ॥

अतः परमध्यायशेषेण ज्ञानिनः कैवल्यार्थिनश्चापुनरावृत्तिमैश्वर्यार्थिनः पुनरावृत्तिं चाह ॥ मामिति ॥
मां प्राप्य पुनर्निखिलदुःखालयमस्थिरं जन्म न प्राप्नुवंति यत एते महात्मानः ॥ महामनसो यथावस्थितमद्रू
रूपज्ञानाः ॥ अत्यर्थमत्प्रियत्वेन मया विना आत्मधारणमलभमाना मय्यासक्तमनसो मदाश्रया मामुपाप्य प
रमसंसिद्धिरूपं मां प्राप्ताः ॥ १५ ॥ ॥ ॥ ६८ ॥

ऐश्वर्यगतिं प्राप्तानां भगवंतं प्राप्तानां च पुनरावृत्त्यपुनरावृत्ती च हेतुमनंतरमाह ॥ आब्रह्मेति ॥ ब्रह्मलोकपर्यं
ता ब्रह्मलोकोदरवर्तिनः सर्वे लोका भोगैश्वर्यादिरूपाः पुनरावर्तिनः नाशिनः अत ऐश्वर्यगतिं प्राप्ता
नामपि पुनः स्थानविनाशित्वमवर्जनीयं मां सर्वज्ञं सत्यसंकल्पं निखिलजगदुत्पत्तिस्थितिलयलीलं प
रमकारुणिकं सदैकरूपं प्राप्तानां विनाशप्रसंगाभावात्तेषां पुनर्जन्म न विद्यते ॥ १६ ॥ ब्रह्मलोकपर्यंतानां

॥ आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ॥ मामुपेत्य तु कौंतेय पुनर्जन्म न विद्यते ॥ १६ ॥
॥ सहस्रयुगपर्यंतमहर्यद्ब्रह्मणो विदुः ॥ रात्रिं युगसहस्रांतां तेऽहोरात्रविदो जनाः ॥ १७ ॥
॥ अव्यक्ताद्व्यक्तयः सर्वाः प्रभवंत्यहरागमे ॥ रात्र्यागमे प्रलीयंते तत्रैवाव्यक्तसंज्ञके ॥ १८ ॥

लोकानां तदंतर्गतवर्तिनां च परमपुरुषसंकल्पकृतामुत्पत्तिविनाशकालव्यवस्थामाह ॥ सहस्रयुगेति ॥ ये म
नुष्यादिचतुर्मुखांतानां मत्संकल्पकृतामहोरात्रव्यवस्थां विदुस्ते जनाः ब्रह्मणश्चतुर्मुखस्य यदहस्तच्चतुर्युग
सहस्रावसानं विदुः रात्रिं च तथारूपां ॥ १७ ॥ तत्र ब्रह्मणोऽहरागमे त्रैलोक्यांतर्वर्तिनो देहेंद्रियभोग्यभोगस्थानरूपाः
व्यक्तयः पूर्वस्थितचतुर्मुखदेहावस्थादव्यक्तात्प्रभवंति ॥ तत्रैवाव्यक्तावस्थाविशेषे चतुर्मुखदेहे रात्र्यागमे समये प्रलीयंते ॥ १८ ॥

अव्यक्तादिति

ब्रह्मलोकेनहर्दिवसोत्तनस्यशतवर्षावसानमंतिमदिनेंमहद्युगसहस्रांतस्यांते एतद्ब्रह्मलोकवर्षशतायुसर्वांतरगतोंतिमरात्रिवर्जनार्थमुक्तमितिमितिभाति अंतिमदिनावसानेप्रलयस्यसत्वात् २

भूतग्रामइति॥ सएवायंकर्मवश्यो भूतग्रामः अहरागमेभूत्वाभूत्वारात्र्यागमेप्रलीयते पुनरहरागमेप्रभ
वति तथा वर्षशतावसानरूपयुगसहस्रांते ब्रह्मलोकपर्यंतालोकास्तथाच पृथिव्यप्सुलीयते आपस्तेजसि
लीयंतइत्यादिक्रमेणाक्षरतमःपर्यंतमप्येवप्रविलीयतेएवंमद्व्यतिरिक्तस्यकृत्स्नस्यकालव्यवस्थयामत्त
उत्पत्तेर्मद्विपत्तयाचोत्पत्तिलयादिकमवर्जनीयमित्यैश्वर्यगतिंप्राप्तानांपुनरावृत्तिरपरिहार्यामामुपेतानांतु
नपुनरावृत्तिप्रसंगः॥१९॥

॥भूतग्रामःसएवायंभूत्वाभूत्वाप्रलीयते॥ रात्र्यागमेऽवशःपा॥
॥र्थप्रभवत्यहरागमे॥१९॥परस्तस्मात्तुभावोऽन्योऽव्यक्तोऽव्यक्तात्स॥
यः ॥नातनः सर्वेषुभूतेषुनश्यत्सुनविनश्यति॥२०॥ ॥श्री॥ ॥

अथकैवल्यप्राप्तानामपिपुनरावृत्तिर्नविद्यतइत्याह॥ परइति तस्मादव्यक्तादचेतनप्रकृतिरूपात्पुरु
षार्थतयापरस्तूत्कृष्टोभावोऽन्योज्ञानैकाकारतयातस्माद्विसजातीयः अव्यक्तः केनचित्प्रमाणेनव्यक्तो
नइत्यव्यक्तः॥ स्वसंवेद्यस्वासाधारणाकारइत्यर्थः॥ सनातनउत्पत्तिविनाशरहिततयानित्यः यःसर्वेषुवि
यदादिभूतेषुसकार्येषुनश्यत्सुतत्रतत्रस्थितोपिननश्यति॥२०॥ ॥हरि॥ ॥ ७०॥

॥अव्यक्तइति॥ योऽव्यक्तोऽक्षरइत्युक्तः॥ येत्वक्षरमनिर्देश्यं कूटस्थोऽक्षरइत्यादिषुतंवेदविदःपरमांगतिमा
हुः॥ अयमेवयः प्राप्तस्त्यजन्देहंसयातिपरमांगतिमित्यत्रपरमगतिशब्दनिर्दिष्टोक्षरः प्रकृतिसंसर्गवि
युक्तस्वरूपेणावस्थितआत्मेत्यर्थः॥ यमेवंभूतस्वरूपेणावस्थितंप्राप्यननिवर्तंतेतन्ममपरंधामपरमंनिय
मनस्थानंअचेतनप्रकृतिरेकंनियमनस्थानंतत्संसृष्टजीवरूपाप्रकृतिर्द्वितीयंनियमनस्थानं॥ अचित्सं
सर्गवियुक्तंस्वरूपेणावस्थितंपरमंनियमनस्थानमित्यर्थः॥ तच्चापुनरावृत्तिरूपं अथवा प्रकाशवाचीधा

॥अव्यक्तोक्षरइत्युक्तस्तमाहुःपरमांगतिं॥यंप्राप्यननिवर्तंतेतद्धामपरमंमम॥२१॥

मशब्दःप्रकाशश्चज्ञानमभिप्रेतंप्रकृतिसंसृष्टात्परिच्छिन्नज्ञानरूपादात्मनोऽपरिच्छिन्नज्ञानरूपतयामुक्तस्व
रूपंपरमंधाम॥२१॥ ज्ञानिनः प्राप्यंतुयत्तदस्मादत्यंतविभक्तमित्याह॥ पुरुषइति॥ मत्तःपरतरंनान्यत्मयि
सर्वमिदंप्रोतंमामेभ्यःपरमव्ययमित्यादिनानिर्दिष्टस्ययस्यांतःस्थानिभूतानियेनपरेणपुरुषेणसर्वमिदं
ततंसःपरःपुरुषोऽनन्ययाभक्त्यालभ्यः॥ आत्मयाथात्म्यविदःपरमपुरुषनिष्ठस्यचसाधारणीमर्चिरादि
कांगतिमाह॥ द्वयोरप्यर्चिरादिकागतिःश्रुतौश्रुतासाचापुनरावृत्तिलक्षणायथापंचाग्निविद्यायांतद्य छां·प्र·५ खं·१०

अग्निः ज्योतिरिति हि अर्चिमार्गाभिमानिनी देवता

इत्युक्तं विदुर्ये चेमेरण्ये श्रद्धा तप इत्युपासते तेर्चिषमभिसंभवंत्यर्चिषोऽहरित्यादौ अर्चिरादिकया गत्या गतस्य
परब्रह्मप्राप्तिरपुनरावृत्तिश्चोक्ता पुरुषोऽमानवः स एतान् ब्रह्म गमयति। एष देवपथो ब्रह्मपथ एतेन प्रतिपद्य
मानाइमं मानवमावर्त्तं नावर्त्तंत इति। न च पञ्चाग्निविद्योदितपरविद्याङ्गभूतान् प्राप्तिविषयात्तद्य इत्थं विदुरि
ति गतिश्रुतिः। ये चेमेरण्ये श्रद्धा तप इत्युपासत इति परविद्यायाः पृथक् श्रुतिवैयर्थ्यात्। पंचाग्निविद्यायां च
वं च यथा मा कृतावापः पुरुष एव च सो नवंती निरमणीयचरणाः कपूयचरणा इति पुण्यपापहेतुको मनुष्यादि

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया। यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततं॥२२॥ भावोपामेव भूतो
ऋसं भूतानामात्मनस्तत्परिगंगमात्रमिति चिरचितो विवेकमभिधाय तद्य इत्थं विदुस्तेर्चिषमभिसंभवंति इ
मं मानवमावर्त्तं नावर्त्तंत इति विविक्ते चिरविश्लक्ष्णीभूयाज्ञतया प्राप्यतया च तद्य इत्थं विदुस्तेर्चिरादिना गच्छंति
न च पुनरावर्त्तंत इत्युक्तमिति गम्यते। आत्मयाथात्म्यविदः परमपुरुषनिष्ठस्य स एनान् ब्रह्म गमयतीति श्रु
त्यप्राप्तिवचनात्। अचिद्विमुक्तं आत्मवस्तु ब्रह्मात्मकतया ब्रह्मशेषतैकरसमित्यनुसंधेयं परशेषतै
करसत्वं च यस्यात्मनि तिष्ठन्नित्यादिश्रुतिसिद्धं॥२२॥ ॥श्री॥

७२॥

यत्रेति। अत्र कालशब्दो मार्गस्याहःप्रभृतिसंवत्सरान्तकालाभिमानिनी देवताभूयस्त्वया मार्गोपलक्षणा
र्थः। यस्मिन्मार्गे प्रयाता योगिनो नावृत्तिं पुण्यकर्माण आवृत्तिं यान्ति तं मार्गं वक्ष्यामीत्यर्थः॥२३॥ अग्निरि
ति। अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणमिति संवत्सरादीनां प्रदर्शनं॥२४॥ धूम इति। एतच्च
धूममार्गस्थपितृलोकादेः प्रदर्शनं। अत्र योगिशब्दः पुण्यकर्मसंबंधिविषयः॥२५॥ शुक्लकृष्णे इति॥

॥ यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥२३॥

॥ अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणं। तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः॥२४॥

॥ धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनं। तत्र चान्द्रमसं ज्योतिर्योगी प्राप्य निवर्त्तते॥२५॥

॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययावर्त्तते पुनः॥२६॥

शुक्ला गतिरर्चिरादिका कृष्णा च धूमादिका शुक्लया त्वनावृत्तिं याति कृष्णया तु पुनरावर्त्तते एते शुक्लकृ
ष्णे गती ज्ञानिनां द्विविधानां पुण्यकर्मणां च श्रुतौ शाश्वते मते तद्य इत्थं विदुर्ये चेमेरण्ये श्रद्धा तप इत्युपास
ते तेर्चिषमभिसंभवंति। अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीति॥२६॥

वेत्तेइति ॥ एतौ मार्गौ जानन् योगी प्रयाणकाले कश्चन न मुह्यति ॥ अपि तु स्वेनैव देवयानेन पथा याति तस्माद
हरहः सर्चिरादिगतिचिंतनाख्ययोगयुक्तो भव ॥ २७ ॥ अथाध्यायद्वयोदितज्ञानस्यार्थवेदनफलमाह ॥ वेदेषि
ति ॥ ऋग्यजुः सामाथर्वरूपवेदाभ्यासयज्ञतपोदानप्रभृतिषु पुण्येषु सर्वेषु यत्फलं निर्दिष्टं ॥ इदमध्यायद्वयो
दितं भगवन्माहात्म्यं विदित्वा तत्सर्वमत्येति एतद्वेदनसुखातिरेकेण तत्सर्वं तृणवन्मन्यते ॥ योगी ज्ञानी च भू
त्वा ज्ञानिनः प्राप्यं परमाद्यं स्थानमुपैति ॥ २८ ॥ इति श्रीमद्रामानुजाचार्यविरचिते गीताभाष्येऽष्टमोऽध्यायः ॥ ८

नैते सृती पार्थ जानन् योगी मुह्यति कश्चन । तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ॥ २७

वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफलं प्रदिष्टं ॥ अत्येति तत्सर्वमिदं विदित्वा योगी परं स्थानमुपैति चाद्यं ॥ २८
इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे महापुरुषयोगो नामाष्टमोऽध्या
यः ॥ ८ ॥ श्रीभगवानुवाच ॥ इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे ॥ ज्ञानं विज्ञानसहितं यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥ १

उपासकभेदनिबंधना विशेषाः प्रतिपादिताः इदानीमुपास्यस्य परमपुरुषस्य माहात्म्यं ज्ञानिनां च विशेषं वि
शोध्य भक्तिरूपस्योपासनस्य स्वरूपमुच्यते इदमिति ॥ इदं गुह्यतमं भक्तिरूपमुपासनाख्यं ज्ञानं विज्ञानसहितं तदुपा
सनगतविशेषज्ञानसहितमनसूयवे ते प्रवक्ष्यामि मद्विषयं सकलेतरविसजातीयमपरिमितप्रकारमाहात्म्यं
श्रुत्वैवमेवं संभवतीति मन्वानाय ते प्रवक्ष्यामीत्यर्थः ॥ यज्ज्ञानं वक्ष्यमाणमनुष्ठानपर्यंतं ज्ञात्वा मत्प्राप्तिविरोधिनः

सर्वस्मा

राजविद्येति ॥ राजविद्या विद्यानां राजा राजगुह्यं गुह्यानां राजा राज्ञां विद्या राजविद्येति वा राजानो हि विस्तीर्ण
गाधमनसः महामनसामियं विद्येत्यर्थः ॥ महामनस एव हि गोपनीयगोपनकुशला इत्यर्थः ॥ तेषामेव गु
ह्यमिदमुत्तमं पवित्रं मत्प्राप्तिविरोध्यशेषकल्मषापहं प्रत्यक्षावगमं अवगम्यत इत्यवगमो विषयः प्रत्यक्ष
भूतोऽवगमो विषयो यस्य ज्ञानस्य तत्प्रत्यक्षावगमं भक्तिरूपेणोपासनेनोपास्यमानोऽहं तदानीमेवोपासितुः
प्रत्यक्षतामुपगतो भवामीत्यर्थः ॥ अथापि धर्म्यं धर्मादनपेतं धर्मत्वं हि निःश्रेयससाधनत्वं स्वरूपेणैवात्य

राजविद्या राजगुह्यं पवित्रमिदमुत्तमं ॥ प्रत्यक्षावगमं धर्म्यं सुसुखं कर्तुमव्ययं ॥ २ ॥ अश्रद्दधानाः पुरुषा ध
र्मस्यास्य परंतप ॥ अप्राप्य मां निवर्तंते मृत्युसंसारवर्त्मनि ॥ ३ ॥

र्थप्रियत्वेन तदानीमेव मद्दर्शनापादनतया च स्व
यं निःश्रेयसस्वरूपमपि निरतिशयनिःश्रेयसरूपात्यंतिकमत्प्राप्तिसाधनमित्यर्थः ॥ अत एव सुसुखं कर्तुं
सुसुखोपादानमित्यर्थः ॥ प्रियत्वेनोपादेयम् अव्ययमक्षयं मत्प्राप्तिं साधयित्वापि स्वयं न क्षीयते एवंरूपमुपास
नं कुर्वतो मत्प्रदाने कृतेऽपि न किंचित्कृतं मयास्येति हि भातीत्यर्थः ॥ २ ॥ अश्रद्दधाना इति ॥ अस्योपासना
ख्यस्य धर्मस्य निरतिशयप्रियमद्विषयतया स्वयं निरतिशयप्रियरूपस्य परमनिःश्रेयसस्वरूपमत्प्राप्ति

सानिनः

साधनस्यास्य धर्मस्योपादानयोग्यदशायां प्राप्य अश्रद्दधानाः विश्वासपूर्वकमनादरवन्तः पुरुषास्ते माम्
अप्राप्य मृत्युरूपे संसारवर्त्मनि निवर्तन्ते॥ अहो महदिदमाश्चर्यमित्यर्थः॥३॥ शृणु तावन्मत्प्रभूतस्य
ममाचिन्त्यमहिमानं॥ मयेति॥ नचेति॥ इदं चेतनाचेतनात्मकं कृत्स्नं जगदव्यक्तमूर्तिना अप्रकाशितस्वरू
पेण मयान्तर्यामिणा ततं॥ अस्य जगतो धारणार्थं नियमनार्थं च शेषित्वेन व्याप्तमित्यर्थः॥ तथान्तर्यामिब्रा
ह्मणे यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्यात्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेदेति चे

॥मया ततमिदं सर्वं जगदव्यक्तमूर्तिना॥ मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः॥४॥

(कर्तरि तृतीया)

तथा चेतनवस्तुजातैरदृष्टेनान्तर्यामिणा तत्र तत्र व्याप्तिरुक्ता ततो मत्स्थानि सर्वभूतानि सर्वाणि भूतानि
मयि स्वान्तर्यामिणि स्थितानि तथैव ब्राह्मणे यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयतीति यस्यात्मा शरीरं
य आत्मानमन्तरो यमयतीति शरीरत्वेन नियाम्यकत्वप्रतिपादनात्तदायत्ते स्थितिनियमने प्रतिपादिते
इति शेषित्वं न चाहं तेष्ववस्थितः अहं च न तदायत्तस्थितिः मत्स्थितौ न तैः कश्चिदुपकार इत्यर्थः॥४ ७३॥

नचेति

न च मत्स्थानि भूतानि न घटादीनां जलादेरिव मम धारकत्वं कथं मत्संकल्पेन पश्य मे ऐश्वरं योगं अन्यत्र
कुत्रचिदसंभावनीयं मदसाधारणमाश्चर्ययोगं पश्य कोऽसौ योगः भूतभृन्न च भूतस्थो ममात्मा भूतभाव
नः सर्वेषां भूतानां भर्ताहं न च तैः कश्चिदपि मम उपकारः ममात्मैव भूतभावनः मम मनोमयः संकल्प एव
भूतानां भावयिता नियन्ता च सर्वस्यास्य संकल्पायत्तस्थितिप्रवृत्तित्वे निदर्शनमाह॥ यथेति यथा
काशे निरालम्बे महान् वायुः स्थितः सर्वत्र गच्छति स तु वायुर्निरालंबनो मदायत्तस्थितिरिति मय्येव

॥न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥५॥
॥यथाकाशस्थितो नित्यं वायुः सर्वत्रगो महान् तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय॥६॥

धृत इति विज्ञायते तथैव सर्वाणि भूतानि तैरसंस्पृष्टे मयि स्थितानि मयैव धृतानीत्युपधारय॥ यथा
हुर्वेदविदः मेघोदयः सागरसंनिवृत्तिरिन्दोर्विभागः स्फुरणानि वायोः॥ विद्युद्विभंगो गतयश्चर
श्मेर्विष्णोर्विचित्राः प्रभवन्ति माया इति विष्णोरनन्यसाधारणानि सर्वैश्वर्याणीत्यर्थः एतस्य वाक्षस
रस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः भीषास्माद्वातः पवते भीषोदेति सूर्यः भीषास्मादग्नि

न्निक्षेऽस्मृतसुषोवत्ति पंचम इत्युक्तः सकलेतरनिरपेक्ष भगवत्संकल्पात्सर्वेषां स्थितिः प्रवृत्तिश्चोक्ता त
थात्संकल्पादेव सर्वेषामुत्पत्तिप्रलयावपीत्याह ॥ सर्वभूतानीति ॥ स्थावरजंगमात्मकानि सर्वाणि भूता
नि मामिकां मच्छरीरभूतां प्रकृतिं तमः शब्दवाच्यां नामरूपविभागानर्हां कल्पक्षये चतुर्मुखावसानसमये
मत्संकल्पाद्यान्ति ॥ तान्येव भूतानि कल्पादौ विसृजाम्यहं यथाह मनुः ॥ आसीदिदं तमोभूतं सोऽभिध्याय शरी

॥ सर्वभूतानि कौन्तेय प्रकृतिं यान्ति मामिकाम् ॥ कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥ ७ ॥ प्रकृतिं स्वामवष्टभ्य विसृजामि पुनः पुनः ॥ भूतग्राममिमं कृत्स्नमवशं प्रकृतेर्वशात् ॥ ८ ॥

रात्स्वादिति ॥ श्रुतिरपि अव्यक्तमक्षरे लीयते अक्षरं तमसि लीयते तमः परे देव एकीभवतीति तम आसीत्त
मसा गूढमग्रे प्रकेतमिति च ॥ ७ ॥ प्रकृतिमिति ॥ स्वकीयां विचित्रपरिणामिनीं प्रकृतिमवष्टभ्य अष्टधा परि
णामय्येमं चतुर्विधं देवतिर्यङ्मनुष्यस्थावरात्मकं भूतग्रामं मदीयाया मोहिन्याः गुणमय्याः प्रकृतेर्वशा
त् अवशं काले काले पुनर्विसृजामि ॥ ८ ॥ ॥ ॥



[illegible]

अ॰२पा॰१सू॰३३

एवं तर्हि विषमसृष्ट्यादीनि कर्माणि नैर्घृण्यापादनेन भगवन्तं निबध्नन्तीत्यत आह ॥ न च मामिति ॥ विषमसृष्ट्या
दिकर्माणि मां न निबध्नन्ति मयि नैर्घृण्यादिकं नापादयन्ति यतः क्षेत्रज्ञानां पूर्वकृतान्येव कर्माणि देवादिभा
वहेतवः अहं तु तत्र वैषम्ये असक्तस्तथोदासीनवदासीनः यथाह सूत्रकारः वैषम्यनैर्घृण्ये न सापेक्ष
त्वात् तथा हि दर्शयति न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते चेति ॥ ९ ॥ मयेति ॥ त
स्मात् क्षेत्रज्ञकर्मानुगुणं मदीया प्रकृतिः सत्यसंकल्पेन मयाध्यक्षेणेक्षिता चराचरं जगत् सूयते ॥ अने

॥ न च मां तानि कर्माणि निबध्नन्ति धनंजय ॥ उदासीनवदासीनमसक्तं तेषु कर्मसु ॥ ९ ॥ मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ॥ हेतुनानेन कौन्तेय जगद्विपरिवर्तते ॥ १० ॥

न क्षेत्रज्ञकर्मानुगुणमदीक्षणेन हेतुना जगद्विपरिवर्तत इति मन्तव्यं सत्यसंकल्पत्वं नैर्घृण्यादिदोष
रहितत्वमित्येवमादि वसुदेवसूनोरैश्वर्ययोगं प्रपञ्चयत्याह श्रुतिः अस्मान्मायी सृजते विश्वमेतत्तस्मिं
श्चान्यो मायया संनिरुद्धः मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति ॥ १० ॥ अवजानन्तीति ॥ मां भूत
महेश्वरं सर्वज्ञं सत्यसंकल्पं निखिलजगदेककारणं परमकारुणिकतया सर्वेषामाश्रयणीयत्वाय मानु

अ॰१पा॰१सू॰३३ [illegible]

यीनतनुमाश्रितं॥ एवंलक्षणमिदंपरंभावमजानंतोमनुष्यत्वसमाश्रयणमात्रेणमामितरसमजातीयंमत्वा
तिरस्कुर्वंतीत्यर्थः॥११॥ मोघाशाइति॥ ममनुष्यत्वेपरमकारुण्यादिपरत्वतिरोधानकरींराक्षसींचा
सुरींचमोहिनींप्रकृतिमाश्रिताः मोघाशाः मोघवांछिताः मोघकर्माणोमोघारंभाः मोघज्ञानाः सर्वेषुम
दीयेषुसचराचरेषुमयिचविपरीतत्वज्ञानाः विचेतसः सर्वत्रविगतयथार्थज्ञानाः मांसर्वेश्व
रमितरसमंज्ञात्वाऽप्रत्ययवंतंकर्तुमिच्छंतियमुद्दिश्यारंभान्कुर्वंति॥ तत्सर्वंमोघंभवतीत्यर्थः॥१२॥ महा

अवजानंतिमांमूढामानुषींतनुमाश्रितं॥ परंभावमजानंतोममभूतमहेश्वरं॥११॥ मोघाशामोघकर्माणो
मोघज्ञानाविचेतसः॥ राक्षसीमासुरींचैवप्रकृतिंमोहिनींश्रिताः॥१२॥ महात्मानस्तुमांपार्थदैवींप्रकृतिमा
श्रिताः॥ भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययं॥१३॥

त्मानइति॥ येतुस्वकृतैःपुण्यसंचयैर्मांशरणमुपाग
मविध्वस्तसमस्तपापबंधाः दैवींप्रकृतिमाश्रितामहात्मानस्तेभूतादिमव्ययंवाङ्मनसागोचरकर्मस्वरूपंप
रमकारुणिकतयासाधुपरित्राणायमनुष्यत्वेनावतीर्णंमांज्ञात्वानन्यमनसोभजंतिमत्प्रियत्वातिरेकेण
मद्भजनेनविनामनसआत्मनश्चबाह्यकरणानांचधारणमलभमानामद्भजनैकप्रयोजनाभजंति॥१३॥ ७५॥

सततमिति॥ अत्यर्थमत्प्रियत्वेनमत्कीर्तनयतननमस्कारैर्विनाक्षणमात्रमप्यात्मधारणमलभमा
नाः मद्गुणविशेषवाचीनिनामानिस्मृत्वापुलकितसर्वांगाहर्षगद्गदकंठानारायणकृष्णवासुदेवेत्येव
मादीनिसततंकीर्तयंतस्तथैवतंतः मत्कर्मार्चनादिकेषुवंदनस्तवनकरणादिकेषुचदृढसंकल्पायतमा
नाभक्तिभरावनमितमनोबुद्ध्यभिमानपदद्वयकरद्वयशिरोभिरष्टांगैरचिंतितपांसुकर्दमादिकेषुधरणि
तलेषुदंडवत्प्रणिपतंतः संतः मांनित्ययुक्तानित्ययोगंकांक्षमाणामहात्मानः ममदास्यमेवसाधिनरूपा

सततंकीर्तयंतोमांयतंतश्चदृढव्रताः॥ नमस्यंतश्चमांभक्त्यानित्ययुक्ताउपासते॥१४॥ ज्ञानयज्ञेनचाप्य
न्येयजंतोमामुपासते॥ एकत्वेनपृथक्त्वेनबहुधाविश्वतोमुखं॥१५॥

सते॥१४॥ ज्ञानेति अन्येपिमहात्मा
नः पूर्वोक्तैः कीर्तनादिभिः ज्ञानाख्येनयज्ञेनचयजंतोमामुपासते॥ कथंबहुधापृथक्त्वेनजगदाकारेणवि
श्वतोमुखंविश्वप्रकारत्वेनावस्थितंमामेकत्वेनोपासते॥ एतदुक्तंभवति॥ भगवान्वासुदेवएवनामरूप
विभागानर्हातिसूक्ष्मचिदचिद्वस्तुशरीरः सत्यसंकल्पोविविधविभक्तनामरूपस्थूलचिदचिद्वस्तुशरीर
ः स्यामितिसंकल्प्यः सएकएवदेवतिर्यङ्मनुष्यस्थावराख्यविचित्रजगच्छरीरोवतिष्ठतइत्यनुसंधानाद्बहुधामामु
पासतइति॥१५॥

[illegible]

॥गी॰भा॰ ॥७६॥ तथा हि ॥ विश्वशरीरोऽहमेवावस्थित इत्याह ॥ अहमिति ॥ अहं क्रतुः ज्योतिष्टोमादिक्रतुरहमेव यज्ञो महा ॥श्री॰॥
यज्ञोऽहमेव स्वधा पितृगणपुष्टिदायिनी औषधं हविः स्वाहाहमेव च अहमेव मंत्रोऽहमेवाज्यं प्रदर्शनार्थमि
दं अन्नादिकं च हविरहमेव अहमाहवनीयादिकोऽग्निः होमश्चाहमेव ॥१६॥ पिताहमिति ॥ अस्य स्थावर
जंगमात्मकस्य जगतस्तत्र तत्र पितृत्वेन मातृत्वेन पितामहत्वेन च वर्तमानोऽहमेव धाता तज्ज्ञाद्यो माता पि
तृव्यतिरिक्तव्यन्नियोजकः ॥ चेतनविशेषवर्तितेयत्किंचिद्वेद्यं पवित्रं पावनं तदहमेव ऋगादिवेदो वे

अहं क्रतुरहं यज्ञः स्वधाहमहमौषधं । मंत्रोऽहमहमेवाज्यमहमग्निरहं हुतं ॥१६॥ पिताहमस्य जगतो माता धा
ता पितामहः ॥ वेद्यं पवित्रमोंकार ऋक्साम यजुरेव च ॥१७॥ गतिर्भर्ता प्रभुः साक्षी निवासः शरणं सुहृत्
प्रभवः प्रलयः स्थानं निधानं बीजमव्ययम् ॥१८॥

दबीजभूतः प्रणवश्चाहमेव ॥१७॥ गतिरिति ॥ गतिः शक्र
लोकप्रभृति प्राप्यस्थानं भर्ता धारयिता प्रभुः शासिता साक्षी साक्षाद्द्रष्टा निवासः वासस्थानं वेश्मादि
शरणं दुःखस्य नाशकतया अनिष्टस्य निवारणतया च सर्वेषामाश्रयणीयत्वेनतः सर्वाहमेवेति यः सुहृत्
हितैषी प्रभवः प्रभवस्थानं प्रलयः प्रलयस्थानं यस्य कस्यचित्कुत्रचित्प्रभवप्रलययोः स्थानं यत्तदहमेव
निधानं निधीयतऽस्मिन्निति निधानमुत्पाद्यमुपसंहार्यं वाहमेव अव्ययं बीजं तत्तत्र व्ययरहितं तत्कारणं अहमेव ॥२८॥

तपाम्यहमिति ॥ अहमेवादित्यरूपेण तपामि ग्रीष्मे अहमेव वर्षं निगृह्णामि तथा वर्षास्वपि चाहमेवोत्सृजा
मि ॥ अमृतं चैव मृत्युश्च येन जीवति लोको येन म्रियते च तदुभयमप्यहमेव किमत्र बहुनोक्तेन सदसच्चा
हमेव सद्वर्तं असद्वर्तं सर्वावस्थावस्थितं चिदचिद्विरूपं शरीरतया न तत्प्रकारोऽहमेवावस्थित इत्यर्थः
पाएवं बहुधा एकत्वेन नानाविधनामरूपैरवस्थितं कृत्स्नं जगच्छरीरतया तत्तत्प्रकारोऽहमेवावस्थित इत्येक
त्वज्ञानानुसंधानाच्च मामुपासते ते न एव महात्मानः ॥१९॥ एवं महात्मनां ज्ञानिनां भगवदनुभवैकभोगानां

॥ तपाम्यहमहं वर्षं निगृह्णाम्युत्सृजामि च ॥ अमृतं चैव मृत्युश्च सदसच्चाहमर्जुन ॥१९॥ त्रैविद्या मां सोम
॥पाः पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ॥ ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान् दिवि देवभोगान् ॥२०॥

इत्युक्त्वा तेषामेव विशेषं दर्शयितुमज्ञानां कामकारिणां वृत्तिमाह ॥ त्रैविद्या इति ॥ त्रैतमिति ॥ ऋग्यजुः
सामरूपास्तिस्रो विद्यास्त्रिविद्याः केवलं त्रिविद्यानिष्ठास्त्रैविद्या न तु त्रय्यन्तनिष्ठा अत्रय्यन्तनिष्ठा महात्मा
उ नः पूर्वोक्तप्रकारेणाखिलवेदवेद्यं मामेव ज्ञात्वातिमात्रभक्तिकारितकीर्तनादिना ज्ञानयज्ञेन च मामे
वोपासते त्रैविद्यास्तु वेदप्रतिपाद्यकेवलेन्द्रादियागशिष्टसोमं पिबन्तः पूतपापाः स्वर्गादिप्राप्तिवि

॥ गी॰भा॰ ९ ॥ गोधिपापाःपूतास्तैः केवलेंद्रादिदेवततयानुसंहितैर्यज्ञैर्वस्तुतस्तद्रूपं मामिष्ट्वा तथावस्थितं सोमं पिवं ॥ श्री॰ ॥
॥ ७७ ॥ तः स्वर्गतिं प्रार्थयंते ते पुण्यं दुःखांशरहितं सुरेंद्रलोकं प्राप्य दिव्यान्भोगानश्नंति ॥ ते तं विशालं स्वर्ग
लोकं भुक्त्वा तदनुभवहेतुभूते पुण्ये क्षीणे पुनरपि मर्त्यलोकं विशंति ॥ एवं त्रय्यंतसिद्धज्ञानविधुराः का
म्यस्वर्गादिकामाः केवलं त्रयीधर्ममनुप्रपन्ना गतागतं लभंते अल्पास्थिरस्वर्गादीननुभूयावर्त्य पुनः पु
नरावर्त्तंत इत्यर्थः महात्मानस्तु निरतिशयरूपं मच्चिंतनं कृत्वा मामनवधिकातिशयानंदं प्राप्य न पुनरा

॥ ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशंति ॥ एवं त्रयीधर्ममनुप्रपन्ना गतागतं का
मकामा लभंते ॥ २१ ॥ अनन्याश्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहं ॥ २२ ॥

वर्त्तंत इति तेषां विशेषं दर्शयति ॥ ॥ अनन्या इति ॥ अनन्याः अनन्यप्रयोजना मच्चिंतनेन विना आत्म
धारणाभावान्मच्चिंतनैकप्रयोजनाः मां चिंतयंतो ये महात्मानो जनाः पर्युपासते सर्वकल्याणगुणान्वितं
सर्वविभूतियुक्तं मां परितः उपासते तेषां नित्याभियुक्तानां मयि नित्याभियोगं कांक्षमाणानामहं मत्प्रा
प्तिलक्षणं योगं अपुनरावृत्तिलक्षणं क्षेमं च वहामि ॥ २२ ॥ ॥ श्री ॥ ॥ ७७ ॥

येप्यन्येति ॥ ये त्विंद्रादिदेवताभक्ताः केवलं तन्निष्ठाः श्रद्धयान्विता इंद्रादीन्यजंते तेऽपि उक्तेन न्यायेन स
र्वस्य मच्छरीरतया मदात्मकत्वेनेंद्रादिशब्दानां च मद्वाच्यत्वात् वस्तुतो मामेव यजंते ॥ अपि त्वविधिपूर्वकं
यजंते ॥ इंद्रादिदेवताराधनवचनं हि कर्मस्वाराध्यतयावस्थितानामिंद्रादीनां विबुधानामात्मभूतस्य पर
मपुरुषस्य साक्षादाराध्यत्वं विदधाति ॥ चतुर्होतारो यत्र संपदं गच्छंति देवैरिति श्रवणात् चतुर्होतारः अ
ग्निहोत्रदर्शपूर्णमासादीनि कर्माणि कुर्वाणाः यत्र परमात्मनि तत्तद्देवतांतर्यामितयावस्थिते तच्छरीर(भूतैः)

॥ येप्यन्यदेवताभक्ता यजंते श्रद्धयान्विताः ॥ तेपि मामेव कौंतेय यजंत्यविधिपूर्वकं ॥ २३ ॥
॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च ॥ न तु मामभिजानंति तत्त्वेनातश्च्यवंति ते ॥ २४ ॥

तैरिंद्रादिदेवैः सह संपदं गच्छंति ॥ इंद्रादिदेवतानामाराधनात्वेतानि कर्माणि मद्विषयाणीति ज्ञात्वा कुर्वंतो
मत्संपदं गच्छंतीत्यर्थः ॥ अथ ये त्वविद्या इंद्रादिशरीरस्य परमपुरुषस्याराधनान्येतानि कर्माणि आराध्यश्च
स एवेति न जानंति ते च परिमितफलभागिनश्च्यवनस्वभावाश्च भवंतीति तदाह ॥ ॥ अहं हीति ॥ प्रभुः त
त्तत्फलप्रदाता चाहमेवेत्यर्थः ॥ अहो महदिदं वैषम्यं यदेकस्मिन्नेव कर्मणि वर्तमानाः संकल्पमात्र

मेदेन केचिदल्पफलभागिनश्च्यवनस्वभावाश्च भवंति केचनानवधिकातिशयानंदपरमपुरुषप्रा
प्यफलभागिनोऽपुनरावर्त्तिनश्च भवंतीत्याह ॥२४॥ यांतीति ॥ व्रतशब्दः संकल्पवाची देवव्रताः दर्शपौर्ण
मासादिभिः कर्मभिरिंद्रादीनाराध्यत्वेनाभिसंकल्प्य इंद्रादियजनसंकल्पास्ते इंद्रादिदेवान् यांति पितृव्रताः पि
तृयज्ञादिभिः पितॄन् यजाम इति पितृयजनसंकल्पास्ते पितॄन् यांति ये च यक्षपिशाचादीनि भूतानि यजाम

॥ यांति देवव्रता देवान् पितॄन् यांति पितृव्रताः ॥
॥ भूतानि यांति भूतेज्या यांति मद्याजिनोऽपि मां ॥२५॥

इति भूतयजनसंकल्पास्ते भूतानि यांति ये तु तैरेव यज्ञैर्देवपितृभूतशरीरकं परमात्मानं भगवंतं वासुदेवं
यजाम इति मां यजंते ते मद्याजिनो मामेव यांति देवादिव्रताः देवादीन् प्राप्य तैः सह परिमितभोगं भुक्त्वा तेषां
विनाशकाले तैः सह नष्टा भवंति मद्याजिनस्तु मामनादिनिधनं सर्वज्ञं सत्यसंकल्पं अनवधिकातिशया
संख्येयकल्याणगुणगणमहोदधिमनवधिकातिशयानंदं प्राप्य न पुनर्निवर्त्तंत इत्यर्थः ॥२५॥ ७८॥

॥ मद्याजिनामयमपि विशेषोऽस्तीत्याह ॥ पत्रमिति ॥ पत्रं वा पुष्पं वा फलं वा तोयं वा यो भक्त्या मे प्रयच्छति अत्य
र्थमत्प्रियतया मत्संप्रदानेन विनात्मधारणमलभमानो यो मे पत्रादिकं ददाति ॥ तस्य प्रयतात्मनः
मत्प्रदानैकप्रयोजनत्वरूपभक्तियुक्तमनसस्तथाविधभक्त्युपहृतमहं सर्वेश्वरो निखिलजगदुदयवि
भवलयकर्त्ताऽनिरस्तसमस्तकामः सत्यसंकल्पोऽनवधिकातिशयासंख्येयकल्याणगुणगणः स्वाभा
विकानवधिकातिशयानंदस्वानुभवे वर्त्तमानोऽपि मनोरथपथो दूरवर्त्ती च तदश्नामि ॥ यथोक्तं मोक्ष

॥ पत्रं पुष्पं फलं तोयं यो मे भक्त्या प्रयच्छति ॥ तदहं भक्त्युपहृतमश्नामि प्रयतात्मनः ॥२६॥

धर्मे ॥ याः क्रियाः संप्रयुक्ताः स्युरेकांतगतबुद्धिभिः ताः सर्वाः शिरसा देवः प्रतिगृह्णाति वै स्वयम् ॥ इ
ति ॥ यस्मात् ज्ञानिनां महात्मनां वाङ्मनसागोचरोऽयं स्वभावः तस्मात्त्वं ज्ञानी भूत्वा उक्तलक्षणेन क्तिमा
दाराधनरतात्मा कीर्त्तनयजनार्चनप्रणामादिकं कुर्वाणो लौकिकं वैदिकं च नित्यनैमित्तिकं कर्म कुर्वि
त्याह ॥२७॥ यदिति ॥ यद्देहयात्रादिशेषभूतं लौकिकं कर्म करोषि यच्च देहधारणायाश्नासि यच्च वैदिकं

देहयात्राद्यर्थं लौकिकं

॥ श्रीगी० ९ होमदानतपः प्रभृति नित्यं नैमित्तिकं कर्म करोषि तत्सर्वं मदर्पणं कुरुष्व अर्प्यत इत्यर्पणं सर्वस्य लौ- अ० ९ ॥
॥ ७९ ॥ किकस्य वैदिकस्य च कर्मणः कर्तृत्वं भोक्तृत्वमाराध्यत्वं च यथा सर्वं समर्पितं भवति तथा कुरु एतदुक्तं
भवति ॥ यागदानादिद्वाराराध्यतया प्रतीयमानानां देवानां कर्मकर्तृत्वभोक्तृत्वादौ मदायत्ततया मदंशकल्प्या-
त्तस्वरूपस्थितिप्रवृत्तितया च मय्येव परमशेषिणि परमकर्तरि त्वं च कर्तारमाराध्यदेवतांश्च कृत्स्नमारा-
धनक्रियाजातं सर्वं समर्पयित्वा मन्नियाम्यतापूर्वकमच्छेषत्वैकरसतामाराध्यादेरित्येतत्स्वभावगर्भक

॥ यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणं ॥ २७ ॥
॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबंधनैः ॥ संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥

त्वं ज्ञात्वा मयि न्यस्तसर्वे प्रीतियुक्तो भवेति ॥ २७ ॥ शुभाशुभेति ॥ एवं संन्यासाख्ययोगयुक्तात्मा त्वं मच्छे-
षत्वेन मन्नियाम्यतयैकरसं कर्म च सर्वं मदाराधनमनुसंदधानो लौकिकं वैदिकं च कर्म कुर्वन् शुभाशु-
भफलैरनंतैः प्राचीनकर्माख्यैर्बंधनैर्मत्प्राप्तिविरोधिभिर्मोक्ष्यसे तैर्विमुक्तो मामेवोपैष्यसि ॥ ममैवं पर-
मपुरुषस्य स्वभावं च जानीहीत्याह ॥ २८ ॥ ॥ ॥ ७९ ॥

समोहमिति देवतिर्यक्मनुष्यस्थावरावस्थितेषु जातित आकारतः स्वभावतो ज्ञानतश्चात्यंतोत्कृष्टाप-
कृष्टरूपेण वर्तमानेषु सर्वेषु भूतेषु समाश्रयणीयत्वेन समोहं ममजात्याकारस्वभावज्ञानादिभिरुत्कृष्टाप-
कृष्टत्वं समाश्रयणे समा नमेवमस्तेष्ववस्थितत्वेन समाश्रितत्वव्यतिरेकेण जात्यादिभिरत्यंतोत्कृष्टोयमि-
तिनिकृष्टतया समाश्रयणे न कश्चित्प्रियोस्तीति न संग्राह्योस्ति तथात्यंतापकृष्टोयमिति न द्वेष्योस्ति ॥ अपि
त्वसर्थमत्प्रियत्वेन मद्भजनेन विनात्मधारणाभावात् मद्भजनैकप्रयोजना ये मां भजंते ते जात्यादिभिरु-

॥ समोहं सर्वभूतेषु न मे द्वेष्योस्ति न प्रियः ॥ ये भजंति तु मां भक्त्या मयि ते तेषु चाप्यहं ॥ २९ ॥

कृष्टा अपकृष्टा वा मत्समानगुणा यथासुखं मय्येव वर्तंते ॥ अहमपि तेषु मदुत्कृष्टेषु वर्ते तत्रापि ॥ २९ ॥
अपीति ॥ तत्र तत्र जातिविशेषज्ञानानां यः सदाचारस्तु पादेयोपरिहरणीयश्च तत्स्मादतिव्यतिरिक्तो मद्-
रूपप्रकारेण मामनन्यभाक् भजनैकप्रयोजनो भजते चेत्साधुरेव स सर्वैस्सवाश्च एवमंतव्यः पूर्वोक्तसम-
स्त्यर्थः ॥ कृत एतस्सम्यग्व्यवसितो हि सः यतोस्य व्यवसायः स समीचीनः भगवान्निखिलजगदाधा-
रभूतः परब्रह्मनारायणो मम स्वामी मम गुरुर्मम सुहृन्मम परं भोग्यमिति सर्वैर्दुःप्रयोगो यं व्यवसायस्ते

॥३०॥

न कृतस्तत्कार्यं चानन्यप्रयोजनं निरंतरभजनं तस्यास्ति अतः साधुरेव बहुमंतव्यः अस्यैवंव्यवसाये
तत्कार्ये चोक्तप्रकारभजने दृष्टे स्वल्पाचारव्यतिरिक्तत्वमस्य स्वल्पवैकल्यमिति न तावतानाद
रणीयः अपितु बहुमंतव्य इत्यर्थः॥ ननु नाविरतो दुश्चरितान्नाशांतो नासमाहितः॥ नाशांतमानसो
वापि प्रज्ञानेनैनमाप्नुयात् इत्यादिश्रुतेराचारव्यतिक्रम उत्तरोत्तरभजनोत्पत्तिप्रवाहं विरुणद्धीत्यत्राह
॥ क्षिप्रमिति मदीयत्वकारितानन्यप्रयोजनमद्भजनेन विधूतपापो निर्मूलितरजस्तमोगुणः

॥ अपि चेत्सुदुराचारो भजते मामनन्यभाक्॥ साधुरेव स मंतव्यः सम्यग्व्यवसितो हि सः॥३०॥
॥ क्षिप्रं भवति धर्मात्मा शश्वच्छांतिं निगच्छति॥ कौंतेय प्रतिजानीहि न मे भक्तः प्रणश्यति ३१॥

क्षिप्रं धर्मात्मा भवति क्षिप्रमेव एवंरूपभजनेन शश्वच्छांतिं निगच्छति॥ शाश्वतीमपुनरावर्तिनीमस्मात् विरु
द्धाचारनिवृत्तिमेव गच्छति कौंतेय त्वमस्मिन्नर्थे प्रतिज्ञां कुरु मद्भक्तौ प्रक्रांतविरुद्धाचारोपि न न
श्यति अपि तु मद्भक्तिमाहात्म्येन सर्वं विरोधिजातं नाशयित्वा शाश्वतीं विरोधनिवृत्तिमधिगम्य क्षिप्रं
परिपूर्णो भवति॥३१॥ ८०॥

मामिति॥ किमिति॥ स्त्रियो वैश्याश्च शूद्राश्च पापयोनयो मां व्यपाश्रित्य मम गतिं यांति किं पुनः पुण्ययोन
यो ब्राह्मणा राजर्षयश्च मद्भक्तिमाश्रिताः अतस्त्वं अनित्यमसुखं च नापत्रयाभिहतं तयाप्यसुखमिमं लोकं
प्राप्य मां भजस्व स्वधर्मे वर्तमानो मां भजस्व॥३२॥३३॥ भक्तिस्वरूपमाह॥ मन्मना इति॥ मन्मना भव मयि सर्वे ९
श्वरे निखिलहेयप्रत्यनीककल्याणैकताने सर्वज्ञे सत्यसंकल्पे निखिलजगदेककारणे परस्मिन्ब्रह्म

मां हि पार्थ व्यपाश्रित्य येपि स्युः पापयोनयः॥ स्त्रियो वैश्यास्तथा शूद्रास्तेपि यांति परां गतिं॥३२॥ किं पुन
र्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा॥ अनित्यमसुखं लोकमिमं प्राप्य भजस्व मां॥३३॥ मन्मना भव म
द्भक्तो मद्याजी मां नमस्कुरु॥ मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः॥३४॥

णि पुरुषोत्तमे पुंडरीकद
लामलायतेक्षणे स्वच्छनीलजीमूतसंकाशे युगपदुदितदिनकरसहस्रकिरणे लावण्यामृतमहो
दधावुदारपीवरचतुर्बाहावत्युज्ज्वलपीतांबरधरे अमलकिरीटमकरकुंडलहारकेयूरकटकादिभूषिते अपार
सौशील्यसौंदर्यमाधुर्यगांभीर्यौदार्यवात्सल्यजलनिधावनालोचितविशेषाशेषलोकशरण्ये सर्वस्वामि
नि तैलधारावदविच्छेदेन निर्निमेषमना भव॥ तदेव विशिनष्टि॥ मद्भक्तो मत्यंतप्रियत्वेन युक्तो मन्मना भवेत्यर्थः

पुनरपि विशिनष्टि ॥ मद्याजी अनवधिकातिशयप्रियमदनुभवकारितमद्यजनपरो भव ॥ यजनं नाम
परिपूर्णशेषवृत्तिः ॥ औपचारिकसांस्पर्शिकाभ्यवहारिकादिसकलभोगप्रदानरूपेण यागेन यथा मदनु
भवजनितनिरतिशयप्रियकारितमद्यजनपरो भव तथा मन्मना भव इत्युक्तं भवति पुनरपि विशिनष्टि
मां नमस्कुरु अनवधिकातिशयप्रियमदनुभवकारितात्यर्थप्रियाशेषशेषवृत्तावपर्यवस्यन्मय्यात्मनिन
तिमात्रे स्वत एव व्यवसायं कुरु ॥ मत्परायणः अहमेव परमयनं यस्यासौ मत्परायणः पुनर्मया विना
त्मधारणासंभावनतया मदाश्रय इत्यर्थः ॥ एवमात्मानं युक्त्वा मत्परायणस्त्वमेवमनवधिकातिश

॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे राजगुह्ययोगो नाम नवमोऽध्यायः

यितो मदनुभवसमर्थमनाः मामेवैष्यसि ॥ आत्मशब्दोऽत्र मनोविषयः ॥ एवंरूपेण मनसा मामनुभूय
मामिष्ट्वा मां नमस्कृत्य मत्परायणो मामेव प्राप्स्यसीत्यर्थः ॥ तदेवं लौकिकानि शरीरधारणार्थानि वैदि
कानि नित्यनैमित्तिकानि कर्माणि मत्प्रीतये मच्छेषतैकरसो मयैव कारित इति कुर्वन् सततं मत्कीर्तन
यजननमस्कारादिकान् प्रीत्या कुर्वाणो मन्नियाम्यं निखिलजगन्मच्छेषतयैकरसमिति चानुसंदधानो
ऽत्यर्थप्रियमद्गुणगणं चानुसंधाय मदुक्तलक्षणमिदमुपासनमुपाददानो मामेव प्राप्स्यसि ॥ ३४ ॥ इति श्री
मद्रामानुजाचार्यविरचिते गीताभाष्ये नवमोऽध्यायः ॥ ९ ॥

भक्तियोगः सपरिकर उक्तः ॥ इदानीं भक्त्युत्पत्तये तद्विवृद्धये च भगवतो निरंकुशैश्वर्यादिकल्याणगुणग
णानंत्यं कृत्स्नस्य जगतस्तच्छरीरतया तदात्मकत्वेन तत्प्रवर्त्यत्वं च प्रपंच्यते ॥ श्रीभगवानुवाच ॥ भूय
एवेति ॥ मम माहात्म्यं श्रुत्वा प्रीयमाणाय ते मद्भक्त्युत्पत्तिविवृद्धिरूपहितकाम्यया भूयो मम माहात्म्यप्र
पंचविषयमेव परमं वचो यत्तद्वक्ष्यामि तदवहितमनाः शृणु ॥ १ ॥ न मे विदुरिति ॥ सुरगणाः महर्षयश्च
अतींद्रियार्थदर्शिनोऽधिकतरज्ञाना अपि मे प्रभवं प्रभावं न विदुः मम नामकर्मस्वरूपस्वभावादिकं न

॥ श्रीभगवानुवाच ॥ भूय एव महाबाहो शृणु मे परमं वचः ॥ यत्तेऽहं प्रीयमाणाय वक्ष्यामि हितकाम्यया
१ ॥ न मे विदुः सुरगणाः प्रभवं न महर्षयः ॥ अहमादिर्हि देवानां महर्षीणां च सर्वशः ॥ २ ॥ जानंति य
तस्तेषां देवानां महर्षीणां च सर्वशः अहमादिः तेषां स्वरूपस्य ज्ञानशक्त्यादेश्चाहमेवादिः तेषां देवत्वं दे
वर्षित्वादिहेतुभूतपुण्यानुगुणं मया दत्तं ज्ञानं परिमितं अतस्ते परिमितज्ञाना मत्स्वरूपादिकं यथावन्न जा
नंति ॥ २ ॥ नदेतद्देवाद्यचिंत्यस्वरूपयाथात्म्यविषयं ज्ञानं मद्भक्त्युत्पत्तिविरोधिपापविमोचनोपायस्याह
॥ यो मामिति ॥ न जायत इत्यजः अनेन विकारिद्रव्यादचेतनात्तत्संसृष्टात्सांसारिकचेतनाच्च विसजाती

त्व

यं मुक्तं ॥ सांसारिकचेतनस्य हि कर्मकृतात्विचित्रसंसर्गाज्जन्म ॥ अनादिमित्यनेन पदेनादिमतो ज्ञानमुक्तात्म
नो विसजातीयत्वमुक्तं ॥ मुक्तात्मनोऽह्यजत्वमादिमत्तस्य हेयसंबंधस्य पूर्ववृत्तत्वात्तदर्हतास्ति अनादि
मित्यनेन तदनर्हतया तस्यासनीकतोच्यते निरवद्यं निरंजनमित्यादिश्रुत्या च एवं हेयसंबंधप्रत्यनीक
स्वरूपतया तदनर्हं मामजं लोकमहेश्वरं मर्त्येषु संमूढो यो वेत्ति ॥ इतरसजातीयतयैकीकृत्य मोहः संमो
हः तद्रहितोऽसंमूढः स मदजन्मोत्पत्तिविरोधिभिः सर्वपापैः प्रमुच्यते एतदुक्तं भवति ॥ लोके मनुष्याणां राजे

॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरं ॥ असंमूढः स मर्त्येषु सर्वपापैः प्रमुच्यते ३ ॥

तरमनुष्यसजातीयः
केनचित्कर्मणा तदाधिपत्यं प्राप्तः तथा देवानामधिपतिरपि ॥ तथा ब्रह्मांडाधिपतिरपि नरसंसारिस
जातीयः तस्यापि भुवनत्रयांतर्गतत्वात् ॥ यो ब्रह्माणं विदधातीति श्रुतेश्च तथान्येपि ये केचनाणिमा
द्यैश्वर्यं प्राप्ताः अयं तु लोकमहेश्वरः कार्यकारणवस्थाद्बद्धचेतनात् बद्धान्मुक्ताच्चाचेतनाद्दीशितव्यात्सर्व
स्मान्निखिलहेयप्रत्यनीकानवधिकातिशयासंख्येयकल्याणगुणैकतानतया नियंतृत्वैकस्वभावतया
च विसजातीय इतीतरसजातीयतया मोहरहितो यो मां वेत्ति स सर्वपापैः प्रमुच्यत इति ॥ ३ ॥ ॥

एवं स्वस्वभावानुसंधानेन भक्त्युत्पत्तिविरोधिपापनिरसनं विरोधिनिरसनादेवार्थतो भक्त्युत्पत्तिं च प्रतिपा
द्य स्वैश्वर्यस्वकल्याणगुणप्रकारानुसंधानेन भक्तिविवृद्धिप्रकारमाह ॥ बुद्धिरिति ॥ अहिंसेति ॥ बुद्धिर्म
नसो चिदचिद्वस्तुनिरूपणसामर्थ्यं ॥ ज्ञानं चिदचिद्वस्तुविशेषविषयो निश्चयः असंमोहः पूर्वगृहीता
ज्जतादेः विसजातीयशुक्तिकादिवस्तुनि सजातीयता बुद्धिनिवृत्तिः ॥ क्षमा मनोविकारहेतौ सत्यविकृत
मनस्त्वं ॥ सत्यं यथादृष्टविषयं भूतहितरूपवचनं तच्च सत्यं तदनुगुणमनोवृत्तिभिरभीष्टाधिभिः प्रयत

॥ बुद्धिर्ज्ञानमसंमोहः क्षमा सत्यं दमः शमः ॥ सुखं दुःखं भवोऽभावो भयं चाभयमेव च ४ ॥

मनोवृत्तिप्रकारकं ॥ दमः सर्वबाह्यकरणानामनर्थविषयेभ्यो नियमनं ॥ शमोंतःकरणस्य तथानि
यमनं सुखमात्मानुकूलानुभवः ॥ दुःखं प्रतिकूलानुभवः ॥ भवो भवनं अनुकूलानुभवहेतुकं मनसोभ
वनं ॥ अभावः प्रतिकूलानुभवहेतुको मनसो विषादः ॥ भयमागामिनो दुःखस्य हेतुदर्शनजं दुःखं तन्नि
वृत्तिरभयं ॥ अहिंसा परदुःखाहेतुत्वं ॥ समता आत्मनि सुहृत्सु विपक्षेषु चार्थानर्थयोः सममति
त्वं ॥ तुष्टिः सर्वेषु लाभालाभेषु तोषस्वभावत्वं ॥ तपः शास्त्रीयसंभोगसंकोचरूपः कायक्लेशः ॥ दानं स्व

कीयभोग्यानांपरस्मैप्रतिपादनं॥यशोगुणवत्ताप्रथा।अयशोनैर्गुण्यप्रथा।एतेकीर्त्यकीर्त्यंतगुणामनोवृ
त्तिविशेषायत्तेमनोवृत्तिप्रकरणात्तपोदानेचतेथाएवमाद्याः सर्वेषांभूतानांभावाः प्रवृत्तिनिवृत्तिहेतवो
मनोवृत्तयोमत्तएवमत्संकल्पायत्ताभवंति॥४॥५॥ सर्वस्यभूतजातस्यसृष्टिस्थित्योः प्रवर्तयितारश्चमत्सं
कल्पायत्तप्रवृत्तयइत्याह॥ महर्षयइति॥ पूर्वेसप्तमहर्षयोऽतीतमन्वंतरेयेभृग्वादयः सप्तमहर्षयोनित्यसृ

॥ अहिंसासमतातुष्टिस्तपोदानंयशोऽयशः॥ भवंतिभावाभूतानांमत्तएवपृथग्विधाः॥५॥
॥ महर्षयः सप्तपूर्वेचत्वारोमनवस्तथा॥ मद्भावामानसाजातायेषांलोकइमाः प्रजाः॥६॥

ष्टिप्रवर्त्तनायब्रह्मणोमनः संभवाः नित्यस्थितिप्रवर्त्तनाययेचसावर्णिकादयः चत्वारोमनवः स्थि
तायेषांसंतानभूतेलोकेजाताइमाः सर्वाः प्रजाः प्रतिक्षणमाप्रलयादपत्यानामुत्पादकाः पालकाश्च
भवंतितेभृग्वादयोमहर्षयोमनवश्चमद्भावाममयोभावः सएवभावोयेषांतेमद्भावाः मत्संकल्पानुव
र्तिनइत्यर्थः॥६॥ ॥८३॥

एतामिति॥ विभूतिरैश्वर्यंएतांसर्वस्यमदायत्तोत्पत्तिस्थितिप्रवृत्तिरूपांममहेयप्रत्यनीककल्याणगु
णाख्ययोगंचयस्तत्त्वतोवेत्तिसोऽविकंपेनाप्रकंपेनभक्तियोगेनयुज्यतेनात्रसंशयः मद्विभूतिवि
षयंकल्याणगुणविषयंचज्ञानंभक्तियोगवर्द्धनमितिस्वयमेवद्रक्ष्यसीत्यभिप्रायः॥विभूतिज्ञानवि
पाकरूपांभक्तिवृद्धिंदर्शयति॥ ॥अहमिति॥ अहंसर्वस्यचिदचिद्वस्तुप्रपंचस्यप्रभवउत्पत्तिकारणं

॥ एतांविभूतिंयोगंचममयोवेत्तितत्त्वतः॥सोऽविकंपेनयोगेनयुज्यतेनात्रसंशयः॥७॥
॥ अहंसर्वस्यप्रभवोमत्तः सर्वंप्रवर्त्तते॥इतिमत्वाभजंतेमांबुधाभावसमन्विताः॥८॥
॥ मच्चित्तामद्गतप्राणाबोधयंतः परस्परं॥कथयंतश्चमांनित्यंतुष्यंतिचरमंतिच॥९॥

सर्वंमत्तएवचप्रवर्त्ततइतिइमंममस्वाभाविकंनिरंकुशैश्वर्यंसौंदर्यसौशील्यवात्सल्यादिकल्याणगु
णगणयोगंचमत्वाबुधाज्ञानिनोभावसमन्विताः मांसर्वकल्याणगुणान्वितंभजंतेभावोमनोवृत्ति
विशेषः मयिस्पृहावंतोमांभजंतइत्यर्थः॥८॥कथंमच्चित्तामयिनिविष्टमनसः मद्गतप्राणामद्गतजी
विताः मयाविनाऽऽत्मधारणमलभमानाइत्यर्थः स्वैः स्वैरनुभूतान्मद्गुणान्परस्परंकथयंतश्च

मदीयानि दिव्यानि रमणीयानि च कर्माणि कथयंतस्तुष्यंति च रमंति च वक्तारः श्रोतॄन् प्रश्नेनानन्यप्रयो-
जनेन तुष्यंति श्रोतारश्च तच्छ्रवणेनानवधिकातिशयप्रियेण रमंते ॥९॥ तेषामिति ॥ तेषां सततयुक्तानां
मयि सततं योगमाकांक्षमाणानां मां भजमानानां तमेव बुद्धियोगं विपाकदशामापन्नं प्रीतिपूर्वकं ददा-
मि येन ते मामुपयांतीति किंच ॥१०॥ तेषामिति ॥ तेषामेवानुकंपार्थमहमात्मभावस्थस्तेषां मनोवृत्तिविष-

॥ तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं ॥ ददामि बुद्धियोगं तं येन मामुपयांति ते ॥१०॥
॥ तेषामेवानुकंपार्थमहमज्ञानजं तमः ॥ नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥११॥

यतयावस्थितो मदीयान्कल्याणगुणगणांश्चाविःकुर्वन्मद्विषयज्ञानाख्येन स्वसजातीयेन भास्वता
दीपेन ज्ञानविरोधिप्राचीनकर्मरूपाज्ञानजं मद्व्यतिरिक्तविषयप्रावण्यरूपं पूर्वाभ्यस्तं तमो नाशया ८४॥
॥मि॥११॥



एवं सकलेतरविसजातीयभगवदसाधारणं शृण्वतां निरतिशयानंदजनकं कल्याणगुणयोगं तदै-
श्वर्यं विभूतिं च श्रुत्वा तद्विस्तारं ज्ञातुकामः ॥ अर्जुन उवाच ॥ परं ब्रह्मेति ॥ आकुश्चितिच परं
ब्रह्म परं धाम परमं पवित्रमिति यच्छ्रुतयो वदंति स एव भवान् यतो वा इमानि भूतानि जायंते येन जाता-
नि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्म ब्रह्मविदाप्नोति परं स यो ह वै तत्परं ब्रह्म वेद ॥ नारा-
यणः परं ब्रह्म तत्त्वं नारायणः पर इति श्रूयते ॥ तथा परं धाम धामशब्दो ज्योतिर्वचनः नारायणः परं

अर्जुन उवाच ॥ परं ब्रह्म परं धाम पवित्रं परमं भवान् ॥ पुरुषं शाश्वतं दिव्यमादिदेवमजं विभुं ॥१२॥

ज्योतिरात्मा नारायणः परः ॥ अथ यदतः परो दिवो ज्योतिर्दीप्यते परं ज्योतिरुपसंपद्य स्वेन रूपेणा-
भिनिष्पद्यते तं देवा ज्योतिषां ज्योतिरित्यादि श्रूयते च ॥ तथा परमं पवित्रं परमं पावनं स्मर्तुरशेषकल्म-
षविनाशकरं यथा पुष्करपलाशे आपो न श्लिष्यंत एवमेवंविदि पापं कर्म न श्लिष्यते तद्यथेषीकातूल-
मग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंते इति च श्रूयते पुरुषमिति ऋषयश्च सर्वे परावरतत्त्व-
याथार्थ्यविदस्त्वामेव शाश्वतं दिव्यं पुरुषमादिदेवमजं विभुं चाहुः तथैव देवर्षिर्नारदः असितो देवलो

॥गी·भा०॥ ९५॥ ॥अ·१०॥

आसंस्तु॥ एषनारायणः श्रीमान्क्षीरार्णवनिकेतनः॥ नागपर्य्यंकमुत्सृज्यह्यागतोमथुरांपुरीं॥१॥पुण्या
द्वारवतीतत्रयत्रास्तेमधुसूदनः॥ साक्षाद्देवः पुराणोसौसहिधर्मः सनातनः॥२॥ येचवेदविदोविप्रायेचा
ध्यात्मविदोजनाः॥ तेवदंतिमहात्मानंकृष्णंधर्मंसनातनं॥३॥ पवित्राणांहिगोविंदः पवित्रंपरमुच्यते
पुण्यानामपिपुण्योसौमंगलानांचमंगलं॥४॥ त्रैलोक्यंपुंडरीकाक्षोदेवदेवः सनातनः॥ आस्तेहरिरचिं
त्यात्मातत्रैवमधुसूदनः॥५॥ यत्रनारायणोदेवः परमात्मासमास्थितः॥ तत्रकृत्स्नंजगत्पार्थतीर्थान्या

॥ आहुस्त्वामृषयः सर्वेदेवर्षिर्नारदस्तथा॥ असितोदेवलो व्यासः स्वयंचैवब्रवीषिमे॥१३॥

यतनानिच॥६॥ तत्पुण्यंतत्परंब्रह्मतत्तीर्थंतत्तपोवनं॥ तत्रदेवर्षयः सिद्धाः सर्वेचैवतपोधनाः॥७
आदिदेवोमहायोगीयत्रास्तेमधुसूदनः॥ पुण्यानामपितत्पुण्यंमाभूत्तेसंशयोत्रवै॥८॥ कृष्णएव
हिलोकानामुत्पत्तिरपिचाव्ययः कृष्णस्यहिकृतेभूतमिदंविश्वंचराचरमित्यादीनिहिभूयांसिमह
र्षिवचनानिश्रूयंते॥ तथाचस्वयमेवब्रवीषि॥ भूमिरापोनलोवायुरित्यादिअहंसर्वस्यप्रभवोमत्तः स
र्वंप्रवर्त्ततइत्यंतेन॥ १२॥१३॥ ॥ ९५॥

सर्वमेतदृतंमन्यइति॥ अतः सर्वमेतत्यथावस्थितवस्तुकथनंमन्येनपुनःस्तुतिमात्रमित्यभिप्रायः य
स्मात्तुकृत्स्नेनशिष्यत्वेनप्रपन्नत्वेनचवर्त्तमानंपार्थमनन्यसाधारणंस्वाभाविकंस्वैश्वर्यंकल्याणगुणा
नंत्यंचवदसिअतोहेभगवन्निरतिशयज्ञानशक्तिबलैश्वर्यवीर्यतेजसांनिधेस्तेव्यक्तिंजन्मप्रकारं
प्रकारज्ञानप्रकारं नहिपरिमितज्ञानादेवादानवाश्चविदुः॥१४॥ स्वयमिति॥ हेपुरुषोत्तमआत्मना

॥सर्वमेतदृतंमन्येयन्मांवदसिकेशव॥ नहितेभगवन्व्यक्तिंविदुर्देवानदानवाः॥१४॥
॥स्वयमेवात्मनात्मानंवेत्थत्वंपुरुषोत्तम॥ भूतभावनभूतेशदेवदेवजगत्पते॥१५॥

आत्मानंस्वयमेवस्वेनैवज्ञानेनैववेत्थभूतभावनसर्वेषांभूतानामुत्पादयितॄणामुत्पादयितः भूते
शसर्वेषांभूतानांनियंतः देवदेवदेवतानामपिपरमदैवतयथामनुष्यमृ गपक्षिसरी(
सृपादीनसौंदर्यादिगुणगणैर्दैवतान्यतीत्यवर्त्ततेतथातान्यपिसर्वा णिदैवतानि
तैर्गुणैरतीत्यवर्त्तमानेत्यर्थः जगत्पतेजगतः स्वामिनवक्तुमर्हसीत्युत्तरे णान्वयः॥१५॥

 

वक्तुमिति॥ दिव्या असाधारणा विभूतयो यास्ता अशेषेण वक्तुमर्हसि त्वमेव व्यंजयेत्यर्थः॥ या
भिरनंताभिर्विभूतिभिर्नियमनशक्तिविशेषैर्युक्त इमान्लोकान्व्याप्य त्वं तिष्ठसि॥१६॥ किमर्थं तत्स्फोर
णमित्यपेक्षायामाह॥ कथमिति॥ अहं योगी भक्तियोगनिष्ठः सन् भक्त्या त्वां सदा परिचिंतयन्परि
चिंतयितुं प्रवृत्तः परिचिंतनीयं त्वां परिपूर्णैश्वर्यादिकल्याणगुणयोगं च कथं विद्यां पूर्वोक्तबुद्धिज्ञाना

॥ वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः॥ याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि॥१६॥
॥ कथं विद्यामहं योगी त्वां सदा परिचिंतयन्॥ केषु केषु च भावेषु चिंत्योसि भगवन्मया॥१७॥
॥ विस्तरेणात्मनो योगं विभूतिं च जनार्दन॥ भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेमृतं॥१८॥

दिभावव्यतिरिक्तेषु चानुक्तेषु केषु केषु भावेषु मया नियंतृत्वेन चिंत्योसि॥१७॥ विस्तरेणेति॥ अहं सर्व
स्य प्रभवो मत्तः सर्वं प्रवर्तत इत्यादिना संक्षेपेणोक्तं तव सृष्ट्यादियोगं विभूतिं नियमनं च भूयो मे विस्त
रेण कथय यतोऽस्माकं त्वन्माहात्म्यं शृण्वतो मे अमृतं पिबत इव तृप्तिर्नास्ति हि प्रसिद्धाममाद्भिस्त्वयै
व विदितेत्यभिप्रायः॥१८॥ ॥ 

श्रीभगवानुवाच॥ हंतेति॥ हे कुरुश्रेष्ठ मदीयाः कल्याणीर्विभूतीः प्राधान्यतस्ते कथयिष्यामि प्राधा
न्यशब्देनोत्कर्षो विवक्षितः॥ पुरोधसां च मुख्यमिति वक्ष्यते॥ जगत्युत्कृष्टाः काश्चन विभूतीर्वक्ष्यामि
विस्तरेण वक्तुं श्रोतुं च न शक्यते॥ तासामानंत्यात् विभूतित्वं नाम नियाम्यत्वं सर्वेषां भूतानां बुद्ध्याद
यः इत्थंविधा भावा मत्त एव भवंतीत्युक्त्वा एतां विभूतिं योगं च मम यो वेत्ति तत्त्वत इति प्रतिपादनात्त
यानत्र योगशब्दनिर्दिष्टं स्रष्टृत्वादिकं विभूतिशब्दनिर्दिष्टं तत्प्रवर्त्यत्वमिति पुनश्च अहं सर्वस्य प्रभ

श्रीभगवानुवाच॥ हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः॥ प्राधान्यतः कुरुश्रेष्ठ नास्त्यंतो विस्
तरस्य मे॥१९॥

वो मत्तः सर्वं प्रवर्तते॥ इति मत्वा भजंते मां बुधा भावसमन्विता इत्युक्तं तत्र सर्व
भूतानां प्रवर्तनरूपं नियमनमात्मतयावस्थानात् इतीममर्थं योगशब्दनिर्दिष्टं सर्वस्य स्रष्टृत्वं पाल
यितृत्वं संहर्तृत्वं चेति सुस्पष्टमाह॥१९॥ अहमिति॥ सर्वेषां भूतानां मम शरीरभूतानां आशये हृद
ये अहमात्मतयावस्थितः॥ आत्मा हि नाम शरीरस्य सर्वात्मना आधारो नियंता शेषी च तथा च व
क्ष्यते सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च॥ ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ति

इति ॥ भ्रामयन्सर्वभूतानियंत्रारूढानिमाययेतिश्रूयतेच ॥ यः सर्वेषुभूतेषुतिष्ठन्सर्वेभ्योभूतेभ्योंत
रोयंसर्वाणिभूतानिविदुर्यस्यसर्वाणिभूतानिशरीरंयः सर्वाणिभूतान्यंतरोयमयति एषतेआत्मा
अंतर्याम्यमृतइतिसतआत्मा अंतर्याम्यमृतइतिच एवंसर्वभूतानामात्मतयावस्थितोहंतेषामादिर्मध्यों
तश्चतेषामुत्पत्तिस्थितिप्रलयहेतुरित्यर्थः ॥ एवंभगवतः स्वविभूतिभूतेषुसर्वेष्वात्मतयावस्थानेनत
त्तच्छब्दसामानाधिकरण्यनिर्देशाहेतुंप्रतिपाद्यविभूतिविशेषान्सामानाधिकरण्येनव्यपदिश

॥ अहमात्मागुडाकेशसर्वभूताशयस्थितः । अहमादिश्चमध्यंचभूतानामंतएवच ॥ २० ॥

ति ॥ भगवतस्तात्मतयावस्थितेहिसर्वेशब्दास्तस्मिन्नेवपर्यवस्यंति ॥ यथादेवमनुष्यपक्षिवृक्षादयः
शब्दाः शरीराणिप्रतिपादयंतस्तत्तदात्मनिपर्यवस्यंति ॥ तथाभगवतस्तत्तदात्मतयावस्थानमेवत
त्तच्छब्दसामानाधिकरण्यनिबंधनमितिविभूत्युपसंहारेवक्ष्यते । नतदस्तिविनायत्स्यान्मयाभूतंच
राचरमिति ॥ सर्वेषांस्वेनाविनाभाववचनात्स्वविनाभावश्चनियाम्यतयेतिमंतः सर्वेषुवर्णितस्तदु
पक्रमत्वादित्वं ॥ २० ॥ आदित्यानामिति द्वादशसंख्यानामादित्या ॥ ८७ ॥

आदित्यानामिति ॥ द्वादशसंख्यानामादित्यानांद्वादशोयउत्कृष्टोविष्णुर्नामादित्यः सोहंज्योतिषां
जगत्प्रकाशकानांयोंशुमान्रविरादित्यः सोहंमरुतामुत्कृष्टोयोमरीचिः सोहमस्मिनक्षत्राणा
महंशशीनेयंनिर्धारणेषष्ठीनक्षत्राणांपतिर्यश्चंद्रः सोहमस्मि ॥ २१ ॥ वेदानामिति ॥ वेदानांऋग्य
जुःसामाथर्वणांयउत्कृष्टःसामवेदः सोहंदेवानामस्मिवासवः देवानांयउत्कृष्टइंद्रः सोहंइंद्रियाः

॥ आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान् ॥ मरीचिर्मरुतामस्मिनक्षत्राणामहंशशी ॥ २१ ॥
॥ वेदानांसामवेदोस्मिदेवानामस्मिवासवः ॥ इंद्रियाणांमनश्चास्मिभूतानामस्मिचेतना ॥ २२ ॥
॥ रुद्राणांशंकरश्चास्मि वित्तेशोयक्षरक्षसां ॥ वसूनांपावकश्चास्मिमेरुःशिखरिणामहं ॥ २३ ॥

णांमनश्चास्मि एकादशानामिंद्रियाणांप्रवर्तकत्वंमनइंद्रियंतदहमस्मिभूतानामस्मिचेतनाइयमपि
ननिर्धारणेषष्ठीभूतानांचेतनाचेतनावतांयाचेतनासाप्यहमेव ॥ २२ ॥ रुद्राणामिति ॥ रुद्राणांशं
करश्चास्मि रुद्राणामेकादशानांशंकरोहमस्मिवित्तेशोयक्षरक्षसांपतिर्योवैश्रवणः सोहमस्मि
वसूनामष्टानांपावकोहंशिखरिणांपर्वतानांमेरुरहं ॥ २३ ॥

॥श्री·गी० अ·१०॥

॥८८॥

पुरोधसामिति॥ पुरोधसां पुरोहितानां मध्ये यत्तत्कुशो बृहस्पतिः सोहमस्मि॥ सेनापतीनां मध्ये स्कंदो
हमस्मि सरसां मध्ये सागरोस्मि॥२४॥ मरीच्यादीनां महर्षीणां मध्ये भृगुरहं गिरां वाणीनां मध्ये पदे कं
एकाक्षरमक्षरं तदस्मि यज्ञानां मध्ये यत्तत्कुशो जपयज्ञः सोस्मि पर्वतमात्राणां मध्ये हिमालयोस्मि॥२५
अश्वत्थ इति॥ सर्ववृक्षाणां मध्ये पूज्यो अश्वत्थ एवाहं देवर्षीणां मध्ये परमवैष्णवो नारदोस्मि गंधर्वाणां

॥पुरोधसां च मुख्यं मां विद्धि पार्थ बृहस्पतिं॥ सेनानीनामहं स्कंदः सरसामस्मि सागरः॥२४॥
॥महर्षीणां भृगुरहं गिरामस्म्येकमक्षरं॥ यज्ञानां जपयज्ञोस्मि स्थावराणां हिमालयः॥२५॥
॥अश्वत्थः सर्ववृक्षाणां देवर्षीणां च नारदः॥ गंधर्वाणां चित्ररथः सिद्धानां कपिलो मुनिः॥२६॥
॥उच्चैःश्रवसमश्वानां विद्धि माममृतोद्भवं॥ ऐरावतं गजेंद्राणां नराणां च नराधिपं॥२७॥

गायकानां मध्ये चित्ररथोस्मि॥ सिद्धानां योगनिष्ठानां परमोपास्यः कपिलोहं॥२६॥ उच्चैःश्रवसं
सर्वेषामश्वानां मध्ये अमृतमथनोद्भवं उच्चैःश्रवसं मां विद्धि गजेंद्राणां सर्वेषां मध्ये ऐरावतं मां विद्धि
अमृतोद्भवमिति ऐरावतस्यापि विशेषणं नराणां मध्ये राजानं मां विद्धि॥२७॥

८८

म
॥आयुधानामिति॥ आयुधानां मध्ये वज्रं तदहं धेनूनां हविर्दुघानां मध्ये दिव्यास्करभिः कामधुगहम
स्मि॥ प्रजनो जननहेतुः कंदर्पश्चास्मि सर्पाणामेकशिरसां वासुकिरस्मि॥२८॥ अनंत इति॥ नागाः
अनेकशिरसः॥ यादांसि जलजंतवः अत्रापि न निर्धारणे षष्ठी यादसां पतिर्वरुणोस्मि॥२९॥ अ
नर्थप्रापकतया गणनीयानां मध्ये कालोहं॥३०॥ पवन इति॥ पवतां पवनस्वभावानां वायुरहं॥ शस्त्र
पवित्रीकरणस्वभावानां मध्ये वायुरहं वा शस्त्रभृतां

॥आयुधानामहं वज्रं धेनूनामस्मि कामधुक॥ प्रजनश्चास्मि कंदर्पः सर्पाणामस्मि वासुकिः॥२८॥
॥अनंतश्चास्मि नागानां वरुणो यादसामहं॥ पितॄणामर्यमा चास्मि यमः संयमतामहं॥२९॥
॥प्रह्लादश्चास्मि दैत्यानां कालः कलयतामहं॥ मृगाणां च मृगेंद्रोहं वैनतेयश्च पक्षिणां॥३०॥
॥पवनः पवतामस्मि रामः शस्त्रभृतामहं॥ झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी॥३१॥

भृतां च रामोहं न त्वसौ मे विभूतिरित्यर्थः अर्थांतराभावात्॥ आदिमादेः सेव्यत्वेनावस्थितस्य भग
वतः शरीरतया धर्मत्वमिति शस्त्रभृत्त्व मात्र मत्र तत्त्वानीयं॥३१॥ ॥

सर्गाणामिति॥ सृज्यंत इति सर्गास्तेषामादिः कारणं सर्वदा सृज्यमानानां सर्वेषां प्राणिनां तत्र तत्र स्रष्टा
अहमेवेत्यर्थः॥ तथा सर्वदा संह्रियमाणानां संहर्त्ता रोद्रः अहमेव मध्ये पालनं सर्वदा पाल्यमानानां पाल
यिता रुद्रश्चाहमेवेत्यर्थः॥ अध्यात्मविद्याश्रेयः साधनभूतानां विद्यानां मध्ये परमनिःश्रेयससाधनभूता
विद्याहमस्मि जल्पवितंडादि कुर्वतां तत्त्वनिर्णयप्रवृत्तो वादोयः सोहं॥ ३२॥ अक्षराणां च मध्ये अकारः

॥ सर्गाणामादिरंतश्च मध्यं चैवाहमर्जुन॥
॥ अध्यात्मविद्या विद्यानां वादः प्रवदतामहं॥ ३२॥
॥ अक्षराणामकारोस्मि द्वंद्वः सामासिकस्य च॥
॥ अहमेवाक्षयः कालो धाताहं विश्वतोमुखः॥ ३३॥

अकारो वै सर्वा वागिति श्रुतेः सर्ववर्णानां प्रकृतिरकारश्चाहं समासानां समूहः सामासिकस्तस्य म
ध्ये द्वंद्वः समासोहं॥ सत्युभयपदप्रधानत्वेनोत्कृष्टः कालः कलामुहूर्त्तादिमेयोपः सोहं सर्वस्य प्रा ८९॥
णिमात्रस्य धाता भर्त्ताहमेव॥ ३३॥

मृत्युरिति सर्वप्राणहरो मृत्युश्चाहं उत्पाद्यमानानामुद्भवाख्यं कर्म चाहं॥ नारीणां कीर्त्तिश्चाहं श्री
श्चाहं वाक्चाहं॥ स्मृतिश्चाहं मेधा चाहं धृतिश्चाहं क्षमा चाहमेव॥ ३४॥ बृहदिति साम्नां प्रधानं बृ
हद्बृहमस्मि॥ गायत्र्यादिछंदोविशिष्टानामृचां गायत्रीरूपोहं॥ ऋतूनां मुख्यः कुसुमाकरो वसंतो
हं॥ ३५॥ द्यूतमिति॥ छलं कुर्वतां छलास्पदेष्वक्षादिलक्षणेषु द्यूतमहं जेतृणां जयोस्मि व्यव

॥ मृत्युः सर्वहरश्चाहमुद्भवश्च भविष्यतां॥ कीर्त्तिः श्रीर्वाक्च नारीणां स्मृतिर्मेधा धृतिः क्षमा॥ ३४॥
॥ बृहत्साम तथा साम्नां गायत्री छंदसामहं॥ मासानां मार्गशीर्षोहमृतूनां कुसुमाकरः॥ ३५॥
॥ द्यूतं छलयतामस्मि तेजस्तेजस्विनामहं॥ जयोस्मि व्यवसायोस्मि सत्त्वं सत्त्ववतामहं॥ ३६॥
॥ वृष्णीनां वासुदेवोस्मि पांडवानां धनंजयः॥ मुनीनामप्यहं व्यासः कवीनामुशना कविः॥ ३७॥

सायिनां व्यवसायोस्मि सत्त्ववतां सत्त्वमहम्॥ ३६॥ वृष्णीनां वासुदेवोस्म्यहमेवनन्तत्रविभूतिरर्थां
तराभावात् देवकीसुतस्य वसुदेवस्य सुत्वायाः कारणं आविर्भावानुगुणं यत्सामर्थ्यं तत्समर्दविना भूतमित्यर्थः
पांडवानां त्वमेवास्मि मुनयो मननेनात्मयाथात्म्यदर्शिनः तेषां मध्ये व्यासोहं कवयो विपश्चितस्ते
षां मध्ये उशना भार्गवोहं॥ ३७॥

नियमातिक्रमे दंडं कुर्वतां दंडोऽहं विजिगीषूणां जयोपायो नीतिरस्मि गुह्यानां सर्वविधगोपके मौनम
स्मि ज्ञानवतां ज्ञानं चाहं ॥३८॥ यदिति ॥ सर्वभूतानां सर्वावस्थावस्थितानां तदवस्थाबीजमहं प्रतीय
मानम प्रतीयमानं च यत्तत्तदहमेव चराचरसर्वभूतजातं मयात्मतयावस्थितेन विना यत्स्यान्नेतदस्ति
अहमात्मा गुडाकेशेत्युपक्रमात न तदस्ति विना यत्स्यान्मया भूतं चराचरमित्यात्मतयावस्थानमेव

॥ दंडो दमयतामस्मि नीतिरस्मि जिगीषतां ॥ मौनं चैवास्मि गुह्यानां ज्ञानं ज्ञानवतामहं ॥३८॥
॥ यच्चापि सर्वभूतानां बीजं तदहमर्जुन ॥ न तदस्ति विना यत्स्यान्मया भूतं चराचरं ॥३९॥
॥ नांतोऽस्ति मम दिव्यानां विभूतीनां परंतप ॥ एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ॥४०॥

विवक्षितं सर्वं वस्तुजातं सर्वावस्थं मयात्मभूतेन युक्तमेव स्यादित्यर्थः ॥ अनेन सर्वस्यास्य सामानाधि
करण्यनिर्देशस्यात्मतयावस्थितिरेव हेतुरिति प्रकटितं ॥३९॥ नांतोऽस्तीति ॥ मम दिव्यानां विभूतीना
मंतो नास्ति ॥ एष तु विभूतेर्विस्तरो मया कैश्चिदुपाधिभिः संक्षेपतः प्रोक्तः ॥४०॥ ॥ ९०॥

यद्यदिति ॥ यद्यत् विभूतिमत् ईशितव्यसंपन्नं भूतजातं श्रीमत् कांतिमद्धनधान्यसमृद्धं वा ऊर्जितं क
ल्याणारंभेषूद्युक्तं ॥ तत्तन्मम तेजोंशसंभवमित्यवगच्छ तेजः पराभिभवसामर्थ्यं ममाचिंत्यशक्ते
र्नियमनशक्त्येकदेशसंभवमित्यर्थः ॥४१॥ अथवेति ॥ बहुनैतेनोच्यमानेन ज्ञानेन किं प्रयोजनं इ
दं चिदचिदात्मकं कृत्स्नं जगत्कार्यावस्थं कारणावस्थं स्थूलं सूक्ष्मं च स्वरूपसद्भावे स्थितौ प्रवृत्तिभेदे

॥ यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा ॥ तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥४१॥
॥ अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ॥ विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत ॥४२॥
॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विभूतियो
गो नाम दशमोऽध्यायः ॥ १० ॥ ॥

च यथा मत्संकल्पं नातिवर्तेत तथा मम महिम्नोऽयुतायुतांशेन विष्टभ्याहमवस्थितः यथोक्तं भगव
ता पराशरेण यस्यायुतायुतांशांशे विश्वशक्तिरियं स्थितेति ॥४२॥ इति श्रीमद्रामानुजाचार्यविर
चिते गीताभाष्ये दशमोऽध्यायः ॥ १० ॥

॥ गी॰ भा॰ ॥ एवंभक्तियोगनिष्पत्तयेतद्विवृद्धयेचसकलेतरविलक्षणेनस्वाभाविकेनभगवदसाधारणेनक अ॰ ११ ॥
॥ ७९ ॥ ल्याणगुणगणेनसहभगवतःसर्वात्मत्वंततएवतद्व्यतिरिक्तस्यकृत्स्नस्यचिदचिदात्मकस्यवस्तु
जातस्यतच्छरीरतयातदायत्तस्वरूपस्थितिप्रवृत्तित्वंचोक्तं॥तदेवंभगवदसाधारणस्वभावंतथैवभ
गवत्प्रसादादनंतरंदृष्ट्वातिसर्वाश्चर्यमयंदेवमनंतंविश्वतोमुखंतंचैकस्थंजगत्कृत्स्नंप्रविभक्तमनेक
धेतिकृत्स्नस्यतदायत्तस्वरूपस्थितिप्रवृत्तितांचभगवच्छ्रीकाशादुपश्रुत्यएवमेवेतिचनिश्चित्यत

॥अर्जुनउवाच॥ मदनुग्रहायपरमंगुह्यमध्यात्मसंज्ञितं॥यत्त्वयोक्तंवचस्तेनमोहोयं॥
विगतोमम॥१॥

॥थाभूतंभगवंतंसाक्षात्कर्तुकामोऽर्जुनउवाच॥मदिति॥देहात्माभि
मानरूपमोहेनमोहितस्यममानुग्रहैकप्रयोजनायपरमंगुह्यंपरमंरहस्यंअध्यात्मसंज्ञितमात्मनि
वक्तव्यंवचःनत्वेवाहंजातुनासमित्यादितस्मायोगीभवार्जुनेत्येतदंतंयत्त्वयोक्तंतेनायंममात्मवि
षयोमोहःसर्वोविगतःदूरतोनिरस्तः॥१॥ ७९ ॥

॥भवाप्ययाविति॥तथाममप्रभृतिदृश्यमानपर्यंतेनत्वद्व्यतिरिक्तानांसर्वेषांभूतानांत्वत्तःपरमात्मनोभवा
प्ययावुत्पत्तिप्रलयौविस्तरशोमयाश्रुतौहेकमलपत्राक्षतवाव्ययंनित्यंचेतनाचेतनवस्तुशेषित्वंज्ञा
नबलादिकल्याणगुणैस्त्वदेवपरतरत्वंसर्वाधारत्वंचिंतितनिमिषितादिप्रवृत्तिषुत्वदेवप्रवर्तयितृत्व
मित्याद्यपरिमितंमाहात्म्यंचश्रुतंहिशब्दोवक्ष्यमाणदिदृक्षाद्योतनार्थः॥२॥एवमिति॥हेपरमेश्वर
एवमेतदित्यवधृतंयथात्वमात्मानंब्रवीषिपुरुषोत्तमाश्रितवात्सल्यैकजलधेत्वदैश्वर्यंत्वदसाधार

॥भवाप्ययौहिभूतानांश्रुतौविस्तरशोमयात्वत्तःकमलपत्राक्ष माहात्म्यमपिचाव्ययं॥२॥
॥एवमेतद्यथात्थत्वमात्मानंपरमेश्वर॥द्रष्टुमिच्छामितेरूपमैश्वरंपुरुषोत्तम॥३॥

णंसर्वस्यप्रशास्तृत्वेपालयितृत्वेस्रष्टृत्वेसंहर्तृत्वेभर्तृत्वेकल्याणगुणाकरत्वेपरतरत्वेसकलेतर
विसजातीयत्वेचावस्थितंरूपंद्रष्टुंसाक्षात्कर्तुमिच्छामि॥३॥मन्यसइति॥तत्सर्वस्यस्रष्टृप्रशास्तृसर्व
साधारभूतंत्वद्रूपंमयाद्रष्टुंशक्यमितियदिमन्यसेततोयोगेश्वरमेत्वंदर्शयात्मानमव्ययंयोगोज्ञानादि
कल्याणगुणयोगःपश्यमेयोगमैश्वरमितिहिवक्ष्यते॥तद्व्यतिरिक्तस्यकस्याप्यसंभावितानांज्ञान

॥गी०भा०॥ बलैश्वर्यवीर्यशक्तितेजसां निधेरात्मानं त्वामव्ययं मे दर्शय अव्ययमिति क्रियाविशेषणं त्वां अ० ११
॥८१॥ सकलं मे दर्शयेत्यर्थः॥४॥ एवं कौतूहलान्वितेन दर्शनगतहृदयेन पार्थेन प्रार्थितः॥ श्रीभगवानुवाच
॥ पश्य मे सर्वाश्रयभूतानि रूपाणि अथ शतशः सहस्रशश्च नानाविधानि नानाप्रकाराणि दिव्यानि अ-
प्राकृतानि नानावर्णाकृतीनि शुक्लकृष्णादिनानावर्णाकृतीनि च पश्य॥५॥ ममैकैकस्मिन् रूपे पश्य

॥ मन्यसे यदि तच्छक्यं मया द्रष्टुमिति प्रभो॥ योगेश्वर ततो मे त्वं दर्शयात्मानमव्ययं॥४॥ श्रीभ॥॥
गवानुवाच॥ पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रशः॥ नानाविधानि दिव्यानि नानावर्णा ॥
॥ कृतीनि च॥५॥ पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा॥ बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि
॥ भारत॥६॥ इहैकस्थं जगत्कृत्स्नं पश्याद्य सचराचरं॥ मम देहे गुडाकेश यच्चान्यद्द्रष्टुमिच्छसि॥७॥

दित्यान् द्वादश वसून् अष्टौ रुद्रान् एकादश अश्विनौ द्वौ मरुतश्चैकोनपंचाशतं दर्शनार्थमिदं इह जगति प्रत्य-
क्षदृष्टानि शास्त्रदृष्टानि च यानि वस्तूनि तानि सर्वाण्यन्यान्यपि सर्वेषु कालेषु सर्वैरप्यदृष्टपूर्वा- ८१॥
णि बहून्याश्चर्याणि पश्य॥६॥ इह मम एकस्मिन् देहे तत्राप्येकदेशस्थं सचराचरं कृत्स्नं जगत् पश्य यच्चान्यत्
द्रष्टुमिच्छसि तदप्येकदेहैकदेश एव पश्य॥७॥ ॥

न तु मामिति॥ अहं मम देहैकदेशे सर्वं जगद्दर्शयिष्यामीति त्वं त्वनेन नियमेन परिमितग्राहिणा प्राकृतेन
स्वचक्षुषा मां तथाभूतं सकलेतरविसजातीयमपरिमेयं द्रष्टुं न शक्यसे॥ तव दिव्यमप्राकृतं मम दर्शनसा-
धनं चक्षुर्ददामि पश्य मे योगमैश्वरं मदसाधारणं योगं पश्य मम अनंतज्ञानादियोगम् अनंतविभूतियोगं च प-
श्येत्यर्थः॥८॥ संजय उ० एवमिति॥ एवमुक्त्वा सारथ्ये अवस्थितः पार्थमातुलजो महायोगेश्वरो हरिः महाश्चर्य-

॥ न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा॥ दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरं॥८॥
संजय उवाच ॥ एवमुक्त्वा ततो राजन्महायोगेश्वरो हरिः॥ दर्शयामास पार्थाय परमं रूपमैश्वरं॥९॥
॥ अनेकवक्त्रनयनमनेकाद्भुतदर्शनं॥ अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं॥१०॥
॥ दिव्यमाल्याम्बरधरं दिव्यगंधानुलेपनं॥ सर्वाश्चर्यमयं देवमनंतं विश्वतोमुखं॥११॥

योगानामीश्वरः परब्रह्मभूतो नारायणः परममैश्वरं स्वासाधारणं रूपं पार्थाय पितृष्वसुः पृथायाः पुत्रा-
य दर्शयामास यद्विविधविचित्रनिखिलजगदाश्चर्यं विश्वस्य प्रशास्तृ रूपं न चेदृशं॥९॥ अनेकेति॥ दिव्ये-
ति॥ देवं द्योतमानम् अनंतं कालत्रयवर्तिनिखिलजगदाश्रयतया देशकालपरिच्छेदानर्हं विश्वतोमुखं वि-

अद्दिव्यवर्त्तिमुखं स्वोचितदिव्याम्बरगंधमाल्याभरणायुधान्वितं॥१०॥ ११॥ तामेव देवशब्दनिर्दिष्टोत्तमा
न्तमां विशिनष्टि॥ दिवीति॥ तेजसोऽपरिमितत्वदर्शनार्थमिदमक्षयतेजःस्वरूपमित्यर्थः॥१२॥ तत्रेति
तत्रानंतायामपरिमितविस्तरेऽनंतबाहूदरवक्त्रनेत्रेऽपरिमिततेजस्केऽपरिमितदिव्यायुधोपेते
स्वोचितापरिमितदिव्यभूषणभूषिते दिव्यमाल्यांबरधरे दिव्यगंधानुलेपनेऽनंताश्चर्यमये देवदेवस्य दि
व्ये शरीरेऽनेकधा प्रविभक्तं ब्रह्मादिविविधविचित्रदेवतिर्यङ्मनुष्यस्थावरादिभोक्तृवर्गपृथिव्यंतरिक्ष

॥दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता॥ यदि भाः सदृशी सा स्याद्भासस्तस्य महात्मनः॥१२॥
॥तत्रैकस्थं जगत्कृत्स्नं प्रविभक्तमनेकधा॥ अपश्यद्देवदेवस्य शरीरे पांडवस्तदा॥१३॥

स्वर्गपातालवितलसुतलादिभोगस्थानभोगोपकरणभेदभिन्नं प्रकृतिपुरुषाख्यं कृत्स्नं जगत्॥ अहं सर्वस्य
प्रभवो मत्तः सर्वं प्रवर्तते हंत ते कथयिष्यामि दिव्या ह्यात्मविभूतयः॥ अहमात्मा गुडाकेश सर्वभूताशय
स्थितः॥ आदित्यानामहं विष्णुरित्यादिना न तदस्ति विना यत्स्यान्मया भूतं चराचरं॥ विष्टभ्याहमिदं कृत्स्नमे
कांशेन स्थितो जगदित्यंतेनोदितं॥ एकस्थमेकदेशस्थं पांडवो भगवत्प्रसादलब्धतद्दर्शनानुगुणदिव्यच ८३॥
क्षुरपश्यत॥१३॥

ततइति॥ ततो धनंजयो महाश्चर्यस्य कृत्स्नस्य जगतस्तस्य देहैकदेशे दर्शनात् विस्मयाविष्टः कृत्स्नजगदा
श्रयभूतं कृत्स्नस्य प्रवर्तयितारमाश्चर्यानंतज्ञानादिकल्याणगुणं देवं हृष्टरोमा शिरसा दंडवत्प्रणम्य
कृतांजलिरभाषत॥१४॥ अर्जुन उवाच॥ पश्यामीति॥ हे देव तव देहे सर्वान् देवान् पश्यामि तथा सर्वा
न् भूतविशेषाणां संघान् तथा ब्रह्माणं चतुर्मुखमंडाधिपं तथेशं कमलासनस्थं कमलासने ब्रह्मणि स्थि

॥ततः स विस्मयाविष्टो हृष्टरोमा धनंजयः॥ प्रणम्य शिरसा देवं कृतांजलिरभाषत॥१४॥
॥अर्जुन उवाच॥ पश्यामि देवांस्तव देव देहे सर्वांस्तथा भूतविशेषसंघान्॥ ब्रह्माणमीशं॥
॥कमलासनस्थमृषींश्च सर्वानुरगांश्च दिव्यान्॥१५॥ अनेकबाहूदरवक्त्रनेत्रं पश्यामि॥
॥त्वां सर्वतोऽनंतरूपं॥ नांतं न मध्यं न पुनस्तवादिं पश्यामि विश्वेश्वर विश्वरूप॥१६॥

तमीशं तन्मनोवस्थितं तथा देवर्षिप्रमुखान् सर्वान् ऋषीन् उरगांश्च वासुकितक्षकादीन् सर्पान्॥१५॥
अनेकेति॥ अनेकबाहूदरवक्त्रनेत्रं अनंतरूपं त्वां सर्वतः पश्यामि विश्वेश्वर विश्वनियंतः विश्वरूप
विश्वशरीर यतस्त्वमनंत अतस्तवांतं न मध्यं न पुनस्तवादिं च न पश्यामि॥१६॥

किरीटिनमिति॥तेजोराशिंसर्वतोदीप्तिमंतंसर्वतोदुर्निरीक्ष्यंदीप्तानलार्कद्युतिमप्रमेयंकिरीटि
नंगदिनंचचक्रिणंचत्वांपश्यामि॥१७॥त्वमिति॥उपनिषद्भुद्वेविद्येवेदितव्यंऽस्मादिषुवेदितव्यंतया
निर्दिष्टंपरममक्षरंत्वमेवविश्वस्यपरंनिधानंविश्वस्यास्यपरमाधारभूतस्त्वमेवत्वमव्ययःव्ययरहि
तःयतस्त्वरूपोयद्गुणोयद्विभवश्चत्वंतेनैवरूपेणसर्वदावतिष्ठसे॥शाश्वतधर्मगोप्ताशाश्वतस्यनि

॥ किरीटिनंगदिनंचचक्रिणंचतेजोराशिंसर्वतोदीप्तिमंतं॥पश्यामित्वांदुर्नि॥ री
॥क्ष्यंसमंताद्दीप्तानलार्कद्युतिमप्रमेयं॥१७॥त्वमक्षरंपरमंवेदितव्यंत्वमस्यवि॥
॥श्वस्यपरंनिधानं॥त्वमव्ययःशाश्वतधर्मगोप्तासनातनस्त्वंपुरुषोमतोमे॥१८॥

त्यस्यवैदिकस्यधर्मस्यैचमादिभिरवतारैस्त्वमेवगोप्तासनातनस्त्वंपुरुषोमतोमे॥वेदाहमेतंपुरुषं
महांतंपरात्परंपुरुषमित्यादिश्रुतिभिःसनातनःपुरुषस्त्वमेवेतिमेमतःयदुकुलतिलकस्त्वमेवंभू
तइतीदानींसाक्षात्कृतोमयेत्यर्थः॥१८॥ ॥ ९४॥

॥अनादीति॥अनादिमध्यांतंआदिमध्यांतरहितंअनंतवीर्यंअनवधिकातिशयवीर्यंवीर्यशब्दःप्र
दर्शनार्थः॥अनवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजसांनिधानमित्यर्थः॥अनंतबाहुंअ
संख्येयबाहुंसोपिप्रदर्शनार्थः।अनंतोदरवक्त्रादिकंशशिसूर्यनेत्रंशशिवत्सूर्यवच्चप्रसादप्रता
पयुक्तंसर्वतेत्रंदेवादीननुकूलान्नमस्कारादिकुर्वाणान्प्रतिप्रसादःतद्विपरीतानसुरराक्षसादी
न्प्रतिप्रतापःरक्षांसिभीतानिदिशोद्रवंतिसर्वेनमस्यंतिचसिद्धसंघाइतिवक्ष्यतेदीप्तहुताशवक्त्रं

॥अनादिमध्यांतमनंतवीर्यमनंतबाहुंशशिसूर्यनेत्रं॥
॥पश्यामित्वांदीप्तहुताशवक्त्रंस्वतेजसाविश्वमिदंतपंतं॥१९॥

प्रदीप्तकालानलवत्संहारानुगुणवक्त्रं॥स्वतेजसाविश्वमिदंतपंतंतेतःपराभिभवसामर्थ्यंस्वकी
येनतेजसाविश्वमिदंतपंतंत्वांपश्यामि॥एवंभूतंसर्वस्यस्रष्टारंसर्वाधारभूतंसर्वस्यप्रशासितारंस
र्वस्यसंहर्तारंज्ञानाद्यपरिमितगुणसागरंआदिमध्यांतरहितमेवंभूतंदिव्यदेहंत्वांयथोपदेशंसा।

स्तात्करोमीत्यर्थः ॥ एकस्मिन्दिव्यदेहेऽनेकोदरादिकं यद्युक्तमुपपद्यते ॥ एकस्मात्कटिप्रदेशादनंतप
रिमाणादूर्ध्वमुखबाहवोऽनंतास्तथाधो दितोदरादयः अधश्च पयोदितदिव्यपादाः नत्वेकस्मिन्मुखेऽनेकद्वयमिति
नविरोधः ॥ एवंभूतं त्वां दृष्ट्वा देवादयोऽहं च प्रव्यथिता भवाम इत्याह ॥ ॥ द्यावेति ॥ इदमाद्यपृथिवीश
स्वस्त्रभावुपरितनानामधःस्थानां च लोकानां पदद्वीनाश्चैर्द्यावापृथिव्योरंतरमवकाशः यस्मिन्नव
काशे सर्वे लोकास्तिष्ठंति स सर्वोऽप्यवकाशो दिशश्च सर्वास्त्वयैकेन व्याप्ताः दृष्ट्वाद्भुतं रूपमुग्रं तवेदमनं

॥ द्यावापृथिव्योरिदमंतरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः ॥ दृष्ट्वाद्भुतं रूपमुग्रं तवेदं लोक ॥
॥ त्रयं प्रव्यथितं महात्मन् ॥ २० ॥ ॥ नाप्यामविस्तारमद्भुतमत्युग्रं च रूपं दृष्ट्वा लोकत्रयं प्रव्यथि
तं युद्धदिदृक्षयागतेषु ब्रह्मादिदेवासुरपितृगणसिद्धगंधर्वयक्षराक्षसेषु प्रतिकूलानुकूलमध्यस्थरू
पं लोकत्रयं सर्वं प्रव्यथितं अत्यंतभीतं महात्मन्नपरिच्छेद्यमनोरथ ॥ एतेषामप्यर्जुनस्येव विश्वा
श्चर्यरूपसाक्षात्कारसाधनं दिव्यचक्षुर्भगवता दत्तं किमर्थमिति चेदर्जुनाय ऐश्वर्यं सर्वं प्रदर्शयितु
मतस्त्वदमुच्यते हृष्टुति ॥ २० ॥ ॥ ॥ ८५ ॥

अमी हीति ॥ अमी सुरसंघास्तु त्वां विश्वाश्चर्यमालोक्य ऊष्मनः स्वस्त्वत्समीपं विशंति ॥ तेष्वेव के
चिदत्यद्भुतं च तवाकारमवलोक्य भीताः प्रांजलयः स्वज्ञानानुगुणास्तु निरूपाणि वाक्यानि गृणंति नि
च्चारयंति ॥ अपरे महर्षिसिद्धसंघाश्च परावरतत्त्वयाथात्म्यविदः स्वस्तीत्युक्त्वा पुष्कलाभिर्भगवदनु
रूपाभिः स्तुतिभिः स्तुवंति ॥ २१ ॥ रुद्रेति ॥ उष्मपाः पितरः ऊष्मभागा हि पितर इति श्रुतेः एते सर्वे वि

॥ अमी हि त्वां सुरसंघा विशंति केचिद्भीताः प्रांजलयो गृणंति ॥ स्वस्तीत्युक्त्वा महर्षिसिद्धसंघाः स्तु ॥
॥ वंति त्वां स्तुतिभिः पुष्कलाभिः ॥ २१ ॥ रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपा ॥
॥ श्च ॥ गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वां विस्मिताश्चैव सर्वे ॥ २२ ॥ रूपं महत्ते बहुवक्त्रनेत्रं ॥
॥ महाबाहो बहुबाहूरुपादं ॥ बहूदरं बहुदंष्ट्राकरालं दृष्ट्वा लोकाः प्रव्यथितास्तथाहं ॥ २३ ॥

तवेदमीदृशं रूपं दृष्ट्वा

स्मयमापन्नास्त्वां वीक्षंते ॥ २२ ॥ रूपमिति ॥ बह्वीभिर्दंष्ट्राभिरतिभीषणाकारं लोकाः पूर्वोक्ताः प्रतिकू
ला नुकूलमध्यस्थास्त्रिविधाः सर्व एवाहं च तवेदमीदृशं रूपं दृष्ट्वा प्रव्यथिता भवामः ॥ २३ ॥

॥ गी॰ भा॰ ॥

॥ ९६ ॥

नभःशब्दस्परमव्योमवाचित्वमितिसंबंधः

॥ नभःस्पृशमिति ॥ नभःशब्दः तदक्षरे परमे व्योमन् तमसः परस्तात् क्षयं तमस्य रजसः पराके योऽस्याध्यक्षः ॥ अ॰ ११ ॥
परमे व्योमन्नित्यादिश्रुतिसिद्धत्रिगुणप्रकृत्यतीतपरमव्योमवाची सविकारस्य प्रकृतितत्त्वस्य पुरुष
स्य च सर्वावस्थस्य कृत्स्नस्याश्रयतया वर्तमानस्य नभःस्पृशमिति वचनात् द्यावापृथिव्योरिदमंतरं हि
व्याप्तमिति पूर्वोक्तत्वाद्दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं त्वां दृष्ट्वा प्रव्यथितांतरात्मा अस्तंतमी

॥ नभःस्पृशं दीप्तमनेकवर्णं व्यात्ताननं दीप्तविशालनेत्रं ॥ दृष्ट्वा हि त्वां प्रव्यथितांतरात्मा धृतिं न विंदामि
॥ शमं च विष्णो ॥ २४ ॥ दंष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसंनिभानि ॥ दिशो न जाने न लभे
॥ च शर्म प्रसीद देवेश जगन्निवास ॥ २५ ॥

॥ नभःस्पृशं त्वां दृष्ट्वा धृतिं न विंदामि देहस्य धारणं न ल
भे मनसश्चेंद्रियाणां च शमं न लभे विष्णो व्यापिन् अतिमात्रमद्भुतमतिघोरं च त्वां दृष्ट्वा प्रशिथिलसर्वाव
यवो व्याकुलेंद्रियश्च भवामीत्यर्थः ॥ २४ ॥ दंष्ट्रेति ॥ युगांतकालानलवत्सर्वसंहारे प्रवृत्तान्यतिघोराणि
तव मुखानि दृष्ट्वा दिशो न जाने सुखं न लभे जगन्निवास देवेश ब्रह्मादीनामपीश्वराणामपि परममहेश्वर मां
प्रति प्रसन्नो भव यथाहं प्रकृतिं गतो भवामि तथा कुर्वित्यर्थः ॥ २५ ॥ ॥ ॥ ९६ ॥

एवं सर्वस्य जगतः स्वायत्तस्थितिप्रवृत्तित्वं दर्शयन् पार्थसारथिः राजवेषच्छन्नावस्थितानां धार्तराष्ट्रा
दीनां यौधिष्ठिरेष्ववस्थितानां चासुरांशानां संहारेण भूभारावतरणं स्वमनीषितं स्वेनैव करिष्यमाणं पा
र्थाय दर्शयामास स च पार्थो भगवतः स्रष्टृत्वादिकं सर्वैश्वर्यं साक्षात्कृत्य एतस्मिन्नेव भगवति सर्वात्मनि
धार्तराष्ट्रादीनां उपसंहारमनागतमपि तत्प्रसादलब्धेन दिव्येन चक्षुषा पश्यन्निदं प्रोवाच ॥ अमी च

अमी च त्वां धृतराष्ट्रस्य पुत्राः सर्वे सहैवावनिपालसंघैः ॥ भीष्मो द्रोणः सूतपुत्रस्तथासौ सहास्मदीयैरपि यो
धमुख्यैः ॥ २६ ॥ वक्त्राणि ते त्वरमाणा विशंति दंष्ट्राकरालानि भयानकानि केचिद्विलग्ना दशनांतरेषु संदृश्यं
ते चूर्णितैरुत्तमांगैः ॥ २७ ॥ यथा नदीनां बहवोंबुवेगाः समुद्रमेवाभिमुखा द्रवंति ॥ तथा तवामी नरलोक
वीरा विशंति वक्त्राण्यभिविज्वलंति ॥ २८ ॥ यथा प्रदीप्तं ज्वलनं पतंगा विशंति नाशाय समृद्धवेगाः ॥ तथैव
नाशाय विशंति लोकास्तवापि वक्त्राणि समृद्धवेगाः ॥ २९ ॥
ति ॥ वक्त्राणीति ॥ अमी धृतराष्ट्रस्य पुत्रा दुर्यो
धनादयः सर्वे भीष्मः द्रोणः सूतपुत्रः कर्णश्च तत्पक्षीयैरवनिपालसमूहैः सर्वैरस्मदीयैश्च कैश्चिद्योधमु
त्वामति ख्यैः सह त्वरमाणा दंष्ट्राकरालानि भयानकानि तव वक्त्राणि विशंति ॥ तत्र केचिच्चूर्णितैरुत्तमांगैर्दश

नांनरेषुविलग्नाः संदृश्यंते॥२८॥२७॥यथेति॥यथेति॥एतेराजलोकाबहवोनदीनामंबुप्रवाहाः समु
द्रमिवयदीप्तंज्वलनमिवचत्वाज्वमात्लववक्त्राणिभिविज्ञलंतिस्वयमेवत्वरमाणाः आत्मनाशायविश
ंति॥२८॥२९॥लेलिह्यसइति॥राजलोकानसमग्रान्ग्रसत्सद्भिर्वदनैः समंततः कोपवेगेनग्रसमानः तद्रु
धिररक्तमोष्टपुटादिकंलेलिह्यसेपुनः पुनर्लेहनंकरोषितवातिघोराभासोरश्मयः तेजोभिः स्वकीयैः

॥लेलिह्यसेग्रसमानः समंताल्लोकान समग्रानवदनैर्ज्वलद्भि॥तेजोभिरापूर्यजगत्समग्रंभासस्तवोग्राः॥
॥प्रतपंतिविष्णो॥३०॥आख्याहिमेकोभवानुग्ररूपोनमोस्तुतेदेववरप्रसीद॥विज्ञातुमिच्छामिभवंत॥
॥तमाद्यंनहिप्रजानामितवप्रवृत्तिं॥३१॥

॥प्रकाशेर्जगत्समग्रमापूर्यप्रतपंति॥३०॥आ
[अ·११श्लो·३१]
ख्याहीति॥दर्शयात्मानमव्ययमितितवैश्वर्यंनिरंकुशंसाक्षात्कर्तुंप्रार्थितेनभवतानिरंकुशमैश्वर्यं
दर्शयतातिघोररूपमिदमाविः कृतंअतिघोररूपः कोभवान् किंकर्तुंप्रवृत्तइतिभवंतंज्ञातुमिच्छामि
तवाभिप्रेतांप्रवृत्तिंनजानामि॥एतदाख्याहिमेनमोस्तुतेदेववरप्रसीदनमस्तेस्तुसर्वेश्वरएवंकर्तुम
नेनाभिप्रायेणेदंसंहर्तुंरूपमाविः कृतमित्युक्त्वाप्रसन्नश्चभव॥३१॥



आश्रितवात्सल्यातिरेकेणविश्वैश्वर्यंदर्शयतोभगवतोघोररूपाविः कारेकोभिप्रायइतिपृष्टोभगवा
न्पार्थसारथिः स्वाभिप्रायमाह॥पार्थोद्योगेनविनापिधार्त्तराष्ट्रप्रमुखमशेषंराजलोकंनिहंतुमह
मेवप्रवृत्तइतिज्ञापनायममघोररूपाविष्कारः तच्चज्ञात्वात्वंपार्थयुद्धोद्योतंयति॥श्रीभगवानुवाच॥
कालोस्मीति॥कलयतिगणयतीतिकालः सर्वेषांधार्त्तराष्ट्रप्रमुखानांराजलोकानामवसानंगणय

भगवानुवाच॥ कालोस्मिलोकक्षयकृत्प्रवृद्धोलोकानसमाहर्तुमिहप्रवृत्तः॥ऋतेपित्वां॥श्री॥
॥नभविष्यंतिसर्वेयेवस्थिताः प्रत्यनीकेषुयोधाः॥३२॥ तस्मात्त्वमुत्तिष्ठयशोलभस्वजित्वाशत्रू॥
॥न्भुंक्ष्वराज्यंसमृद्धं॥मयैवैतेनिहताः पूर्वमेवनिमित्तमात्रंभवसव्यसाचिन॥३३॥

न्नहंतन्नक्षयकृत्तघोररूपेणप्रवृद्धोराजलोकान्समाहर्तुमाभिमुख्येनसंहर्तुमभिप्रवृत्तोस्मि॥अ
तोमत्संकल्पादेवत्वामृतेपित्वद्युद्योगादृतेपिएतेधार्त्तराष्ट्रप्रमुखास्तवप्रत्यनीकेषुयेऽवस्थितायो
धास्तेसर्वेनभविष्यंतिविनंक्ष्यंति॥३२॥ तस्मादिति॥तस्मात्त्वंतान्प्रतियुद्धायोत्तिष्ठतानशत्रून्
जित्वायशोलभस्वधर्म्यंचराज्यंसमृद्धंभुंक्ष्वमयैवैतेकृतापराधाः पूर्वमेवनिहताः॥इतनेविनियु

धर्मे निःशंकपले

कास्त्वमेतेषां हनने निमित्तमात्रं भव मया हन्यमानानां त्वं हन्ता दक्षिणा नीयो भव सव्यसाचिन् सं च सम वा
येसव्येन शरसमवायशीलः सव्यसाची सव्येनापि हस्तेन शरसमवायकरत्व स्तदुद्देन योद्धुं समर्थ इत्य
र्थः॥३३॥ द्रोणमिति॥ द्रोणभीष्मकर्णादीन् कृतापराधतया मयैव हनने विनियुक्तांस्त्वं जहि हत्वा:
एतान् गुरून् बंधूंश्चान्यानपि भो यास्यस्मात् कथं हन्यामिति मा व्यथिष्ठाः तान्युद्धिक्षधर्मभयेन बंधुस्ने

॥ द्रोणं च भीष्मं च जयद्रथं च कर्णं तथान्यानपि योधवीरान्॥ मया हतांस्त्वं जहि मा व्यथिष्ठा युध्य॥
॥ स्व जेतासि रणे सपत्नान्॥३४॥ संजय उवाच॥ एतच्छ्रुत्वा वचनं केशवस्य कृतांजलिर्वेप॥
॥ मानः किरीटी॥ नमस्कृत्वा भूय एवाह कृष्णं सगद्गदं भीतभीतः प्रणम्य॥३५॥ ॥

हेन कारुण्येन च मा व्यथां कृथाः यतस्ते कृतापराधा मयैव हनने विनियुक्ताः अतो निर्विशंको युध्य
स्व रणे सपत्नान् जेतासि त्वं प्राप्स्यसि॥ नितेषां वधेनुशंसता गंधः अपि तु जय एव त्वं प्रत्यर्थः॥३४
संजय उवाच॥ एतदिति एतदाश्रितवात्सल्यजलधेः केशवस्य वचनं श्रुत्वा अर्जुनस्तस्मै नमस्कृत्वा भीतभी
तो नितिभीतस्तं प्रणम्य कृतांजलिर्वेपमानः सगद्गदमाह॥३५॥ ॥ ९८॥

अर्जुन उवाच॥ स्थानइति॥ स्थाने युक्तं तदेतद्युद्धदिदृक्षयागतमशेषं देवगंधर्वयक्षसिद्धविद्याधरकिंन
र [illegible] किंपुरुषादिकं जगत्त्वत्प्रसादात्त्वां सर्वेश्वरमवलोक्य तव प्रकीर्त्या सर्वं प्रहृष्यति अनुरज्यते च रोमोऽभवदुनवदि
यच्च त्वामवलोक्य रक्षांसि भीतानि सर्वा दिशः प्रद्रवंति सर्वे सिद्धसंघा नमस्यंति च तदेतत्सर्वं युक्तमि
ति पूर्वेण संबंधः युक्ततामेवोपपादयति॥३६॥ कस्मादिति॥ महात्मंस्ते तुभ्यं गरीयसे ब्रह्मणो हिरण्य
गर्भस्यापि आदिभूताय कर्त्रे हिरण्यगर्भादयः कस्माद्धेतोर्न नमस्कुर्युः॥ अनंत देवेश जगन्निवास

॥अर्जुन उवाच॥ स्थाने हृषीकेश तव प्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यते च॥ रक्षांसि भीतानि दिशो ॥
॥ द्रवंति सर्वे नमस्यंति च सिद्धसंघाः॥३६॥ कस्माच्च ते न नमेरन्महात्मन् गरीयसे ब्रह्मणोप्यादिकर्त्रे॥
॥ अनंत देवेश जगन्निवास त्वमक्षरं सदसत्तत्परं यत्॥३७॥ त्वमेवाक्षरं न क्षरतीत्यक्षरं जीवात्म
तत्वं न जायते म्रियते वा विपश्चिदित्यादिश्रुतिसिद्धो जीवात्मा स हि न क्षरति सदसच्च त्वमेव सदस
च्छब्दनिर्दिष्टं कार्यकारणभावेनावस्थितं प्रकृतितत्त्वं नामरूपविभागवत्तया कार्यावस्थं सच्छब्दनिर्दि
ष्टं तदनर्हतया कारणावस्थमसच्छब्दनिर्दिष्टं तत्परं यत्तस्मात्प्रकृतेः प्रकृतिसंबंधिनश्च जीवात्मनः पर

॥ गी॰ भा॰ मस्यत ॥ मुक्तात्मतत्त्वं यत्तदपि त्वमेव ॥ ३७ ॥ त्वमादिदेव इति ॥ निधीयते त्वयि विश्वमिति त्वमस्य परं नि अ॰ ११ ॥
॥ ९७ ॥ धानं विश्वस्य शरीरभूतस्यात्मतया परमाधारभूतस्त्वमेवेत्यर्थः ॥ जगति सर्वैर्विदिता वेद्यं च सर्वं त्व
मेव एवं सर्वात्मतयावस्थितस्त्वमेव परं च धाम स्थानं प्राप्यस्थानमित्यर्थः ॥ त्वया ततं विश्वमनंतरूप त्व

॥ त्वमादिदेवः पुरुषः पुराणस्त्वमस्य विश्वस्य परं निधानं ॥ वेत्तासि वेद्यं च ॥
॥ परं च धाम त्वया ततं विश्वमनंतरूप ॥ ३८ ॥ वायुर्यमोऽग्निर्वरुणः शशांक ॥
॥ कः प्रजापतिस्त्वं प्रपितामहश्च ॥ नमो नमस्तेऽस्तु सहस्रकृत्वः पुन ॥
॥ श्च भूयोऽपि नमो नमस्ते ॥ ३९ ॥ ॥ श्रीहरिकृष्णाय नमः ॥ ॥

यात्मत्वेन विश्वं चिदचिन्मिश्रं जगत्ततं व्याप्तं अतस्त्वमेव वाय्वादिशब्दवाच्य इत्याह ॥ ३८ ॥ वायुरिति ॥ स
र्वेषां प्रपितामहस्त्वमेव सर्वासां प्रजानां पितरः प्रजापतयः प्रजापतीनां पिता हिरण्यगर्भः प्रजानां
पितामहः हिरण्यगर्भस्यापि पिता त्वं प्रजानां प्रपितामहः ॥ तेषामात्मतया तत्तच्छब्दवाच्य इत्यर्थः ॥ ३९ ९७ ॥

नम इति ॥ अत्यद्भुताकारं भगवंतं दृष्ट्वा हर्षोत्फुल्लनयनोऽर्जुनः साध्वसावनतः सर्वतो नमस्करोमि अनं
तवीर्यामितविक्रमस्त्वं सर्वमात्मतया समाप्नोषि ततः सर्वोऽसि यतस्त्वं सर्वं चिदचिद्वस्तुजातमात्मत
या समाप्नोषि ततः सर्वस्य चिदचिद्वस्तुजातस्य त्वच्छरीरतयात्वत्प्रकारत्वात्सर्वप्रकारस्त्वमेव सर्वश
ब्दवाच्योऽसीत्यर्थः ॥ त्वमक्षरं सदसत् वायुर्यमोऽग्निरित्यादि सर्वस्य सामानाधिकरण्यनिर्देशस्यात्मत

नमः पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ॥ अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि ततोऽसि
सर्वः ॥ ४० ॥ सखेति मत्वा प्रसभं यदुक्तं हे कृष्ण हे यादव हे सखेति ॥ अजानता महिमानं तवेदं मया प्र
मादात्प्रणयेन वापि ॥ ४१ ॥ यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ॥ एकोऽथवाप्यच्यु
त तत्समक्षं तत्क्षामये त्वामहमप्रमेयं ॥ ४२ ॥ यात्मा निर्देश हेतुरिति सुव्यक्तमुक्तं त्वया ततं विश्वमनं
तरूप सर्वं समाप्नोषि ततोऽसि सर्व इति ॥ ४० ॥ सखेति ॥ यच्चेति ॥ अनंतवीर्यामितविक्रमस्य तव सर्वांतरा
त्मत्वस्रष्टृत्वादिकोऽयं महिमा तवेदं महत्त्वमजानता मया प्रमादान्मोहात्प्रणयेन चिरपरिचयेन स
खेति समवयस्क इति मत्वा हे कृष्ण हे यादव हे सखेति मया प्रसभं विनयापेतं यदुक्तं च परिहासार्थं सर्वं

एकः सखीनिमित्तरहसि स्थितो यद्वा तेषां समक्षं (वा) नोऽसमत्तत्क्षमयामीत्यर्थः ॥२

॥गी॰भा॰ दैवसत्काराऽर्हस्त्वमसत्कृतोऽसि विहारशय्यासनभोजनेषु सहकृतेषु एकोऽथवा तत्समक्षं वा यदसत्कृ अ॰ ११॥
॥२०७॥ तोऽसि तत्सर्वं त्वामप्रमेयमहं क्षमापये ॥४१॥४२॥ पितासीति ॥ अस्य चराचरस्य लोकस्य पितासि अस्य
लोकस्य गुरुश्चासि अतस्त्वमस्य लोकस्य चराचरस्य गरीयान् पूज्यतमः ॥ न त्वत्समोऽस्त्यभ्यधिकः
कुतोऽन्यो लोकत्रयेऽपि त्वदन्यः कारुण्यादिना गुणेन केनापि न त्वत्समोऽस्ति कुतोऽभ्यधिकः ॥४३॥

॥ पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ॥ न त्वत्समोऽस्त्यभ्यधिकः
॥ कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥४३॥ तस्मात्प्रणम्य प्रणिधाय कायं प्रसादये त्वा
॥ महमीशमीड्यं ॥ पितेव पुत्रस्य सखेव सख्युः प्रियः प्रियायार्हसि देव सोढुं ॥४४॥

तस्मादिति ॥ यस्मात्त्वं सर्वस्य पिता पूज्यतमो गुरुश्च कारुण्यादिगुणैश्च सर्वाधिकोऽसि तस्मात्त्वां प्रण
म्य प्रणिधाय प्रकर्षेण नीचैर्धृत्वा कायं प्रसादये यथा कृतापराधस्यापि पुत्रस्य यथा सख्युर्वा प्रणामपूर्व
कं प्रार्थितः पिता सखा वा प्रसीदति तथा त्वं परमकारुणिकः प्रियः प्रियायमे सर्वं सोढुमर्हसि ॥४५॥ २०७

प्रियः प्रियायाः इत्यत्र विसर्गलोपे सति ... सन्धिरार्षः

अदृष्टेति ॥ अदृष्टपूर्वमत्यद्भुतमत्युग्रं च तव रूपं दृष्ट्वा हृषितोऽस्मि भयेन च प्रव्यथितं मे मनः अतस्तदे
व प्रसन्नं रूपं मे दर्शय ॥ प्रसीद हे देवेश जगन्निवास मयि प्रसादं कुरु देवानां ब्रह्मादीनामपीश जगदा
श्रयभूत ॥४५॥ किरीटिनमिति ॥ तथैव पूर्ववत्किरीटिनं गदिनं चक्रहस्तं त्वां द्रष्टुमिच्छामि अतस्तेनैव
पूर्वसिद्धेन चतुर्भुजेन रूपेण युक्तो भव सहस्रबाहो विश्वमूर्ते इदानीं सहस्रबाहुत्वेन विश्वशरीरत्वेन

॥ अदृष्टपूर्वं हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथितं मनो मे ॥ तदेव मे दर्शय देव रूपं प्रसीद देवेश ज ॥
॥ गन्निवास ॥४५॥ किरीटिनं गदिनं चक्रहस्तमिच्छामि त्वां द्रष्टुमहं तथैव ॥ तेनैव रूपेण चतुर्भुजे ॥
॥ न सहस्रबाहो भव विश्वमूर्ते ॥४६॥ श्रीभगवानुवाच ॥ मया प्रसन्नेन तवार्जुनेदं रूपं परं दर्शित ॥
॥ मात्मयोगात् ॥ तेजोमयं विश्वमनन्तमाद्यं यन्मे त्वदन्येन न दृष्टपूर्वं ॥४७॥ दृश्यमानरूपस्त्वं तेनै
व रूपेण युक्तो भवेत्यर्थः ॥४६॥ श्रीभगवानुवाच ॥ मयेति ॥ यन्मे तेजोमयं तेजोराशिं विश्वं सर्वात्मक
मनन्तमन्तरहितं प्रदर्शनार्थमिदं आदिमध्यान्तरहितं आद्यं कृत्स्नस्यादिभूतं त्वदन्येन केनापि न
दृष्टपूर्वं रूपं तदिदं प्रसन्नेन मया मद्भक्ताय ते दर्शितं आत्मयोगात् आत्मनः सत्यसंकल्पत्वयोगयुक्त
त्वात् ॥४७

 

न्यंन्यनकिंव्यतिरिक्तैः सर्वैरप्युपायैर्यथावदवस्थितोहं द्रष्टुमशक्यस्तस्मात् ॥ नवेदेति ॥ एवंरूपोयथा
वस्थितोहं मयि भक्तिमतस्त्वत्तोन्येनएकांतभक्तिरहितेन केनापि पुरुषेण केवलं वेदयज्ञादिभिर्द्रष्टुं न
शक्यः ॥ ४८ ॥ मातेइति ॥ ईदृशंघोरस्वरूपदर्शनेन तेयाव्यथायश्चविमूढभावो वर्तते तदुभयंमाभूत्त्वया
भरस्तपूर्वमेवसौम्यरूपं दर्शयामि तदेवममरूपं प्रपश्य ॥ ४९ ॥ संजयउवाच ॥ इतीति ॥ एवं पांडुतन
॥ नवेदयज्ञाध्य यनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः ॥ एवंरूपः शक्यअहंनृलोकेद्रष्टुंत्वदन्येनकु
रुप्रवीर ॥ ४८ ॥ मातेव्यथामाचविमूढभावोदृष्ट्वारूपंघोरमीदृङ्ममेदं ॥ व्यपेतभीः प्रीतमनाः पुनस्त्वंत
देवमेरूपमिदंप्रपश्य ॥ ४९ ॥ संजयउवाच ॥ इत्यर्जुनंवासुदेवस्तथोक्त्वास्वकंरूपंदर्शयामासभूयः
आश्वासयामासचभीतमेनंभूत्वापुनः सौम्यवपुर्महात्मा ॥ ५० ॥ यः वसुदेवसूनुरुक्त्वानृपः स्वकीय
मेवचतुर्भुजरूपंदर्शयामास ॥ अपरिचितरूपदर्शनेनभीतमेनंपुनरपिपरिचितसौम्यवपुर्भूत्वाश्वा
सयामाससचमहात्मासत्यसंकल्पः । अस्यसर्वेश्वरस्यपरमपुरुषस्यपरस्यब्रह्मणोजगदुपकृति
मर्त्यस्यवसुदेवसूनोश्चतुर्भुजमेवस्वकीयंरूपंकंसाद्भीतवसुदेवदेवकीप्रार्थितेनकंसवधात्पूर्वंभु 

जद्वयमुपसंहृतंपश्चादाविष्कृतंच ॥ ज्ञातोसिदेवदेवेशशंखचक्रगदाधर ॥ दिव्यंरूपमिदंदेवप्रसादेनो
पसंहर ॥ उपसंहरसर्वात्मन्रूपमेतच्चतुर्भुजमितिहिप्रार्थितेंशिशुपाजन्मापिहित्वानवरतभावनावि
षयंचतुर्भुजमेववसुदेवसूनोरूपं ॥ उदारपीवरचतुर्बाहुंशंखचक्रगदाधरमिति ॥ अतः पार्थेनात्रते
नैवरूपेणचतुर्भुजेनेत्युच्यते ॥ ५० ॥ अर्जुनउवाच ॥ दृष्ट्वेति ॥ अनवधिकातिशयसौंदर्यसौकुमार्य
अर्जुनउवाच ॥ दृष्ट्वेदंमानुषंरूपंतवसौम्यंजनार्दन ॥ इदानीमस्मिसंवृत्तः सचेताः प्रकृतिंगतः ॥ ५१ ॥
श्रीभगवानुवाच ॥ सुदुर्दर्शमिदंरूपंदृष्टवानसियन्मम ॥ देवाअप्यस्यरूपस्यनित्यंदर्शनकांक्षिणः ॥ ५२ ॥
नाहंवेदैर्नतपसानदानेननचेज्यया ॥ शक्यएवंविधोद्रष्टुंदृष्टवानसिमांयथा ॥ ५३ ॥ लावण्यादियुक्तंत
वैवासाधारणमनुष्यत्वसंस्थानस्थितमतिसौम्यमिदंरूपंदृष्ट्वा इदानींसचेताः संवृत्तोस्मिप्रकृतिंगतश्च
५१ ॥ श्रीभगवानुवाच ॥ सुदुर्दर्शमिति मममेदंसर्वस्यप्रशासनेवस्थितंसर्वात्मकंसर्वकारणभूतंयत्त्वंदृष्ट
वानसितत्सुदुर्दर्शनकेनापिद्रष्टुंशक्यं ॥ अस्यरूपस्यदेवाअपिनित्यंदर्शनकांक्षिणः नतुदृष्टवंतः ॥ ननु
सार्थश्रीरामानम ५२ ॥ नाहमिति ॥ ॥ भक्त्येति ॥ वेदैरध्यापनप्रवचनाध्ययनश्रवणजपविषयैर्यागदानहोमतपोभि

ष्यमद्भक्तिविरहितैः केवलै र्यथावदवस्थितोऽहं द्रष्टुमशक्यः अनन्यया तु भक्त्या तत्त्व
तश्शास्त्रैर्ज्ञातुं तत्त्वतः साक्षात्कर्तुं तत्त्वतः प्रवेष्टुं च शक्यः ॥ तथा च श्रु
तिः ॥ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन यमेवैष वृणुते तेन लभ्यस्त
स्यैष आत्मा विवृणुते तनूं स्वामिति ॥५३॥५४ मदिति वेदाध्ययनादीनि सर्वाणि मदाराधनरूपा
णीति यः करोति स मत्कर्मकृत् मत्परमः सर्वेषामारंभाणामहमेवोद्देश्य उपेयस्स मत्परमः अत्यर्थम

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ॥ ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥५४॥ मत्कर्मकृन्मत्प
रमो मद्भक्तः संगवर्जितः ॥ निर्वैरः सर्वभूतेषु यः स मामेति पांडव ॥५५॥

त्प्रियत्वेन मत्कीर्तनस्तुतिध्याना
र्चनप्रणामादिभिर्विना आत्मधारणमलभमानो मदेकप्रयोजनतया यः सततं तानि करोति स मद्भक्तः संग
वर्जितः मदेकप्रियत्वेनेतरसंगमसहमानः ॥ निर्वैरः सर्वभूतेषु मत्संश्लेषवियोगैकसुखदुःखस्वभाव
त्वात्स्वदुःखस्य स्वापराधनिमित्तत्वानुसंधानात्सर्वभूतानां परमपुरुषतंत्रत्वानुसंधानाच्च सर्वभूतेषु वैर
निमित्ताभावात्तेषु निर्वैरः य एवंभूतः स मामेति मां यथावदवस्थितं प्राप्नोति निरस्ताविद्याद्यशेषदोषगं
धो मदेकानुभवो भवतीत्यर्थः ॥५५॥ १०२॥

॥इति श्रीमद्रामानुजाचार्यविरचिते गीताभाष्ये एकादशोऽध्यायः ॥११॥ भक्तियोगनिष्ठानां प्राप्यभूतस्य ब्रह्म
णो भगवतो नारायणस्य निरंकुशैश्वर्यं साक्षात्कर्तुकामायार्जुनायानवधिकातिशयकारुण्यौदार्य
सौशील्यादिगुणसागरेण सत्यसंकल्पेन भगवता स्वैश्वर्यं यथावदवस्थितं दर्शितं उक्तं च तत्त्वतो भग
वज्ज्ञानदर्शनप्राप्तीनामैकांतिकात्यंतिकभगवद्भक्त्येकलभ्यत्वं ॥ अनंतरमात्मप्राप्तिसाधनभूतात्मो [illegible]
पासनात् भक्तिरूपस्य भगवदुपासनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुखोपादानत्वाच्च श्रैष्ठ्यं भगवदुपा

॥इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे विश्वरूपदर्शनं नामैका

[illegible]

दशोऽध्यायः ॥११॥ सनस्य स्वसाध्यनिष्पादने शैघ्र्यात्सुसुखोपादानत्वाच्च श्रैष्ठ्यं भगवदुपासनोपायश्च तद [illegible]
शक्तस्याक्षरनिष्ठता तदपेक्षिताश्चोच्यंते ॥ भगवदुपासनस्य प्राप्यभूतोपायस्य श्रैष्ठ्यात् श्रेयस्त्वं तु योगि
[illegible] नामपि सर्वेषां मद्गतेनांतरात्मना श्रद्धावान् भजते यो मां स मे युक्ततमो मत इत्युक्तं ॥ अर्जुन उवाच
॥ एवमिति ॥ एवं मत्कर्मकृदित्यादिनोक्तेन प्रकारेण सततयुक्ता भगवंतं त्वामेव परमप्राप्यं मन्वाना
ये भक्ताः त्वां सकलविभूतियुक्तमनवधिकातिशयसौंदर्यसौशील्यसार्वज्ञ्यसत्यसंकल्पत्वाद्यनंतगुण

सागरं पतितुर्गुणैरुपासते॥ येचाप्यक्षरं प्रत्यगात्मस्वरूपं तद्देवाद्यव्यक्तं चक्षुरादिकरणेनानभिव्यक्त
॥२०३॥ स्वरूपमुपासते॥ तेषामुभयेषां के योगवित्तमाः। के स्वसाध्यं प्रयुतिर्ज्ञास्यगामिन इत्यर्थः॥ भ
वामिनेचिरात्प्राप्यं मय्यावेशितचेतसामित्युत्तरं त्रयोगवित्तमत्वं ज्ञो प्रविषयमिति मंत्रयिष्य अ॰१२ श्लो॰३-

॥अर्जुन उवाच॥ एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते॥
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः॥१॥
श्रीभगवानुवाच॥ मय्यावेश्य मनो ये मां नित्ययुक्ता॥
उपासते॥ श्रद्धया परयोपेतास्ते मे युक्ततमा मताः॥२॥

ते॥१॥ श्रीभगवानुवाच॥ मयीति॥ अत्यर्थमतिस्थिरत्वेन मनो मय्यावेश्य श्रद्धया परयोपे
तानित्ययुक्ता नित्ययोगकांक्षमाणा मामुपासते ये वाप्य विपर्यं मनो मय्यावेश्य ये मामुपास
त इत्यर्थः॥ ते युक्ततमा मता मां सुखेनाचिरात्प्राप्नुवंतीत्यर्थः॥२॥ १०३॥

॥ये त्विति॥ संनियम्येति॥ क्लेशोऽधिकतर इति॥ ये त्वक्षरं प्रत्यगात्मस्वरूपमनिर्देश्यं देहादन्यतया
देवादिशब्दानिर्देश्यं तत एवाव्यक्तं चक्षुरादिकरणाव्यक्तं सर्वत्रगमचिंत्यं च देवादिदेहेषु वर्तमानमपि
न हि सजातीयतया तेन रूपेण चिंतयितुमनर्हं अत एव कूटस्थं सर्वसाधारणं तत्तद्देवाद्यसाधारणा
कारासंबद्धमित्यर्थः॥ अपरिणामित्वेनासाधारणाकारान्न चलतीत्यचलं अत एव ध्रुवं
नित्यं संनियम्येंद्रियग्रामं सर्वेभ्यः स्वव्यापारेभ्यः सम्यक्नियम्य सर्वत्र समबुद्धयः सर्वत्र देवादिविषमाकारे

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते॥ सर्वत्रगमचिंत्यं च कूटस्थमचलं ध्रुवं॥३॥ संनियम्येंद्रियग्रामं सर्व
त्र समबुद्धयः॥ ते प्राप्नुवंति मामेव सर्वभूतहिते रताः॥४॥ क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसां॥ अ
व्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते॥५॥ पुष्कवस्थितेषात्मसुज्ञानैकाकारतया समबुद्धयः तत एव सर्व
भूतहिते रताः सर्वभूतहितेरतत्वान्निहत्तं सर्वभूताहितरतत्वमात्मनो देवादिविषमाकाराभिमान
निमित्तं य एवमक्षरमुपासते ते पि मां प्राप्नुवंत्येवमस्मानाकारमसंसारिणमात्मानं प्राप्नुवंतीत्ये
र्थः॥ मम साधर्म्यमागता इति वक्ष्यते श्रूयते च निरंजनः परमं साम्यमुपैतीति तथाक्षरत्वादनिर्दि

॥गी॰भा॰॥ शात्कूटस्थात्अन्यत्वंपरस्यब्रह्मणोवक्ष्यतेकूटस्थोक्षरउच्यते॥उत्तमःपुरुषस्त्वन्यइतिअक्षरवि अ॰१२॥
॥१०४॥ द्यायांतुअक्षरशब्दनिर्दिष्टंपरमेवब्रह्मेतिनतयोनित्यादेवतेषांअव्यक्तासक्तचेतसांक्लेशोधिकतरः अव्य
क्ताहिगतिः अव्यक्तविषयामनोवृत्तिःदेहवद्भिर्देहात्माभिमानयुक्तैःदुःखेनावाप्यते॥देहवंतोहिदेह
मेवात्मानंमन्यंते॥३।४।५॥भगवंतमुपासीनानांयुक्ततमत्वंसुव्यक्तमाह॥यइति॥तेषामिति॥येतु
लौकिकानिदेहयात्राशेषभूतानिदेहधारणार्थानिचाशनादीनिकर्माणिवैदिकानिचयागदानहो

॥येतुसर्वाणिकर्माणिमयिसंन्यस्यमत्पराः॥अनन्येनैवयोगेनमांध्यायंतउपासते॥६॥
॥तेषामहंसमुद्धर्तामृत्युसंसारसागरात्॥भवामिनचिरात्पार्थमय्यावेशितचेतसां॥७॥

मतपःप्रभृतीनिसर्वाणिसंकारकाणिसोद्देश्यानिअध्यात्मचेतसामयिसंन्यस्यमत्परामदेकप्राप्याः
अनन्येनैवयोगेनअनन्यप्रयोजनेनयोगेनमांध्यायंतउपासते॥ध्यानार्चनप्रणामस्तुतिकीर्तनादी
निस्वयमेवात्यंतप्रियाणिप्राप्यसमानिकुर्वंतोमामुपासतेइत्यर्थः॥तेषांमत्प्राप्तिविरोधितयामृत्युभू
तात्संसाराख्यात्सागरादहमचिरेणैवकालेनसमुद्धर्ताभवामि॥६।७॥ १०४॥

॥अतोतिशयज्ञानार्थत्वात्सुलभत्वादचिरलभ्यत्वाच्चमय्येवमनआधत्स्वमयिमनःसमाधानं
कुरुष्वमयिबुद्धिंनिवेशयअहमेवपरमप्राप्यइतिअध्यवसायंकुरु॥अतऊर्ध्वंमय्येवनिवसिष्यसि
अहमेवपरमप्राप्यइत्यध्यवसायपूर्वकमनोनिवेशनानंतरमेवमयिनिवसिष्यसीत्यर्थः॥८॥अ
थेति॥अथसहसैवमयिस्थिरंचित्तंसमाधातुंनशक्नोषिततोभ्यासयोगेनमांप्राप्तुमिच्छस्वाभावि

॥मय्येवमनआधत्स्वमयिबुद्धिंनिवेशय॥निवसिष्यसिमय्येवअतऊर्ध्वंनसंशयः॥८॥
॥अथचित्तंसमाधातुंनशक्नोषिमयिस्थिरं॥अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय॥९॥
॥अभ्यासेप्यसमर्थोसिमत्कर्मपरमोभव॥मदर्थमपिकर्माणिकुर्वन्सिद्धिमवाप्स्यसि॥१०॥

कानवधिकातिशयसौंदर्यसौशील्यसौहार्दवात्सल्यकारुण्यमाधुर्यगांभीर्यौदार्यपराक्रमसर्वज्ञ
त्वसत्यसंकल्पत्वसकलकारणत्वाद्यसंख्येयकल्याणगुणसागरेनिखिलहेयप्रत्यनीकेमयिनिर
तिशयप्रेमगर्भस्मृत्यभ्यासयोगेनस्थिरंचित्तसमाधानंलब्ध्वामांप्राप्तुमिच्छ॥९॥अभ्यासइति॥अ
थैवंविधस्मृत्यभ्यासेप्यसमर्थोसिमत्कर्मपरमोभवमदीयानिकर्माणिआलयनिर्माणोद्यानकर

मदेकप्रियत्वनेनाका रेयस्मतम्

णप्रदीपारोपणमार्जनाभ्युक्षणोपलेपनपुष्पाहरणपूजनोद्वर्त्तननामकीर्त्तनप्रदक्षिणनमस्कार अ॰१२
स्तुत्यादीनि तान्यत्यर्थप्रियत्वेनाचर ॥ अत्यर्थप्रियत्वेन मदर्थं कर्माणि कुर्वन्नचिरादभ्यासयोगपू
र्विकां मयि स्थिरां चित्तस्थितिं लब्ध्वा मत्प्राप्तिरूपां सिद्धिमवाप्स्यसि ॥१०॥ अथैतेति ॥ अथ मद्योगमाश्रि
त्यैतदपि कर्तुं न शक्तोऽसि मद्गुणानुसंधानकृतमदेकप्रियत्वाकारं भक्तियोगमाश्रित्य भक्तियोगांगभूतम
त्कर्मापि कर्तुं न शक्तोऽसि ततोऽक्षरयोगमात्मस्वभावानुसंधानरूपं परमभक्तिजननं पूर्वषट्कोदितमा

॥अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ॥ सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥११॥

(अक्षरयोगम्:)
श्रित्य तदुपायतया सर्वकर्मफलत्यागं कुरु मत्प्रियत्वेन मदेकप्राप्यताबुद्धिः क्षीणाशेषपापस्यैव जाय
ते यतात्मवान् यतमनस्कः ॥ ततोऽनभिसंहितफलेन मदाराधनरूपेणानुष्ठितेन कर्मणा सिद्धेनात्मज्ञा
नेन निवृत्ताविद्यादिदोषतिरोधाने मच्छेषतैकस्वरूपे प्रत्यगात्मनि साक्षात्कृते मत्तिमयि परा भक्तिः स्व
यमेवोत्पद्यते ॥ तथा च वक्ष्यते ॥ स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्यारभ्य मद्भक्तिं लभते परा
मित्यंतेन ॥११॥ १०५॥

(जीवस्य)
॥श्रेयो हीति ॥ अत्यर्थप्रीतिविरहितात्कर्मस्वरूपात् स्मृत्यभ्यासादक्षरयाथात्म्यानुसंधानपूर्वकं
तदपरोक्षज्ञानमेवात्महितत्वे विशिष्यते ॥ आत्मापरोक्षज्ञानादप्यनिष्पन्नरूपात्तदुपायभूतात्म
ध्यानमेवात्महितत्वे विशिष्यते ॥ ध्यानादप्यनिष्पन्नरूपात्तदुपायभूतं फलत्यागेनानुष्ठितं कर्मैव वि
शिष्यते ॥ अनभिसंहितफलादनुष्ठितात्कर्मणोऽनंतरमेव निरस्तपापतया मनसः शांतिर्भविष्यते शां
तेन मनसात्मनः ध्यानं संपत्स्यते ॥ ध्यानात् ज्ञानं ज्ञानाच्च तदपरोक्षात् परा भक्तिरिति भक्तियोगाभ्यासा

॥श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ॥ ध्यानात्कर्मफलत्यागस्त्यागाच्छांतिरनंतरं ॥१२॥

सक्तमनसः आत्मनिष्ठैव श्रेयसी आत्मनिष्ठस्याप्यशांतमनसो निष्ठाप्राप्तये तद्गर्भात्मज्ञानादन
भिसंहितफलकर्मनिष्ठैव श्रेयसीत्यर्थः ॥ अनभिसंहितफलकर्मनिष्ठस्योपादेयान्गुणानाह ॥ ॥१३॥
॥अद्वेष्टेति ॥ संतुष्ट इति ॥ अद्वेष्टा सर्वभूतानां द्विषतां द्वेषं कुर्वतामपकुर्वतामपि सर्वेषां भूतानाम
द्वेष्टा मदपराधानुगुणमीश्वरप्रेरितानि एतानि भूतानि द्विषंति अपकुर्वंति चेत्यनुसंदधानः तेषु द्वि
षत्स्वपकुर्वत्सु च सर्वभूतेषु मैत्रीं कुर्वन्मैत्रः तेष्वेव दुःखितेषु करुणां कुर्वन्करुणः ॥ निर्ममः देहेंद्रि

[illegible]

॥गी॰भा॰ येषु तत्संबंधिषु च निर्ममः ॥ निरहंकारः देहात्माभिमानरहितः ततएव समदुःखसुखः सुखदुःखा अ॰१२॥
॥१०६ गमयोः लौकिकयोर्हर्षोद्वेगरहितः ॥ क्षमी स्वपराभवयोरवर्जनीययोर्विकाररहितः संतुष्टः
यदृच्छोपपन्नेन येन केनापि देहधारणद्रव्येण संतुष्टः ॥ सततं योगी सततं वृत्तिवियुक्तात्मानुसं
धानपरः यतात्मा नियमितमनोवृत्तिः दृढनिश्चयः अध्यात्मशास्त्रोदितेष्वर्थेषु सुदृढनिश्चयः म

॥ अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥१३॥
॥ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः ॥१४॥

य्यर्पितमनोबुद्धिः भगवान्वासुदेवो नभिसंहितफलेनानुष्ठितेन कर्मणा आराध्यते ॥ आराधि
तश्च मम आत्मा परोक्षं प्रसाधयिष्यतीति मय्यर्पितमनोबुद्धिः एवंभूतो मद्भक्तः एवंभूतेन कर्मयोगे
न मां भजमानो यः स मे प्रियः ॥ १३ ॥ १४ ॥

१०६॥

यस्मादिति ॥ यस्मात्कर्मनिष्ठात् पुरुषान्निमित्तभूतात् लोको नोद्विजते यो लोकोद्वेगकरं कर्म किंचि
दपि न करोतीत्यर्थः ॥ लोकाच्च निमित्तभूताद्यो नोद्विजते यमुद्दिश्य सर्वो लोको नोद्वेगकरं कर्म करो
ति सर्वाविरोधित्वनिश्चयात् ॥ अत एव कंचन न प्रति हर्षेण कंचन न प्रत्यमर्षेण कंचन न प्रति भयेन कंचन न
प्रत्युद्वेगेन मुक्तः ॥ एवंभूतो यः सोपि मे प्रियः ॥१५॥ अनपेक्ष इति ॥ अनपेक्षः आत्मव्यतिरि

॥ यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ॥ हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥१५॥
॥ अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ॥ सर्वारंभपरित्यागी यो मद्भक्तः स मे प्रियः ॥१६॥

क्ते कृत्स्ने वस्तुन्यनपेक्षः शुचिः शास्त्रविहितद्रव्यवर्धितकायः दक्षः शास्त्रीयक्रियोपादानसमर्थः
अन्यत्रोदासीनः गतव्यथः शास्त्रीयक्रियानिर्वहनावर्जनीयशीतोष्णवर्षादिदुःखेषु व्यथारहि
तः सर्वारंभपरित्यागी शास्त्रीयव्यतिरिक्तसर्वकर्मारंभपरित्यागी य एवंभूतो मद्भक्तः स मे प्रियः ॥१६

॥यो न हृष्यति न द्वेष्टि यच्च मनुष्याणां शोकनिमित्तं भार्यापुत्रवित्तक्षयादिकं तत्प्राप्य न शोचति
तथाविधमप्राप्तं च न कांक्षति ॥ यच्च मनुष्याणां हर्षनिमित्तं भार्यावित्तादि तत् अप्राप्तं न कांक्षतीत्य-
र्थः ॥ शुभाशुभपरित्यागी पापवत् पुण्यस्यापि बंधहेतुत्वाविशेषादुभयपरित्यागी य एवंभूतो भक्तिमा-
न् स मे प्रियः ॥१७॥ समः शत्राविति ॥ तुल्येति ॥ अद्वेष्टा सर्वभूतानामित्यादिना शत्रुमित्रादिषु द्वेषरहितत्व-

॥ यो न हृष्यति न द्वेष्टि न शोचति न कांक्षति ॥ शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥१७॥
॥समः शत्रौ च मित्रे च तथा मानापमानयोः ॥ शीतोष्णसुखदुःखेषु समः संगविवर्जितः ॥१८॥
॥ तुल्यनिंदास्तुतिर्मौनी संतुष्टो येन केनचित् ॥ अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥१९॥

मुक्तं ॥ अत्र तु द्वेष्यादिषु संनिहितेष्वपि समचित्तत्वमिति ततोऽतिरिक्तो विशेष उच्यते ॥ आत्मनि
स्थिरमतित्वेन निकेतादिष्वसक्त इत्यनिकेतः ॥ तत एव मानापमानादिष्वपि समः ॥ य एवंभूतो भक्ति-
मान् स मे प्रियः ॥ अस्मादात्मनिष्ठात् मद्भक्तियोगनिष्ठस्य श्रैष्ठ्यमिति प्रतिपादयन् यथोपक्रममु-
पसंहरति ॥१८॥१९॥ १०७॥

य इति ॥ धर्म्यं चामृतं चेति धर्म्यामृतं ये तु प्राप्यसमं प्रापकं भक्तियोगं यथोक्तं मय्यावेश्य मनो ये मामि-
त्यादिनोक्तेन प्रकारेणोपासते ॥ ते भक्ता अतितरां मे प्रियाः ॥२०॥ इति श्रीमद्रामानुजाचार्यविरचि-
ते गीताभाष्ये द्वादशोऽध्यायः ॥ १२ ॥ पूर्वस्मिन् षट्के परमप्राप्यस्य परस्य ब्रह्मणो वासुदेवस्य प्राप्त्यु-
पायभक्तिरूपभगवदुपासनांगभूतं प्राप्तुः प्रत्यगात्मनो याथात्म्यदर्शनं ज्ञानयोगकर्मयोगलक्षण-
निष्ठाद्वयसाध्यमुक्तं ॥ मध्यमे च परमप्राप्यभूतभगवत्तत्त्वयाथात्म्यतन्माहात्म्यज्ञानपूर्वकैकांतिका-

॥ ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ॥ श्रद्दधाना मत्परमा भक्तास्तेतीव मे प्रियाः ॥२०॥
॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे भक्तियो ॥
॥ गो नाम द्वादशोऽध्यायः ॥१२॥

त्यंतिकभक्तियोगनिष्ठा प्रतिपादिता ॥ अतिशयितैश्वर्यापे- तैश्वर्यार्थिनाम्
कैवल्यार्थिनाम् क्षाणामात्मकैवल्यमात्रापेक्षाणां च भक्तियोगस्तत्तदपेक्षितसाधनमिति चोक्तं ॥ इदानीमुपरितने ष-
ट्के प्रकृतिपुरुषतत्संसर्गरूपप्रपंचेश्वरतत्त्वयाथात्म्यकर्मज्ञानभक्तिस्वरूपतदुपादानप्रकाराश्च
षट्कद्वयोदिता विशोध्यंते ॥ तत्र तावत् त्रयोदशे देहात्मनोः स्वरूपं देहयाथात्म्यशोधनं देहविमुक्ता-

प्रकृत्यादीनां तत्त्वानां स्वरूपयाथात्म्यं च ज्ञानादीनां स्वरूपं तत्तथानुपादानप्रकार श्च॰२

त्वंपदार्थस्य विविक्तात्मस्वरूपस्य शोधनं तथाविधस्यात्मनश्च शरीरसंबंधहेतुस्ततो विवेकानुसं
धानप्रकारश्चोच्यते ॥ श्रीभगवानुवाच ॥ इदमिति ॥ इदं शरीरं देवोऽहं मनुष्योऽहं स्थूलोऽहं कृशोऽहमि
त्यात्मना भोक्त्रा सामानाधिकरण्येन प्रतीयमानं भोक्तुरात्मनोऽर्थांतरभूतं तस्य भोगक्षेत्रमिति शरीर
याथात्म्यविद्भिरभिधीयते एतदवयवसंघातरूपेण चेदमहं वेद्मीति यो वेत्ति तं वेद्यभूतादस्माद्देहादि
न्नत्वेनार्थांतरभूतं क्षेत्रज्ञ इति तद्विदः आत्मयाथात्म्यविदः प्राहुः यद्यपि देहव्यतिरिक्तघटाद्यर्थानु

॥ श्रीभगवानुवाच ॥ इदं शरीरं कौंतेय क्षेत्रमित्यभिधीयते ॥ एतद्यो वेत्ति तं प्राहुः क्षे॥
॥ त्रज्ञ इति तद्विदः ॥१॥

संधानवेलायां देवोऽहं मनुष्योऽहं घटादिकं जानामीति देहस्य सामाना
धिकरण्येन ज्ञातारमात्मानमनुसंधत्ते तथापि देहानुभववेलायां देहमपि घटादिकमिवेदं वेद्मीति
वेद्यतया वेदितानुभवतीति वेदितुरात्मनो वेद्यतया शरीरमपि घटादिवदर्थांतरं तथा च घटादेरिव
वेद्यभूताच्छरीराद्वेदिता क्षेत्रज्ञोऽर्थांतरभूतः सामानाधिकरण्यप्रतीतिस्तु शरीरस्य गोत्वादिव
दात्मविशेषणतैकस्वभावतया तदपृथक्सिद्धरूपत्वात् ॥१॥ ॥ ॥



क्षेत्रज्ञमिति ॥ देवमनुष्यादिसर्वक्षेत्रेषु वेदितृत्वेनैकं तं क्षेत्रज्ञं च मां विद्धि मदात्मकं विद्धि क्षेत्रज्ञं चापी
ति चशब्दात् क्षेत्रमपि मां विद्धीत्युक्तमित्यवगम्यते ॥ यथा क्षेत्रं क्षेत्रज्ञैकविशेषणतास्वभावतया त
दपृथक्सिद्धेस्तत्सामानाधिकरण्येनैव निर्दिष्टं तथा क्षेत्रं क्षेत्रज्ञश्च मद्विशेषणैकस्वभावतया मद
पृथक्सिद्धेर्मत्सामानाधिकरण्येनैव निर्देश्याविति हि वक्ष्यति ॥ क्षेत्रज्ञातत्वं बद्धमुक्तोभयावस्थात्स्स
राक्षरशब्दनिर्दिष्टादर्थांतरत्वं परस्य ब्रह्मणो वासुदेवस्योत्तमः पुरुषस्त्वन्य इति ॥ पृथिव्यादिसं

॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत ॥ क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम ॥२॥

घातरूपस्य भगवच्छरीरत्वैकस्वभावतया भगवदात्मकत्वं श्रुतयो वदंति यः पृथिव्यां तिष्ठन् यः
पृथिव्या अंतरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयति स त आत्मांतर्याम्यमृत
इत्यारभ्य य आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमंतरो यमयति स
त आत्मांतर्याम्यमृत इत्याद्याः ॥ इदमेवांतर्यामितया सर्वक्षेत्रज्ञानामेव स्थानं भगवत्सामानाधिक
रण्येन व्यपदेशहेतुः ॥ अहमात्मा गुडाकेश सर्वभूताशयस्थितः ॥ न तदस्ति विना यत्स्यान्मया भूतं

॥ गी॰ना॰ आवृत्तं॥ विष्टभ्याहमिदंकृत्स्नमेकांशेनस्थितोजगदितिपुरस्तादुपरिष्टाच्चाभिधायमध्येसामानाधि अ॰ १३ ॥
॥ १०८ ॥ करण्येनव्यपदिशतिआदित्यानामहंविष्णुरित्यादिना॥ इदंक्षेत्रक्षेत्रज्ञयोर्विवेकविषयंतयोर्मदात्म
कत्वविषयंचज्ञानमुक्तंतदेवोपादेयंज्ञानमितिमेमतं॥ केचिदाहुः क्षेत्रज्ञंचापिमांविद्धीतिसामाना
धिकरण्येनैकत्वमवगम्यते॥ तदाचेश्वरस्यैवसतोऽज्ञानात्क्षेत्रज्ञत्वमिवभवतीत्यभ्युपगंतव्यंत
न्निवृत्त्यर्थश्चायमेकत्वोपदेशः॥ अनेनागमभगवदुपदेशेनरज्जुरियंनसर्पइत्याप्तोपदेशेनसर्प
त्वभ्रमनिवृत्तिवत्क्षेत्रज्ञत्वभ्रमोनिवर्ततइतितेप्रष्टव्याः अयमुपदेष्टाभगवान्वासुदेवः परमे
श्वरः किमात्मयाथात्म्यसाक्षात्कारेणनिवृत्ताज्ञानउतनवेति॥ निवृत्ताज्ञानश्चेत्निर्विशेषचिन्मा
त्रस्वरूपआत्मन्यतद्रूपाध्यासासंभावनयाकौंतेयादिभेददर्शनंतान्प्रत्युपदेशादिव्यापाराश्चन
संभवंति॥ अथात्मयाथात्म्यसाक्षात्काराभावादनिवृत्ताज्ञानस्तर्हितस्याज्ञत्वादेवात्मज्ञानोप
देशारंभोनसंभवति॥ उपदेक्ष्यंतितेज्ञानंज्ञानिनस्तत्त्वदर्शिनइत्युक्तं॥ अतएवमादिवादाअनाक
लितश्रुतिस्मृतीतिहासपुराणसदाचारविरोधिभिः स्ववचनस्थापनकुराग्रहैरज्ञानिभिर्जगन्मो
हनायप्रवर्तिताइत्यनादरणीयाः॥ अनेनेदंतत्त्वं॥ अचिद्वस्तुनः चिद्वस्तुनः परस्यचब्रह्मणोभोग्य १०८ ॥

त्वेनभोक्तृत्वेनईशितृत्वेनचस्वरूपविवेकमाहुः काश्चनश्रुतयः॥ अस्मान्मायीसृजतेविश्वमेतत्तस्मिं
श्चान्योमाययासंनिरुद्धः मायांतुप्रकृतिंविद्यान्मायिनंतुमहेश्वरमिति॥ क्षरंप्रधानममृताक्षरंहरः
क्षरात्मानावीशतेदेवएकः अमृताक्षरंहरइतिभोक्तानिर्दिश्यतेप्रधानंभोग्यत्वेनहरतीतिहरः स
कारणंकरणाधिपाधिपोनचास्यकश्चिज्जनितानचाधिपः प्रधानक्षेत्रज्ञपतिर्गुणेशः पतिंविश्व
स्यात्मेश्वरंशाश्वतंशिवमच्युतंज्ञाज्ञौद्वावजावीशानीशौनित्योनित्यानांचेतनश्चेतनानामेकोब
हूनांयोविदधातिकामान्भोक्ताभोग्यंप्रेरितारंचमत्वापृथगात्मानंप्रेरितारंचमत्वाजुष्टस्ततस्तेना
मृतत्वमेति॥ तयोरन्यः पिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीतिअजामेकांलोहितशुक्लकृष्णां
बह्वीःप्रजांजनयंतींसरूपांअजोह्येकोजुषमाणोऽनुशेतेजहात्येनांभुक्तभोगामजोऽन्यः॥ गौरनाद्यंतव
तीसातुजनयित्रीभूतभाविनी॥ समानेवृक्षेपुरुषोनिमग्नोऽनीशयाशोचतिमुह्यमानः जुष्टंयदापश्य
त्यन्यमीशमित्याद्याः॥ अत्रापि॥ अहंकारइतीयंमेभिन्नाप्रकृतिरष्टधा॥ अपरेयमितस्त्वन्यांप्रकृ
तिंविद्धिमेपरां॥ जीवभूतांमहाबाहोययेदंधार्यतेजगत्॥ सर्वभूतानिकौंतेयप्रकृतिंयांतिमा
मिकां॥ कल्पक्षयेपुनस्तानिकल्पादौविसृजाम्यहं॥ प्रकृतिंस्वामवष्टभ्यविसृजामिपुनःपुनः॥ प्र

॥गी॰भा॰ तद्ग्राममिमंकृत्स्नमवशंप्रकृतेर्वशात् ॥ मयाध्यक्षेणप्रकृतिःसूयतेसचराचरं ॥ हेतुनानेनकौंतेयजज अ॰१३॥
॥११०॥ गद्विपरिवर्त्तते ॥ प्रकृतिंपुरुषंचैवविद्ध्यनादीउभावपि ॥ ममयोनिर्महद्ब्रह्मतस्मिन्गर्भंदधाम्यहं ॥ संभ
वःसर्वभूतानांततोभवतिभारतेति ॥ कृत्स्नजगद्योनिभूतंमहद्ब्रह्ममदीयंप्रकृत्याख्यंभूतसूक्ष्ममचिद्व
स्तुयत्तस्मिंश्चेतनाख्यंगर्भंसंयोजयामि ॥ ततोमत्संकल्पकृतात्चिदचित्संसर्गाद्देवादिस्थावरांता
नामचिन्मिश्राणांसर्वभूतानांसंभवोभवतीत्यर्थः ॥ श्रुतावपिभूतादिसूक्ष्मंब्रह्मेतिनिर्दिष्टं ॥ तस्माद
तद्ब्रह्मनामरूपमन्नंचजायतइति ॥ एवंभोग्यभोक्तृरूपेणावस्थितयोःसर्वावस्थावस्थितयोश्चि
दचितोःपरमपुरुषशरीरतयातन्नियाम्यत्वेनतदपृथक्स्थितिंपरमपुरुषस्यचात्मत्वमाहुः
कार्त्स्न्येनश्रुतयः यःपृथिव्यांतिष्ठन्पृथिव्याअंतरोयंपृथिवीनवेदयस्यपृथिवीशरीरंयः
पृथिवीमंतरोयमयतीत्यारभ्ययआत्मनितिष्ठन्नात्मनोंतरोयमात्मानवेदयस्यात्माशरी
रंयआत्मानमंतरोयमयतिसतआत्मांतर्याम्यमृतइत्यंताः ॥ तथायःपृथिवीमंतरेसंचरन्यस्य
पृथिवीशरीरंयंपृथिवीनवेदेत्यारभ्ययोक्षरमंतरेसंचरतियस्याक्षरंशरीरंयमक्षरंनवे
दयोमृत्युमंतःसंचरन्यस्यमृत्युःशरीरंयंमृत्युर्नवेदयःसर्वभूतांतरात्मापहतपाप्मादि ११०॥

[illegible]

योदेवएकोनारायणइत्याद्याः अत्रमृत्युशब्देनतमःशब्दवाच्यंसूक्ष्मावस्थमचिद्वस्त्वभिधी
यते ॥ अस्यामेवोपनिषदि ॥ अव्यक्तमक्षरेलीयतेअक्षरंतमसिलीयतेइतिवचनात् ॥ अंतः
प्रविष्टोंतःसृजते ॥ अंतःप्रविष्टःशास्ताजनानांसर्वात्माइतिएवंसर्वावस्थावस्थितचिदचिद्व
स्तुशरीरतयातत्प्रकारःपरमपुरुषःकार्यावस्थकारणावस्थजगद्रूपेणावस्थितइतीममर्थं
ज्ञापयितुंकार्त्स्न्येनश्रुतयःकार्यावस्थंकारणावस्थंचजगत्सएवेत्याहुः ॥ सदेवसोम्येदमग्रआ
सीदेकमेवाद्वितीयंतदैक्षतबहुस्यांप्रजायेयेत्यारभ्यसन्मूलाःसोम्येमाःसर्वाःप्रजाःसदायत
छां॰६॰२॰सु॰१ नाःसत्प्रतिष्ठाऐतदात्म्यमिदंसर्वंतत्सत्यंसआत्मातत्त्वमसिश्वेतकेतोइत्यंताः ॥ तथासोकाम
यतबहुस्यांप्रजायेयेतिसतपोतप्यतसतपस्तप्त्वाइदंसर्वमसृजतयदिदंकिंचइत्यारभ्यसत्यं २
आनंदवल्ल्यनुवाके ब्रह्मवल्ली ६ [illegible] चानृतंचसत्यमभवदित्यंतःश्रुत्यंतरसिद्धंचिदचितोःपरमपुरुषस्यचस्वरूपविवेकंस्फुटयितुं
हंताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीत्येवंभूतंपन्ना
छां॰६॰३॰सु॰२ मरूपव्याकरणंतद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यांव्याक्रियतेइत्यत्रचोक्तं ॥ अतःकार्याव
स्थकारणावस्थस्थूलसूक्ष्मचिदचिद्वस्तुशरीरःपरमपुरुषएवेतिकारणात्कार्यस्यानन्यत्वेनका

यदिदंकिंचनतत्सृष्ट्वातदेवानुप्राविशत्तदनुप्रविश्यसच्चत्यच्चाभवत्निरुक्तंचानिरुक्तंचनिलयनंचानिलयनंचविज्ञानंचाविज्ञानंचसत्यंचानृतंचसत्यमभवत्तै॰२

रणविज्ञानेन सर्वविज्ञानं च सम्प्रतिपन्नतरं ॥ हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मना
नुप्रविश्य नामरूपे व्याकरवाणीत्यत्र तिस्रो देवता इति सर्वमचिद्वस्तु निर्दिश्य तत्र स्वात्मकजीवानु
प्रवेशेन नामरूपव्याकरणवचनात्सर्वे शब्दा अचिद्वस्तुविशिष्टजीवविशिष्टपरमात्मवाचका इ
ति कारणावस्थपरमात्मवाचिना सच्छब्देन कार्यवाचिनः शब्दस्य सामानाधिकरण्यं मुख्यवृत्तं ॥ अतः
स्थूलसूक्ष्मचिदचित्प्रकारं ब्रह्मैव कार्यं कारणं चेति ॥ तत्र ब्रह्मोपादानं जगत् जगतो ब्रह्मोपादानत्वे
ऽपि संघातस्योपादानत्वेन चिदचितोर्ब्रह्मणश्च स्वभावासंकरोऽप्युपपन्नतरः ॥ यथा शुक्लकृष्णरक्त
तंतुसंघातोपादानत्वेऽपि विचित्रपटस्य तत्तत्तंतुप्रदेश एव शुक्लादिसंयोग इति कार्यावस्थायामपि का
रणवत्सर्वत्र चासंकरः ॥ तथा चिदचिद्वस्तुसंघातोपादानत्वेऽपि जगतः कार्यावस्थायामपि भोग्यत्व
भोक्तृत्वनियंतृत्वनियम्यत्वाद्यसंकरः ॥ तंतूनां पृथक्स्थितियोग्यानामेव पुरुषेच्छया कदाचित्संगता
नां कारणत्वं कार्यत्वं च ॥ इह तु चिदचितोः सर्वावस्थयोः परमपुरुषशरीरत्वेन तत्प्रकारेणैव पर
मार्थत्वात्तत्प्रकारः परमपुरुष एव कारणं कार्यं च स एव सर्वदा सर्वशब्दवाच्य इति विशेषः
स्वभावभेदः स्वरूपभेदश्च तत्र चात्र च तुल्यः ॥ एवं च सति परस्य ब्रह्मणः कार्यानुप्रवेशेऽपि स्वरूपा १११॥

न्यथाभावादविकृतत्वमुपपन्नं स्थूलावस्थस्य नामरूपविभागविभक्तस्य चिदचिद्वस्तुन आत्मत
यावस्थानात्कार्यत्वमप्युपपन्नं अवस्थांतरापत्तिरेव कार्यता ॥ निर्गुणवादश्च परस्य ब्रह्मणो हेय
गुणसंबंधाभावादुपपद्यते ॥ अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः इति हेयगु
णान् प्रतिषिध्य सत्यकामः सत्यसंकल्पः इति कल्याणगुणान् विदधतीयं श्रुतिरेव सामान्येनावगतं
गुणनिषेधं हेयगुणविषयं व्यवस्थापयति ॥ ज्ञानस्वरूपं ब्रह्मेति वादश्च सर्वज्ञस्य सर्वशक्तेर्निखिलहे
यप्रत्यनीककल्याणगुणाकरस्य परस्य ब्रह्मणः स्वरूपं ज्ञानैकनिरूपणीयं स्वप्रकाशतया ज्ञा
नस्वरूपं चेत्यभ्युपगमादुपपन्नतरः यः सर्वज्ञः सर्ववित् पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञा
नबलक्रिया च विज्ञातारमरे केन विजानीयादित्यादिका ज्ञातृत्वमावेदयंति ॥ सत्यं ज्ञानमनंतमित्या
दिकाश्च ज्ञानैकनिरूपणीयतया ज्ञानैकरूपत्वं ॥ सोऽकामयत बहु स्यां प्रजायेयेति तदैक्षत बहु
स्यां तन्नामरूपाभ्यां व्याक्रियत आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितं भवति सर्वं तं
परादाद्योऽन्यत्रात्मनः सर्वं वेद अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद इत्यादिश्रवणात् ॥ ब्रह्मैव
स्वसंकल्पात् विविधचराचररूपतया नानाप्रकारमवस्थितमिति तत्प्रत्यनीकाब्रह्मात्मकवस्तुना

॥गी॰भा॰ वात्वमतत्वमितितत्वतिषिध्यते॥ मुन्यो: समूलमाप्नोतियइहनानेवपश्यतीतिनेहनानास्तिकिंचनयत्र अ॰१३॥
॥११२॥ हिद्वैतमिवभवतितदितरइतरंपश्यतियत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येदित्यादिनानचैनर्बहु ३
स्यांप्रजायेयेतिश्रुतिसिद्धंस्वसंकल्पकृतंब्रह्मणोनानानामरूपभाक्त्वेननानाप्रकारत्वमपिनिषि
ध्यते॥यत्रत्वस्यसर्वमात्मैवाभूदितिनिषेधवाक्यार्थेनचतत्स्थापितंब्रह्मस्यमहतोभूतस्यनिःश्वसितमे
तद्यदृग्वेदइत्यादिना॥एवंचिदचिदीश्वराणांस्वरूपभेदेस्वभावभेदेचवदंतीनांकार्यकारणयोरन
न्यत्वंवदंतीनांचसर्वासांश्रुतीनामविरोधः श्रुतीभिरेवज्ञायतइतिब्रह्माज्ञानवादस्यनपाधिगत
ब्रह्मभेदस्याप्यन्यस्यान्यायभूतस्यैकलक्ष्यसकलश्रुतिविरुद्धस्यनकथंचिदवकाशोविद्यतइत्यल

॥ तत्क्षेत्रंयच्चयादृक्चयद्विकारियतश्चयत्॥ सचयोयत्प्रभावश्चतत्समासेनमेशृणु॥३॥

मतिविस्तरेण॥२॥ तदिति॥तत्क्षेत्रंयच्चयद्द्रव्यंयादृक्चयेषांआश्रयभूतंयद्विकारियेचास्यविका
राः यतश्चयतोहेतोरिदमुत्पन्नंयस्मैप्रयोजनायोत्पन्नमित्यर्थः॥यत्स्वरूपंसचयः सचक्षेत्र
ज्ञोयः यत्स्वरूपः यत्प्रभावः येचास्यप्रभावाःतत्समासेनसंक्षेपेणमेमत्तःशृणु॥३॥ ॥ ११२॥

॥ऋषिभिरिति॥तदिदंक्षेत्रक्षेत्रज्ञयाथात्म्यमृषिभिःपराशरादिभिःबहुप्रकारंगीतं॥अहंत्वं
चतथान्येचभूतैरुह्यामपार्थिव॥गुणप्रवाहपतितोभूतवर्गोपियात्ययं॥ कर्मवश्यागुणाह्येतेस
त्वाद्याःपृथिवीपते॥अविद्यासंचितंकर्मतच्चाशेषेषुजंतुषु॥ आत्माशुद्धोक्षरःशांतोनिर्गुणःप्रकृ
तेःपरः तथापिंडःपृथगस्यतःपुंसःशिरःपाण्यादिलक्षणः॥ततोहमितिकुत्रैतांसंज्ञांराजन्करो
म्यहं॥तथाच॥किंत्वमेतच्छिरःकिंतुशिरस्तवतथोदरं॥किंतुपादादिकंत्वंवैतवैतत्किंमहीपते॥

॥ऋषिभिर्बहुधागीतंछंदोभिर्विविधैःपृथक्॥ब्रह्मसूत्रपदैश्चैवहेतुमद्भिर्विनिश्चितैः॥४॥

समस्तावयवेभ्यस्त्वंपृथग्भूतव्यवस्थितः॥कोहमित्यत्रनिपुणोभूत्वापार्थिवचिंतयेति॥एवंविवि
क्तयोस्तयोर्महर्षयोवासुदेवात्मकत्वंचाहुः इंद्रियाणिमनोबुद्धिःसत्वंतेजोबलंधृतिः॥वासुदेवा क्षेत्रःकर्म
त्मकान्याहुःक्षेत्रंक्षेत्रज्ञमेवचेति॥छंदोभिर्विविधैःपृथक्विविधैःछंदोभिर्ऋग्यजुःसामाथर्व
भिः देहात्मनोःस्वरूपंपृथक्गीतं॥तत्रयजुर्षितस्माद्वाएतस्मादात्मनआकाशःसंभूतःआ
काशाद्वायुर्वायोरग्निरग्नेरापःअद्भ्यःपृथिवीपृथिव्याओषधयःओषधीभ्योन्नंअन्नात्पु
रुषःसवाएषःपुरुषोन्नरसमयइतिशरीरस्वरूपमभिधायतस्मादंतरंप्राणमयंतस्मादंतरं

ब्र॰२॰पा॰३॰सू॰१९॰ ... श्रुतेः ...

॥गी॰भा ॥११३

मनोमयमभिधाय ॥ तस्माद्वा एतस्मान्मनोमयादन्योंतर आत्मा विज्ञानमय इति क्षेत्रज्ञस्यांतरात्म अ॰१३॥
तया आनंदमयः परमात्माभिहितः ॥ एवमृक्सामाथर्वसु चैतत्क्षेत्रक्षेत्रज्ञयोः पृथग्भावस्तयोर्ब्र
ह्मात्मकत्वं च बहुधा गीतं ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितैः ब्रह्मप्रतिपादनसूत्राख्यैः पदैः
शारीरकसूत्रैर्हेतुयुक्तैर्विनिश्चितैर्निर्णयांतैर्नवियदश्रुतेरित्यारभ्य क्षेत्रप्रकारनिर्णय उक्तः

नात्माश्रुतेर्नित्यत्वाच्च ताभ्य इत्यारभ्य ज्ञोत एवेत्यादिभिः क्षेत्रज्ञयाथात्म्यनिर्णय उक्तः ॥ परात्तु तच्छ्रु

॥ महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ॥ इंद्रियाणि दशैकं च पंच चेंद्रियगोचराः ॥५॥

तेरिति भगवत्प्रवर्त्यत्वेन भगवदात्मकत्वमुक्तं ॥ एवं बहुधा गीतं क्षेत्रक्षेत्रज्ञयाथात्म्यं मया संक्षे
पेण स्पष्टमुच्यमानं शृणु इत्यर्थः ॥४॥ महाभूतानीति ॥ श्लोकेति ॥ महाभूतानि क्षेत्रारंभकद्रव्याणि पृ
थिव्यप्तेजोवाय्वाकाशा महाभूतानि ॥ अहंकारो भूतादिः बुद्धिर्महान् अव्यक्तं प्रकृतिः इंद्रियाणि
दशैकं चेति क्षेत्राश्रितानि तत्त्वानि ॥ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानि पंच ज्ञानेंद्रियाणि ॥ वाक्पा
णिपादपायूपस्थानि पंच कर्मेंद्रियाणि ॥ एकमिति मनः इंद्रियगोचराश्च पंच शब्दस्पर्शरूपरसगं
धाः इच्छा द्वेषः सुखं दुःखमिति क्षेत्रकार्यतया क्षेत्रविकारा उच्यंते ॥ यद्यपीच्छाद्वेषसुखदुःखान्या ११३॥

त्मधर्मभूतानि तथाप्यात्मनः क्षेत्रसंबंधप्रयुक्तानीति क्षेत्रकार्यतया क्षेत्राश्रितानीत्युच्यंते ॥ ते
षां पुरुषधर्मत्वं पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरिति वक्ष्यते ॥ संघातश्चेतना धृतिः आधृतिरा
धारः सुखदुःखे भुंजानस्य भोगापवर्गौ साधयतश्चेतनस्याधारतयोत्पन्नो भूतसंघातः प्रकृत्यादि
पृथिव्यंतद्रव्यारब्धमिंद्रियाश्रयभूतमिच्छाद्वेषसुखदुःखविकारि भूतसंघातरूपं चेतनस्य सुखदुःखो
पभोगाधारत्वप्रयोजनं क्षेत्रमित्युक्तं भवति ॥ एतत्क्षेत्रं समासेन संक्षेपेण सविकारं सकार्यमुदाहृ

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ॥ एतत्क्षेत्रं समासेन सविकारमुदाहृतं ॥६॥ अमानित्व
मदंभित्वमहिंसा क्षांतिरार्जवं ॥ आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥७॥

तिरस्काररहितत्वं

तं ॥५॥६॥ अथ
क्षेत्रकार्येष्वात्मज्ञानसाधनतयोपादेया गुणाः प्रोच्यंते ॥ अमानित्वमिति ॥ अमानित्वमुत्कृष्ट
जनेष्ववधीरणारहितत्वं ॥ अदंभित्वं धार्मिकत्वयशःप्रयोजनतया धर्मानुष्ठानं दंभस्तद्रहितत्वं
अहिंसा वाङ्मनःकायैः परपीडारहितत्वं ॥ क्षांतिः परैः पीड्यमानस्यापि तान्प्रत्यविकृतचित्त
त्वं ॥ आर्जवं परान्प्रति वाङ्मनःकायवृत्तीनामेकरूपता ॥ आचार्योपासनं आत्मज्ञानप्रदायि

परकृत...

माचार्ये प्रणिपातपरिप्रश्नसेवानिरतत्वं शौचं आत्मज्ञानतत्साधनयोर्मलत्वं मनोवाक्कायगतं शास्त्रसिद्धं॥ स्थैर्यमध्यात्मशास्त्रोदितेष्वर्थेषु निश्चलत्वं॥ आत्मविनिग्रहः॥ आत्मस्वरूपव्यतिरिक्तविषयेभ्यो मनसो निवर्तनं॥७॥ इंद्रियार्थे [illegible]ष्विति॥ इंद्रियार्थेषु वैराग्यं आत्मव्यतिरिक्तेषु विषयेषु दोषानुसंधानेनोद्वेजनं अनहंकारः अनात्मनि देहे आत्माभिमानरहितत्वं प्रदर्शनार्थमिदं अना

इंद्रियार्थेषु वैराग्यमनहंकार एव च॥ जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं॥८॥ असक्तिरनभिष्वंगः पुत्रदारगृहादिषु॥ नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥९॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी॥ विविक्तदेशसेवित्वमरतिर्जनसंसदि॥१०॥

त्मीयेष्वात्मीयाभिमानरहितत्वं चापि विवक्षितं जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं शरीरत्वे जन्ममृत्युजराव्याधिदुःखरूपस्य दोषस्यावर्जनीयत्वानुसंधानं॥८॥ असक्तिर[illegible]ति॥ असक्तिः आत्मव्यतिरिक्तविषयेषु संगरहितत्वं अनभिष्वंगः पुत्रदारगृहादिषु शास्त्रीयकर्मोपकरणत्वातिरेकेणाश्लेषरहितत्वं नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु संकल्पप्रभवेष्विष्टानिष्टोपनिपातेषु हर्षोद्वेगरहितत्वं॥९॥ मयीति॥ म ११५॥
यि सर्वेश्वरे च एकांतयोगेन स्थिरा भक्तिः जनवर्जितदेशवासित्वं जनसंसदि चाप्रीतिः॥१०॥

आध्यात्मेति आत्मनिष्ठानमध्यात्मज्ञानं तन्निष्ठत्वं तत्वज्ञानार्थदर्शनं ज्ञानप्रयोजनं यत्तत्त्वं तन्नि आत्मस्वरूपम्
रतत्वमित्यर्थः ज्ञायते नेनात्मेति ज्ञानं आत्मज्ञानसाधनमित्यर्थः क्षेत्रसंबंधिनः पुरुषस्यामा
अनाध्याये-श्री-१ नित्वादिकमुक्तगुणवृंदमेवात्मज्ञानोपयोगि एतद्व्यतिरिक्तं सर्वं क्षेत्रकार्यमात्मज्ञानविरोधीत्यज्ञानं॥११॥ अथैतद्यो वेत्तीति वेदितृत्वलक्षणेनोक्तक्षेत्रज्ञस्य स्वरूपं विशोध्यते ज्ञेय [illegible]मि ति॥ अमानित्वादिभिः साधनैर्ज्ञेयं प्राप्यं प्रत्यगात्मस्वरूपं तत्प्रवक्ष्यामि यज्ज्ञात्वा जन्मम

॥ अध्यात्मज्ञाननित्यत्वं तत्वज्ञानार्थदर्शनं॥ एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥११॥
॥ ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते॥ अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते॥१२॥

रणादिप्राकृतधर्मरहितममृतमात्मानं प्राप्नोति अनादिः आदिर्यस्य न विद्यते तदनादि अस्य हि प्रत्यगात्मन उत्पत्तिर्न विद्यते ततएवांतो न विद्यते अत एव श्रुतिः न जायते म्रियते वा विपश्चिदिति मत्परं अहं परो यस्य तन्मत्परं स्तत्स्वन्यां प्रकृतिं विद्धि मे परां जीवभूतामित्युक्तं भगवच्छरीरतया भगवच्छेषतैकरसं ह्यात्मस्वरूपं तथा च श्रुतिः य आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद य

॥ गी॰भा॰ स्यात्मा शरीरस्य आत्मानमंतरो यमयतीति ॥ तथा स कारणं करणाधिपाधिपो न चास्य कश्चि अ॰१३॥
॥११५ ज्जनिता न चाधिपः प्रधानक्षेत्रज्ञपतिर्गुणेश इत्यादिका ब्रह्म तद्गुणयोगि शरीरादंतरस्थं
तं स्वतः शरीरादिभिः परिच्छेदरहितं क्षेत्रज्ञतत्त्वमित्यर्थः ॥ स चानंत्याय कल्पत इति हि श्रूयते शरी
रपरिच्छिन्नत्वं चास्य कर्मकृतं कर्मबंधान्मुक्तस्यानंत्यं आत्मन्यपि विद्यत एव स प्रयुज्यते ॥ स गुणा
न् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥ ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु
मद्भक्तिं लभते परामिति च ॥ न सत्तन्नासदुच्यते कार्यकारणरूपावस्थाद्वयरहिततया सदसच्छ
वां ब्दाभ्यामात्मस्वरूपं नोच्यते ॥ कार्यावस्थं हि देवादिनामरूपविभाक्त्वेन सदित्युच्यते ॥ तथा च श्रु
तिः ॥ असद्वा इदमग्र आसीत् ततो वै सदजायत ॥ तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रि
यतेत्यादिका ॥ कार्यकारणावस्था च यस्यात्मनः कर्मरूपाविद्यावेष्टनकृता न स्वरूपकृतेति सद
सच्छब्दाभ्यामात्मस्वरूपं नोच्यते ॥ यद्यप्यसद्वा इदमग्र आसीदिति कारणावस्थं परं ब्रह्मोच्यते
तथापि नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरं परं ब्रह्म कारणावस्थमिति कारणावस्था
यां क्षेत्रक्षेत्रज्ञस्वरूपमपि असच्छब्दवाच्यं क्षेत्रज्ञस्य सावस्था कर्मकृतेति परिशुद्धस्वरूपं न ११५॥
सदसच्छब्दनिर्देश्यं ॥१२॥

सर्वतः पाणिपादं तत्परिशुद्धात्मस्वरूपं सर्वतः पाणिपादकार्यशक्तं तथा सर्वतोक्षिशिरोमुखं सर्वतः श्रुतिमत् ॥

सर्वत इति ॥ सर्वतः श्रुतिमदित्यंतं व्याचष्टे ॥ सर्वतश्चक्षुरादिकार्यकृत् अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्ण इति हि परस्य ब्रह्मणः पाणिपादस्यापि सर्वतः पाणिपा
दिकार्यकृत्त्वं श्रूयते ॥ प्रत्यगात्मनोपि परिशुद्धस्य तत्साम्यापत्त्या सर्वतः पाणिपादादिकार्यकृत्त्वं श्रु
तिसिद्धमेव ॥ तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैतीति हि श्रूयते ॥ इदं ज्ञानमुपा
श्रित्य मम साधर्म्यमागता इति च वक्ष्यते लोके सर्वमावृत्य तिष्ठतीति लोके यद्वस्तुजातं तत्सर्वं व्या

सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखं ॥ सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३॥ सर्वेंद्रियगु
णाभासं सर्वेंद्रियविवर्जितं असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥१४॥

प्य तिष्ठति परिशुद्धस्वरूपं
देशादिपरिच्छेदरहिततया सर्वगतमित्यर्थः ॥१३॥ सर्वे [illegible] ति ॥ सर्वेंद्रियगुणैराभा
सो यस्य तत्सर्वेंद्रियगुणाभासं इंद्रियगुणा इंद्रियवृत्तयः इंद्रियवृत्तिभिरपि विषयान् ज्ञातुं समर्थमि
त्यर्थः ॥ स्वभावतः सर्वेंद्रियविवर्जितं विनेंद्रियवृत्तिभिः सर्वं जानातीत्यर्थः ॥ असक्तं स्वभावादेव
देवादिसंगरहितं सर्वभृच्चैव देवादिदेहभरणसमर्थं च स एकधा भवति त्रिधा भवतीति पंचधा सप्तधा गी॰भा॰अ॰१३

 नवधेत्यादिष्क्तते॥ निर्गुणंतथाल्वभावतःसत्वादिगुणरहितंगुणभोक्तृचसत्वादीनांगुणानांभो 
 गसमर्थंच॥१४॥ बहिरंतश्चेति॥ पृथिव्यादिभूतानिपरित्यज्याशरीरोबहिर्वर्त्तते तेषामंतश्चवर्त्त
तेजक्षनक्रीडन्नरममाणःस्त्रीभिर्वायानैर्वेत्यादिश्रुतिसिद्धंस्वछंदवृत्तिषु अचरंचरमेवचस्व
भावतोचरंचरंदेहित्वेसूक्ष्मत्वात्तदविज्ञेयं॥ एवंसर्वज्ञाक्तियुक्तंसर्वज्ञंतदात्मतत्वं अस्मिन्देहेवर्त
र्त्तमानमपिजानातिसूक्ष्मत्वाद्देहान्पृथक्त्वेनसंसारीभिर्नविज्ञेयंदूरस्थंचांतिकेचतत्पृथिव्यादिभू

बहिरंतश्चभूतानामचरंचरमेवच॥ सूक्ष्मत्वात्तदविज्ञेयंदूरस्थंचांतिकेचतत्॥१५॥ अविभक्तं
चभूतेषुविभक्तमिवचस्थितं॥ भूतभर्तृचतज्ज्ञेयंग्रसिष्णुप्रभविष्णुच॥१६॥ तानिपरित्यज्याशरीरो

बहिर्वर्त्तते॥ तेषामंतश्चवर्त्तते अमानित्वाद्युक्तगुणरहितानांपुंसांस्वदेहेवर्त्तमानमप्यतिदूरस्थं
तथामानित्वादिगुणोपेतानांतद्देवांतिकेचवर्त्तते॥१५॥ अविभक्तमिति॥ देवमनुष्यादिभूतेषुस
र्वत्रस्थितमात्मवस्तुवेदितृत्वेकाकारतया अविभक्तं अविकृपांदेवाद्याकारेणायंदेवोमनुष्य
इतिविभक्तमिवचस्थितं॥ देवोहंमनुष्योहमितिदेहसामानाधिकरण्येनानुसंधीयमानमपिवे 

दितृत्वेनदेहादर्थांतरभूतंज्ञातृत्वाकारमित्यादावुक्तमेतद्योवेत्तीतिइदानींप्रकारांतरेणदेहाद
र्थांतरत्वेनज्ञातृत्वाकारमित्याह॥ भूतभर्तृचेति॥ भूतानांदेहरूपेणसंहतानांयद्भर्तृतज्ज्ञेयंतेभ्योभू
तेभ्योऽर्थांतरंज्ञेयंअर्थांतरमितिज्ञातृत्वाकारमित्यर्थः॥ तथाग्रसिष्णुअन्नादीनांभौतिकानांग्रसिष्णु
ग्रस्यमानेभ्योभूतेभ्योर्थांतरभूतमितिज्ञातृत्वाकारमित्यर्थः॥ प्रभविष्णुचप्रभवहेतुश्चग्रस्तानामन्ना
दीनामाकारांतरेणपरिणतानांप्रभवहेतुस्तेभ्योर्थांतरमितिज्ञातृत्वाकारमित्यर्थः भूतशरीरेग्रस

ज्योतिषामपितज्ज्योतिस्तमसःपरमुच्यते॥ ज्ञानंज्ञेयंज्ञानगम्यंहृदिसर्वस्यविष्ठितं॥१७॥

नप्रभवादीनामदर्शनात्भूतसंघातरूपंक्षेत्रंनग्रसनप्रभवभरणहेतुरितिनिश्चीयते॥१६॥ ज्योति
षामिति॥ ज्योतिषांदीपादित्यमणिप्रभृतीनामपितदेवज्योतिःप्रकाशकंदीपादित्यादीनपिज्ञाप
ल्पप्रभारूपंज्ञानमेवप्रकाशयतिदीपादयस्तुविषयेंद्रियसंनिकर्षविरोधिसंतमसनिरसनमात्रं
कुर्वतेतावन्मात्रेणैवतेषांप्रकाशकत्वंतमसःपरमुच्यतेतमःशब्दःसूक्ष्मावस्थप्रकृतिवचनःप्र
कृतेःपरमुच्यतइत्यर्थः॥ अतोज्ञानंज्ञेयंज्ञानैकाकारमितिज्ञेयंज्ञानगम्यंअमानित्वादिभिरुक्तैः

॥ गी॰भा॰ ॥ ज्ञानसाधनैः प्राप्यमित्यर्थः ॥ हृदि सर्वस्य धिष्ठितं ॥ सर्वस्य मनुष्यादेर्हृदि विशेषेणावस्थितं संनिहि अ॰ १३ ॥
॥ ११७ ॥ तं ॥ १७ ॥ इतीति ॥ एवं महाभूतान्यहंकार इत्यादिना संघातश्चेतना धृतिरित्यंतेन क्षेत्रतत्त्वं समासे
नोक्तं ॥ अमानित्वमित्यादिना तत्त्वज्ञानार्थदर्शनमित्यंतेन ज्ञातव्यस्यात्मतत्त्वस्य ज्ञानसाधनमु
क्तं ॥ अनादिमत्परमित्यादिना हृदि सर्वस्य धिष्ठितमित्यंतेन ज्ञेयस्य क्षेत्रज्ञस्य याथात्म्यं च संक्षेपे
णोक्तं ॥ मद्भक्त एतत् क्षेत्रयाथात्म्यं क्षेत्राद्विविक्तात्मस्वरूपप्राप्त्युपाययाथात्म्यं क्षेत्राद्विविक्ता
इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः ॥ मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥ १८ ॥ प्रकृतिं पु
रुषं चैव विद्ध्यनादी उभावपि ॥ विकारांश्च गुणांश्चैव विद्धि प्रकृतिसंभवान् ॥ १९ ॥ त्मस्वरूपया
थात्म्यं च विज्ञाय मद्भावायोपपद्यते मम यो भावः स्वभावः असंसारित्वं तत्प्राप्तये उपपन्नो भ
वतीत्यर्थः ॥ १८ ॥ अथात्यंतविभक्तस्वभावयोः प्रकृत्यात्मनोः संसर्गस्यानादित्वं संसृष्टयोर्द्वयोः
कार्यभेदः संसर्गहेतुश्चोच्यते ॥ प्रकृतिमिति ॥ प्रकृतिपुरुषावुभावन्योन्यसंसृष्टावनादी विद्धि
बंधहेतुभूतान् विकारानिच्छाद्वेषादीन् अमानित्वादिकांश्च गुणान् मोक्षहेतुभूतान् प्रकृति ११७ ॥

संभवान् विद्धि ॥ पुरुषेण संसृष्टेयमनादिकालप्रवृत्ता क्षेत्राकारपरिणता प्रकृतिः स्वविकारैः
इच्छाद्वेषादिभिः पुरुषस्य बंधहेतुर्भवति सैवामानित्वादिभिः स्वविकारैः पुरुषस्यापवर्गहेतु
र्भवतीत्यर्थः ॥ १९ ॥ संसृष्टयोः प्रकृतिपुरुषयोः कार्यभेदमाह ॥ कार्येति ॥ कार्यं शरीरं कारणा
नि समनस्कानींद्रियाणि तेषां क्रियाकारित्वे पुरुषाधिष्ठिता प्रकृतिरेव हेतुः पुरुषाधिष्ठितक्षे
त्राकारपरिणता प्रकृत्याश्रयभोगसाधनभूताः कृता इत्यर्थः ॥ पुरुषस्य त्वधिष्ठातृत्वमेव तदपे
कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ॥ पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ २० ॥
क्षयादि कर्ता शास्त्रार्थवत्त्वादित्यादिकमुक्तं शरीराधिष्ठानप्रयत्नहेतुत्वमेव हि पुरुषस्य क
॥२०॥ र्तृत्वं प्रकृतिसंसृष्टः पुरुषः सुखदुःखानां भोक्तृत्वे हेतुः सुखदुःखानुभवाश्रय इत्यर्थः ॥ एवमन्यो
न्यसंसृष्टयोः प्रकृतिपुरुषयोः कार्यभेद उक्तः पुरुषस्य स्वतः स्वानुभवैकसुखस्यापि वैषयिक
सुखदुःखोपभोक्तृत्वे हेतुमाह ॥ पुरुष इति ॥ गुणशब्दः स्वकार्येष्वौपचारिकः स्वतः स्वानु
भवैकसुखः पुरुषः प्रकृतिस्थः प्रकृतिसंसृष्टः प्रकृतिजान् गुणान् प्रकृतिसंसर्गोपाधिकान्

अ॰२॰पा॰३॰सू॰३९॰ आमित्वकर्तानगुणः कस्मात् शास्त्रार्थवत्वात् शास्त्राणि यजेत स्वर्गकामो मुमुक्षुर्ब्रह्मोपासीतेत्येवमादीनि ०५

सत्वादिगुणकार्यभूतान्सुखदुःखादीन्भुंक्तेऽनुभवति ॥ प्रकृतिसंसर्गहेतुमाह ॥ कारणमिति
पूर्वपूर्वप्रकृतिपरिणामरूपदेवमनुष्यादियोनिविशेषेषु स्थितोयंपुरुषः तद्योनिप्रयुक्तसत्वादिगु
णमयेषु सुखादिषु सक्तस्तत्साधनहेतुभूतेषु पुण्यपापकर्मसु प्रवर्त्तते ॥ ततस्तत्पुण्यपापफलानु
भवाय सदसद्योनिषु साध्वसाधुयोनिषु जायते ॥ ततश्च कर्मारभते ततश्च जायते ॥ यावदमानि
त्वादिकानात्मज्ञानसाधनभूतान्गुणान्न सेवते तावदेव संसरतीति तदिदमुक्तं कारणं गुणसं

पुरुषः प्रकृतिस्थो हि भुंक्ते प्रकृतिजान्गुणान् ॥ कारणं गुणसंगोस्य सदसद्योनिजन्मसु ॥२१॥
उपद्रष्टानुमंता च भर्त्ता भोक्ता महेश्वरः ॥ परमात्मेति चाप्युक्तो देहेस्मिन्पुरुषः परः ॥२२॥

गोस्य सदसद्योनिजन्मस्विति ॥२१॥ उपद्रष्टेति ॥ अस्मिन्देहे वस्थितोयंपुरुषो देहप्रवृत्त्यनुगुण
संकल्पादिरूपेण देहस्योपद्रष्टा भवति ॥ तथानुमंता च भवति तथा देहस्य भर्त्ता च भवति तथा देह
प्रवृत्तिजनितसुखदुःखानां भोक्ता च भवति ॥ एवं देहनियमनेन देहभरणेन देहस्य गोपित्वेन च देहें
द्रियमनांसि प्रति महेश्वरो भवति ॥ तथा च वक्ष्यते ॥ शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः ॥ गृही ११८॥

ह्वैतानि संयाति वायुर्गंधानिवाशयादिति ॥ अस्मिन्देहे देहेंद्रियमनांसि प्रति परमात्मेति चाप्युक्तः
देहे मनसि चात्मशब्दोनंतरमेव प्रयुज्यते ॥ ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मनेति ॥ अपिशब्दा
न्महेश्वर इति चोक्त इति गम्यते ॥ पुरुषः परः ॥ अनादिमत्परमित्यादिनोक्तापरिच्छिन्नज्ञानशक्तिरयं पु
रुषोनादिप्रकृतिसंबंधकृतगुणसंगादेव देहमात्रमहेश्वरो देहमात्रपरमात्मा च भवति ॥२२॥ य एव

॥ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ॥
॥ सर्वथा वर्त्तमानोपि न स भूयोभिजायते २३ ॥

मिति ॥ एवमुक्तस्वभावं पुरुषमुक्तस्वभावां च प्रकृतिं वक्ष्यमाणस्वभावयुक्तैः सत्वादिभिर्गुणैः सह
यो वेत्ति यथावद्विवेकेन जानाति स सर्वथा देवमनुष्यादिदेहेऽतिमात्रक्लिष्टप्रकारेण वर्त्तमानोपि भू
यो न जायते प्रकृत्या न संबध्नाति ॥ अपरिच्छिन्नलक्षणमपहतपाप्मानमात्मानं तद्देहावसानसमये
प्राप्नोतीत्यर्थः ॥२३॥

ध्यानेनेति ॥ केचिन्निष्पन्नयोगा आत्मनि शरीरे अवस्थितमात्मानं आत्मना मनसा ध्यानेन भक्तियो
गेन पश्यंति अन्ये चानिष्पन्नयोगाः सांख्येन योगेन ज्ञानयोगेन योगयोग्यं मनः कृत्वात्मानं पश्यंति
अपरे योगादिषु आत्मावलोकनसाधनेष्वनधिकृता ये ज्ञानयोगानधिकारिणः सुकरोपायसक्ता
व्यपदेश्याश्च ते कर्मयोगेन अंतर्गतज्ञानेन मनसो योगयोग्यतामुत्पाद्यात्मानं पश्यंति ॥२४॥ अन्ये

॥ध्यानेनात्मनि पश्यंति केचिदात्मानमात्मना ॥ अन्ये सांख्येन योगेन कर्मयोगेन चापरे ॥२४॥
॥अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते ॥ तेपि चातितरंत्येव मृत्युं श्रुतिपरायणाः ॥२५॥

त्विति ॥ अन्ये तु कर्मयोगादिष्वात्मावलोकनसाधनेष्वनधिकृता अन्येभ्यस्तत्त्वदर्शिभ्यो ज्ञानिभ्यः श्रु
त्वा कर्मयोगादिनि रात्मानमुपासते तेप्यात्मदर्शनेन मृत्युमतितरंति ॥ ये श्रुतिपरायणाः श्रवणमा
त्रनिष्ठाः तेच ॥ श्रवणनिष्ठा पूतपापाः क्रमेण कर्मयोगादिकमारभ्यातितरंत्येव मृत्युं अपिशब्दाच्च
पूर्वभेदोऽवगम्यते ॥२५



अथ प्रकृतिसंसृष्टस्यात्मनो विवेकानुसंधानप्रकारं वक्तुं स्थावरं जंगमं च सत्त्वं चिदचित्संसर्गजमित्या
ह ॥ यावदिति ॥ यावत् स्थावरजंगमात्मना सत्त्वं सं जायते तत् क्षेत्रक्षेत्रज्ञयोरितरेतरसंयोगादेव जाय
ते संयुक्तमेव जायते ॥ नत्वितरेतरवियुक्तमित्यर्थः ॥२६॥ सममिति ॥ एवमितरेतरेण युक्तेषु सर्वेषु भू
तेषु देवादिविषमाकाराद्वियुक्ततया तत्र तत्र देहमनोऽधिपतिपरमेश्वरत्वेन स्थिरमात्मानं ज्ञातृत्वेन समा
नाकारं तेषु देहादिषु विनश्यत्सु विनाशानर्हस्वभावेनाविनश्यंतं यः पश्यति स एव पश्यति ॥ स आत्मानं

यावत्संजायते किंचित्सत्त्वं स्थावरजंगमं ॥ क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥२६॥ समं सर्वेषु भूतेषु तिष्ठं
तं परमेश्वरं ॥ विनश्यत्स्वविनश्यंतं यः पश्यति स पश्यति ॥२७॥
यथावस्थितं पश्यति यस्तु विषमाकारेण देहा
दिनात्मानमपि विषमाकारं जन्मविनाशादियुक्तं च पश्यति ॥ स नित्यमेव संसारीत्यभिप्रायः ॥२७॥ समामि
ति ॥ सर्वत्र देवादिशरीरेषु तच्छेषित्वेनाधारतया नियंतृतया अवस्थितमीश्वरमात्मानं देवादिविषमाका
रादिवियुक्तं ज्ञानैकाकारतया समं पश्यन्नात्मना मनसा स्वमात्मानं न हिनस्ति रक्षति संसारान्मोचयति
ततस्तस्मात् ज्ञातृतया सर्वत्र समानाकारदर्शनात् परां गतिं यातिगम्यतद्गतिर्गतिः परं यं तत्त्वं यथावस्थि

॥गी॰भा॰टी॰ तमात्मानं प्राप्नोति देवाद्याकारादिषु कृतया सर्वत्र विषममात्मानं पश्यन्नात्मानं हिनस्ति भवजलधिम अ॰१३॥
॥१२०॥ ध्ये प्रक्षिपति ॥२८॥ प्रकृत्यैवेति ॥ सर्वाणि कर्माणि कार्यकारणकर्तृत्वे हेतुः प्रकृतिरित्यत्र निपूर्वोक्तरी
त्या प्रकृत्या क्रियमाणानि यः पश्यति तथात्मानमकर्तारं ज्ञानाकारं च पश्यति तस्य प्रकृति संयोगः त
दधिष्ठानं तज्ज्ञानं सुखदुःखानुभवश्च कर्मरूपात् ज्ञानकृतमिति च यः पश्यति स एवात्मानं यथावद
वस्थितं पश्यति ॥२९॥

॥ समं पश्यन्हि सर्वत्र समवस्थितमीश्वरं ॥ न हिनस्त्यात्मनात्मानं ततो याति परां गतिं ॥२८॥
॥ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ॥ यः पश्यति तथात्मानमकर्तारं स पश्यति ॥२९॥
॥ यदा भूतपृथग्भावमेकस्थमनुपश्यति ॥ तत एव च विस्तारं ब्रह्म संपद्यते तदा ॥३०॥

यदेति ॥ प्रकृतिपुरुषतत्त्वात्मकेषु देवादिषु सर्वेषु भूतेषु समस्तेषां देवत्वमनुष्यत्वह्रस्वत्वदीर्घत्वादिपृथ
ग्भावमेकस्थं प्रकृतिस्थं प्रकृतिस्थं यदा पश्यति नात्मस्थं ॥ तत एव प्रकृतित एव च तरोनरपुत्रपौत्रादि
कभेदविस्तारं च यदा पश्यति तदैव ब्रह्म संपद्यते ॥ अनवच्छिन्नज्ञानैकाकारमात्मानं प्राप्नोतीत्यर्थः १२०॥
३०॥

अनादीति ॥ अयं परमात्मा देहादिस्वभावेन निरूपितः शरीरस्थोऽपि अनादित्वादनारभ्यत्वा
दव्ययः निर्गुणत्वात् सत्त्वादिगुणरहितत्वान्न करोति न लिप्यते देहस्वभावैर्न लिप्यते न बध्यते ॥३१॥
यद्यपि निर्गुणत्वान्न करोति तथापि नित्यसंयुक्तैर्देहस्वभावैः कथं न लिप्यते इत्यत्राह ॥ यथाकाशं
सर्वगतमपि सर्वैर्वस्तुभिः संयुक्तमपि सौक्ष्म्यात् सर्ववस्तुस्वभावैर्न लिप्यते तथात्मापि सौक्ष्म्यात् सर्व

॥ अनादित्वान्निर्गुणत्वात्परमात्मायमव्ययः ॥ शरीरस्थोऽपि कौंतेय न करोति न लिप्यते ॥३१॥
॥ यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते ॥ सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥३२॥
॥ यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः ॥ क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत ॥३३॥

त्रदेवमनुष्यादौ देहेऽवस्थितोऽपि तत्तद्देहस्वभावैर्न लिप्यते ॥३२॥ यथेति ॥ यथैक एवादित्यः स्वया
प्रभया कृत्स्नमिमं लोकं प्रकाशयति ॥ तथा क्षेत्रमपि क्षेत्री ममेदं क्षेत्रमीदृशमिति व्यवहारं तत्प्र
पादनसमस्तकं स्वकीयेन ज्ञानेन प्रकाशयति ॥ प्रकाश्यात् लोकात् प्रकाशकोऽर्कादिरिव देहेन्द्रियत्वेन वै
लक्षण्यात् तस्मात् क्षेत्रात्यंतविलक्षणोऽयमुक्तलक्षण आत्मेत्यर्थः ॥३३॥ ॥

भूतानां स्वकर्मगतां प्रकृतेर्मोक्षं ये विदुः॥

॥ गी॰ भा॰ ॥ ॥क्षेत्रेति॥ एवमुक्तेन प्रकारेण क्षेत्रक्षेत्रज्ञयोरंतरं विशेषं विवेकविषयज्ञानाख्येन चक्षुषा ये विदुः अ॰ १४ ॥
॥ १२१ ॥ भूतप्रकृत्यो मोक्षं च ते परं यांति निर्मुक्तबंधनमात्मानं प्राप्नुवंति ॥ एवमुक्तेन प्रकारेण मोक्षमुक्तेनेने
तिमोक्षः ॥ अमानित्वादिकमुक्तं मोक्षसाधनमित्यर्थः ॥ क्षेत्रक्षेत्रज्ञयोर्विवे विषये एतेनोक्तेन ज्ञाने
न तयोर्विवेकं विदित्वा भूतप्रकृतिमोक्षोपायममानित्वादिकं चावगम्य ये आचरंति ते निर्मुक्तबंधाः
स्वेन रूपेणावस्थितमवच्छिन्नज्ञानलक्षणमात्मानं प्राप्नुवंतीत्यर्थः ॥ ३४ ॥ इति श्रीमद्रामानुजाचार्यवि

॥ क्षेत्रक्षेत्रज्ञयोरेवमंतरं ज्ञानचक्षुषा ॥ भूतप्रकृतिमोक्षं च ये विदुर्यांति ते परं ॥ ३४
॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवा
॥ दे क्षेत्रक्षेत्रज्ञविभागयोगो नाम त्रयोदशोऽध्यायः ॥ १३ ॥

रचिते गीताभाष्ये त्रयोदशोऽध्यायः ॥ १३ ॥ त्रयोदशे प्रकृतिपुरुषयोरन्योन्यसंसृष्टयोः स्वरूपया
थात्म्यं विज्ञायामानित्वादिभिर्भगवद्भक्त्यनुगृहीतैर्बंधान्मुच्यते इत्युक्तं तत्र बंधहेतुः पूर्वपूर्वस
त्वादिगुणमयसुखादिसंग इति चाभिहितं कारणं गुणसंगोऽस्य सदसद्योनिजन्मस्विति ॥ अथे १२१ ॥

दानीं गुणानां बंधहेतुताप्रकारो गुणनिवर्तनप्रकारश्चोच्यते ॥ श्रीभगवानुवाच ॥ परं भूय इति ॥ प
रं पूर्वोक्तादन्यत् प्रकृतिपुरुषांतर्गतमेव सत्वादिगुणविषयं ज्ञानं भूयः प्रवक्ष्यामि ॥ तच्च ज्ञानं सर्वे
षां प्रकृतिपुरुषविषयज्ञानानामुत्तमं यज्ज्ञानं ज्ञात्वा सर्वे मुनयः तन्मननशीला इतः संसारात् प
रां सिद्धिं गताः परां शुद्धात्मस्वरूपप्राप्तिरूपां सिद्धिं गताः ॥ १ ॥ पुनरपि तज्ज्ञानं फलेन विशिनष्टि ॥

॥ श्रीभगवानुवाच ॥ ॥ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं ॥ यज्ज्ञात्वा मुनयः ॥
॥ सर्वे परां सिद्धिमितो गताः ॥ १ ॥ इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ॥ सर्गेऽपि ॥
॥ नोपजायंते प्रलये न व्यथंति च ॥ २ ॥ श्रीवरतालयधामवासीलक्ष्मीनारायणनमः ॥

इदमिति इदं वक्ष्यमाणं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः मत्साम्यं प्राप्ताः सर्गेऽपि नोपजायंते न सृष्टि
कर्मतां भजंते प्रलये न व्यथंति च न मृतिकर्मतां भजंते ॥ २ ॥ अथ प्राकृतानां गुणानां बंधहेतुताप्र
कारं वक्तुं सर्वभूतजातस्य प्रकृतिसंसर्गजत्वं याथात्म्यं जायते किंचिदित्यनेनोक्तं भगवतास्वेनैव

कृतमित्याह ममेति मम इदं मदीयं कृत्स्नस्य जगतो योनिभूतं महत् ब्रह्म यत् तस्मिन् गर्भं दधाम्यहं ॥ भू
मिरापोनलो वायुः खं मनो बुद्धिरेव च ॥ अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा अपरेयमिति निर्दि
ष्टा चेतना प्रकृतिर्महदहंकाराणां कारणतया महद्ब्रह्मेत्युच्यते ॥ एतावता पि कश्चित् प्रकृतिर्ब्रह्मेति निनि
र्दिश्यते यः सर्वज्ञः सर्ववित् यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नामरूपमन्नं च जायत इति ॥ इतस्त्वन्यां

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहं ॥ संभवः ॥
सर्वभूतानां ततो भवति भारत ॥ ३ ॥ ॥

प्रकृतिं विद्धि मे परां जीवभूतामिति चेतनपुंजरूपा या प्रकृतिर्निर्दिष्टा सेह सकलप्राणिबीजतया गर्भ
शब्देनोच्यते तस्मिन्नचेतने योनिभूते महति ब्रह्मणि चेतनपुंजरूपं गर्भं दधामि ॥ अचेतनप्रकृत्या भो
ग्यक्षेत्रभूतया भोक्तृवर्गपुंजभूतां चेतनप्रकृतिं संयोजयामीत्यर्थः ॥ ततस्तस्मात् प्रकृतिद्वयसंयोगा
न्मत्कृतात् सर्वभूतानां ब्रह्मादिस्तंबपर्यंतानां संभवो भवति ॥ ३ ॥ कार्यावस्थोपि चिदचित्प्रकृतिसंसर्गो मयैव
कृत इत्याह ॥ १२२ ॥

सर्वेति ॥ सर्वासु देवगंधर्वयक्षराक्षसमनुष्यपशुमृगपक्षिसरीसृपादिषु योनिषु तत्तन्मूर्तयो याः सं
भवंति जायंते तेनासां ब्रह्म महद्योनिः कारणं मया संयोजितचेतनवर्गा महदादिविशेषांता प्रकृतिः का
रणमित्यर्थः ॥ अहं बीजप्रदः पिता तत्र तत्र च तत्तत्कर्मानुगुण्येन चेतनवर्गस्य संयोजकश्चाहमित्यर्थः
४ ॥ एवं सर्गादौ प्रा[illegible]चीनकर्मवशात् अचित्संसर्गेण देवादियोनिषु पुनः पुनः देवादिभावेन ज
न्महेतुमाह ॥ सत्त्वमिति सत्त्वरजस्तमांसि त्रयो गुणाः प्रकृतेः स्वरूपानुबंधिनः स्वभावविशेषाः प्र

॥ सर्वयोनिषु कौंतेय मूर्तयः संभवंति याः ॥ तासां ब्रह्म महद्योनि ॥
॥ रहं बीजप्रदः पिता ॥ ४ ॥ सत्त्वं रजस्तम इति गुणाः प्रकृतिसंभ ॥
॥ वाः निबध्नंति महाबाहो देहे देहिनमव्ययं ॥ ५ ॥ प्रकाशादिकार्यैकनिरूपणीयाः प्रकृ
त्यवस्थायामनुद्भूताः तद्विकारेषु महदादिषूद्भूताः ॥ महदादिविशेषांतैरारब्धदेवमनुष्यादिदेहसं
बंधिनं देहिनं अव्ययं स्वतो गुणसंबंधानर्हं देहे वर्तमानं निबध्नंति देहवर्तमानत्वोपाधिना निब
ध्नंतीत्यर्थः ॥ ५ ॥ सत्त्वरजस्तमसामाकारं बंधनप्रकारं चाह ॥

तत्रेति तत्र सत्वरजस्तमस्सु सत्वस्य स्वरूपमीदृशं निर्मलत्वात्प्रकाशकं सुखावरणस्वभावर(
हितत्वं निर्मलत्वं प्रकाशसुखजननैकांतस्वभावतया प्रकाशसुखहेतुभूतमित्यर्थः॥ प्रकाशो वस्तु
याथात्म्यावबोधः॥ अनामयं आमयाख्यं कार्यं न विद्यत इत्यनामयं अरोगतादिहेतुरित्यर्थः॥ एवं स
त्वाख्यो गुणो देहिनमेनं सुखसंगेन ज्ञानसंगेन च बध्नाति॥ पुरुषस्य सुखसंगं ज्ञानसंगं च जनय

॥ तत्र सत्वं निर्मलत्वात्प्रकाशकमनामयं॥
॥ सुखसंगेन बध्नाति ज्ञानसंगेन चानघ॥६॥

तीत्यर्थः॥ ज्ञानसुखयोः संगे ज्ञाने तत्साधनेषु लौकिकवैदिकेषु प्रवर्तते ततस्तत्फलानुभवसा
धनभूतासु योनिषु जायत इति सत्वं सुखज्ञानसंगद्वारेण पुरुषं बध्नाति ज्ञानसुखजननं पुनर
पितयोः संगजननं च सत्वमित्युक्तं भवति॥६॥ ॥



रज इति॥ रजो रागात्मकं रागहेतुभूतं रागो योषित्पुरुषयोरन्योन्यस्पृहा॥ तृष्णासंगसमुद्भवं तृष्णासं
गयोरुद्भवस्थानं तृष्णासंगहेतुमित्यर्थः॥ तृष्णा शब्दादिसर्वविषयस्पृहा संगः पुत्रमित्रादिसंश्लेष(
स्पृहा॥ तथा देहिनं कर्मसु क्रियासु स्पृहाजननद्वारेण निबध्नाति क्रियासु स्पृहया क्रियामारभते दे
ही ताश्च पुण्यपापरूपा इति तत्फलानुभवसाधनभूतासु योनिषु जन्महेतुर्भवतीत्यतः कर्मसंग(
द्वारेण रजो देहिनं निबध्नाति न केवलं रजो रागतृष्णासंगहेतुः कर्मसंगहेतुश्चेत्युक्तं भवति॥७॥ तम इति

रजो रागात्मकं विद्धि तृष्णासंगसमुद्भवं॥ तन्निबध्नाति कौंतेय कर्मसंगेन देहिनं॥७॥ तमस्त्वज्ञानजं
विद्धि मोहनं सर्वदेहिनां॥ प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत॥८॥

ज्ञानादन्यदित्याह ज्ञानमभिवे
तं ज्ञानं वस्तुयाथात्म्यावबोधः तस्मादन्यत्तद्विपर्ययज्ञानं तमस्तु वस्तुयाथात्म्यविपरीतविषयज्ञान
जं मोहनं सर्वदेहिनां मोहो विपर्ययज्ञानं विपर्ययज्ञानहेतुरित्यर्थः॥ तत्तमः प्रमादालस्यनिद्राहेतुत(
या तद्द्वारेण देहिनं निबध्नाति॥ प्रमादः कर्तव्यात्कर्मणोऽन्यत्र प्रवृत्तिहेतुभूतमनवधानं आलस्यं क
र्मस्वनारंभस्वभावः स्तब्धतेति यावत् पुरुषस्येंद्रियप्रवर्तनश्रांत्या सर्वेंद्रियप्रवर्तनोपरतिर्निद्रा तत्र बा

॥गी·ना· ॥१२४॥

इंद्रियप्रवर्त्तनोपरमः स्वप्नः॥ मनसोप्युपरमः सुषुप्तिः॥ ८॥ सत्वादीनां बंधद्वारभूतेषु प्रधानान्याह अ·१४॥
सत्वमिति॥ सत्वं सुखसंगप्रधानं॥ रजः कर्मसंगप्रधानं तमस्तु वस्तुयाथात्म्यज्ञानमावृत्य विपरी
तज्ञानहेतुतया कर्त्तव्यविपरीतप्रवृत्तिसंगप्रधानं॥ देहाकारपरिणततायाः प्रकृतेः स्वरूपानुबंधिनः
सत्वादयो गुणाः॥ ९॥ नेत्यस्वरूपानुबंधित्वेन सर्वदा सर्वे वर्त्तंत इति परस्परविरुद्धं कार्यं कथं जनयंती
त्याह॥ रजइति यद्यपि सत्वादयस्त्रयः प्रकृतिसंसृष्टात्मस्वरूपानुबंधिनः तथापि प्राचीनकर्मव

सत्वं सुखे संजयति रजः कर्मणि भारत॥ ज्ञानमावृत्य तु तमः प्रमादे संजयत्युत॥ ९॥ रजस्तमश्चाभिभू
य सत्वं भवति भारत रजः सत्वं तमश्चैव तमः सत्वं रजस्तथा॥ १०॥ सर्वद्वारेषु देहेस्मिन्प्रकाश उ
पजायते॥ ज्ञानं यदा तदा विद्याद्विवृद्धं सत्वमित्युत॥ ११॥ ज्ञातृदेहाद्याप्यायनभूताहारवैषम्याच्च सत्वादयः
परस्परमुद्भवाभिभवरूपेण वर्त्तंते। रजस्तमसी कदाचिदभिभूय सत्वमुद्रिक्तं वर्त्तते। तथा तमः सत्वे ऽभि
भूय रजः कदाचित् रजः सत्वे ऽभिभूय तमः॥ १०॥ तच्च कार्योपलंभावगच्छेदित्याह॥ सर्वेति सर्वे ऽभिभूय क्वचित्
षु चक्षुरादिषु ज्ञानद्वारेषु यदा वस्तुयाथात्म्यप्रकाशो ज्ञानमुपजायते॥ तदास्मिन्देहे सत्वं प्रवृद्धमिति ॥१२४॥
विद्यात्॥ ११॥

॥लोभइति लोभः स्वकीयद्रव्यात्यागशीलता प्रवृत्तिः प्रयोजनमनुद्दिश्यापि चलस्वभावता आ
रंभः कर्मणां फलसाधनभूतानां कर्मणामारंभ योगः॥ अशमः इंद्रियानुपरतिः स्पृहा विषयेच्छा
एतानि रजसि प्रवृद्धे जायंते यदा लोभादयो वर्त्तंते तदा रजः प्रवृद्धमिति विद्यात्॥ १२॥ अप्रकाशइ
ति अप्रकाशः ज्ञानानुदयः अप्रवृत्तिः स्त ब्धता प्रमादः अकार्ये प्रवृत्तिफलमनवधानं
मोहो विपरीतज्ञानं एतानि तमसि प्रवृद्धे जायंते॥ एतैस्तमः प्रवृद्धमिति विद्यात्॥ १३॥ यदेति॥ यदास

लोभः प्रवृत्तिरारंभः कर्मणामशमः स्पृहा॥ रजस्येतानि जायंते विवृद्धे भरतर्षभ॥ १२॥ अप्रकाशो
ऽप्रवृत्तिश्च प्रमादो मोह एव च॥ तमस्येतानि जायंते विवृद्धे कुरुनंदन॥ १३॥ यदा सत्वे प्रवृद्धे तु प्रलयं
याति देहभृत॥ तदोत्तमविदां लोकानमलान्प्रतिपद्यते॥ १४॥ त्वे प्रवृद्धे तदा सत्वे प्रवृद्धे देहभृत् प्रलयं
मरणं याति चेत् तदोत्तमविदामात्मयाथात्म्यविदां लोकान् समूहान् अमलान् मलरहितान् ज्ञानर
हितान् प्रतिपद्यते प्राप्नोति॥ सत्वे प्रवृद्धे तु मृतः आत्मविदां कुले जनित्वात्मयाथात्म्यज्ञानसाधने
पुण्यकर्मस्वधिकारी सुकृती भवति॥ १४॥ ॥श्री॥ ॥

रजसीति॥ रजसि प्रवृद्धे मरणं प्राप्य फलार्थं कर्म कुर्वतां कुलेषु जायते॥ तत्र जनित्वा स्वर्गादिफलसा
धनकर्मस्वधिकरोतीत्यर्थः तथा तमसि प्रवृद्धे मृतो मूढयोनिषु पशुशूकरादियोनिषु सकलपुरुषा
र्थारंभानर्हो जायत इत्यर्थः॥१५॥ कर्मण इति॥ एवं सत्त्वप्रवृद्धौ मरणमुपगम्यात्मविदां कुले जायते तेन
तानुष्ठितसुकृतस्य फलाभिसंधिरहितमदाराधनरूपस्य कर्मणः फलं पुनरपि ततोधिकसत्त्वज
नितं निर्मलं दुःखगंधरहितं भवतीत्याहुः सत्त्वगुणपरिणामविदः॥ एवमेतेन कालप्रवृद्धस्य रजसस्तु

॥रजसि प्रलयं गत्वा कर्मसंगिषु जायते। तथा प्रलीनस्तमसि मूढयोनिषु जायते॥१५॥
॥कर्मणः सुकृतस्याहुः सात्विकं निर्मलं फलं रजसस्तु फलं दुःखमज्ञानं तमसः फलं॥१६॥

फलं फलसाधनकर्मसंगिकुले जन्म फलाभिसंधिपूर्वककर्मारंभः तत्फलानुभवार्थं पुनर्जन्ममर
णोत्कटिकफलं फलाभिसंधिपूर्वकर्मारंभपरंपरारूपं सांसारिकदुःखप्रायमेवाहुः तद्गुणयाथात्म्य
विदः एवमेतत्कालप्रवृद्धस्य तमसः फलमज्ञानपरंपरारूपं तदधिकसत्त्वादिजनितं निर्मलादि
फलं किमित्यत आह॥१६॥ ॥ ॥१६॥



सत्त्वादिति॥ एवं परंपरया ज्ञानादधिकसत्त्वादात्मयाथात्म्यापरोक्षरूपं ज्ञानं जायते तथा प्रवृद्धरज
सः स्वर्गादिफले लोभो जायते। तथा प्रवृद्धात्तु तमसः प्रमादो नवधानं तन्निमित्तासत्कर्मणि प्रवृत्ति
स्ततश्च मोहो विपरीतज्ञानं ततश्चाज्ञानं अधिकतरं तमश्चाज्ञानाभावः॥१७॥ ऊर्ध्वमिति॥ एवमुक्तेन
प्रकारेण सत्त्वस्था ऊर्ध्वं गच्छंति क्रमेण संसारबंधात मोक्षं गच्छंति॥ राजसाः स्वर्गादिलोककारण
त्वाद्राजसफलसाधनभूतं कर्मानुष्ठाय तत्फलमनुभूय पुनरपि जनित्वा तदपेक्षितं कर्मानुतिष्ठंतो

॥सत्त्वात्संजायते ज्ञानं रजसो लोभ एव च॥ प्रमादमोहौ तमसो भवतोऽज्ञानमेव च॥१७॥
॥ऊर्ध्वं गच्छंति सत्त्वस्था मध्ये तिष्ठंति राजसाः जघन्यगुणवृत्तिस्था अधो गच्छंति तामसाः॥१८॥

मध्ये तिष्ठंति पुनरावृत्तिरूपतया दुःखप्रायमेव तत्र तामसास्तु जघन्यगुणवृत्तिस्थास्तत्रोत्तरनि
कृष्टतमोवृत्तिषु स्थिता अधो गच्छंति अंत्यजत्वं ततस्तिर्यक्त्वं ततः कृमिकीटादिजन्म ततः स्थाव
रत्वं ततो विगुणत्वं ततश्च शिलाकाष्ठलोष्टत्वां गच्छंतीत्यर्थः॥१८॥ प्रकारविशेषैः फलाभिसंधि
रहितसुकृतविशेषैश्च परंपरया प्रवर्धितसत्त्वानां गुणात्ययद्वारेणोर्ध्वगमनप्रकारमाह॥

नान्यमिति ॥ एवं सात्विकाहारसेवया कृत्वाभिसंधिरहितभगवदाराधनरूपकर्मानुष्ठानेन रज
स्तमसी सर्वात्मनाभिभूय निरूढसत्वनिष्ठो यदा द्रष्टा गुणेभ्योऽन्यं कर्तारं नानुपश्यति गुणा एव स्वा
नुगुणप्रवृत्तिषु कर्तार इति पश्यति गुणेभ्यश्च परं वेत्ति कर्तृभ्यो गुणेभ्यश्च परमन्यमात्मानमकर्तारं
वेत्ति स मद्भावमधिगच्छति ॥ ममयो भावस्तमधिगच्छति ॥ एवमुक्तं भवति आत्मनः स्वतः परिशुद्धस्व
भावस्य पूर्वकर्ममूलगुणसंगनिमित्तं विविधकर्मसु कर्तृत्वं आत्मा स्वतस्त्वकर्ता अपरिच्छिन्नज्ञा

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ॥ गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥ १९ ॥ गुणानेता
नतीत्य त्रीन्देही देहसमुद्भवान् ॥ जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ २० ॥ नाकार इत्येवमात्मा

नं यदा पश्यति तदा मद्भावमधिगच्छतीति कर्तृभ्यो गुणेभ्योऽन्यमकर्तारमात्मानं पश्यन्भगवद्भाव
मधिगच्छतीत्युक्तं ॥ स भगवत्भावः कीदृश इत्यत आह ॥ १९ ॥ गुणानिति यो देही देहसमुद्भवान्देहा
कारपरिणतप्रकृतिसमुद्भवानेतान्सत्वादीन् त्रीन्गुणानतीत्य तेभ्योऽन्यं ज्ञानैकाकारमात्मानं प
श्यन् जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमात्मानमनुभवति एष मद्भाव इत्यर्थः ॥ २० ॥ अथ गुणाती

॥ अर्जुन उवाच ॥ कैरिति ॥ सत्वादीन्त्रीन्गुणानेतानतीतः कैर्लिंगैः कैर्लक्षणैरुपलक्षितो भवति
किमाचारः केनाचारेण युक्तोऽसौ अस्य स्वरूपावगते लिंगभूताचारः कीदृश इत्यर्थः कथं चैतान्
केनोपायेन सत्वादीन्त्रीन्गुणानतिवर्तते ॥ २१ ॥ श्रीभगवानुवाच प्रकाशमिति आत्मव्यतिरि
क्तेषु वस्तुषु निष्टेषु प्रवृत्तानि सत्वरजस्तमसां कार्याणि प्रकाशप्रवृत्तिमोहाख्यानि यो न द्वेष्टि ॥ तथा

अर्जुन उवाच ॥ कैर्लिंगैस्त्रीन्गुणानेतानतीतो भवति प्रभो ॥ किमाचारः कथं चैतांस्त्रीन्गुणानति
वर्तते ॥ २१ ॥ श्रीभगवानुवाच प्रकाशं च प्रवृत्तिं च मोहमेव च पांडव ॥ न द्वेष्टि संप्रवृत्तानि न निवृत्तानि
कांक्षति ॥ २२ ॥ उदासीनवदासीनो गुणैर्यो न विचाल्यते ॥ गुणा वर्तन्त इत्येवं योऽवतिष्ठति नेंगते ॥ २३ ॥

आत्मव्यतिरिक्तेषु विषयेषु तान्येव निवृत्तानि न कांक्षति ॥ २२ ॥ उदासीनेति ॥ उदासीनवदासीनः गुणव्य
तिरिक्तात्मावलोकनतृप्तोऽन्यत्र उदासीनवदासीनो गुणैर्द्वेषाकांक्षाद्वारेण यो न विचाल्यते ॥ गुणाः स्वे
षु कार्येषु प्रकाशादिषु वर्तन्त इत्यनुसंधाय तूष्णीमवतिष्ठति नेंगते न गुणकार्यानुगुणं चेष्टते ॥ २३ ॥
समेति ॥ मानापमानयोरिति समदुःखसुखः दुःखसुखयोः समचित्तः स्वस्थः स्वस्मिन्स्थितः स्वा

स्य स्वरूपस्य सूचनाचारप्रकारं गुणातीतस्य दे
तुं च प्रश्नन

रि

॥ गी॰भा॰ त्मैकप्रियत्वेन तद्व्यतिरिक्तपुत्रजन्ममरणादिसुखदुःखयोः समचित्त इत्यर्थः ॥ तत एव समलोष्टाश्म अ॰१४॥
॥१२७॥ कांचनः तत एव च तुल्यप्रियाप्रियः तुल्यप्रियाप्रियविषयः धीरः प्रकृत्यात्मविवेककुशलः ॥ तत ए
व तुल्यनिंदात्मसंस्तुतिः आत्मनि मनुष्यत्वाद्यभिमानकृतगुणागुणस्तुतिनिंदयोः स्वासंबंधानुसं
धानेन तुल्यचित्तः तथा युक्तः मानापमानयोस्तथा युक्तः मित्रारिपक्षयोरपि स्वसंबंधाभावादेव तुल्यचि

॥ समदुःखसुखः स्वस्थः समलोष्टाश्मकांचनः ॥ तुल्यप्रियाप्रियो धीरस्तुल्यनिंदात्मसंस्तुतिः ॥२४॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ॥ सर्वारंभपरित्यागी गुणातीतः स उच्यते ॥२५॥ मां च यो ऽव्य
भिचारेण भक्तियोगेन सेवते ॥ स गुणान्समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥२६॥

त्तः तथा युक्तः सर्वारंभप
रित्यागी य एवंभूतः स गुणातीत उच्यते ॥ तथैवंभूतगुणात्यये प्रधानहेतुमाह ॥२४॥२५॥ मां चेति ॥ नान्यं
गुणेभ्यः कर्त्तारमित्यादिनोक्तेन प्रकृत्यात्मविवेकानुसंधानमात्रेण न गुणात्ययः प्राप्यते तस्यानादिका
लप्रवृत्तविपरीतवासनाबाध्यत्वसंभवात् ॥ मां सत्यसंकल्पं परमकारुणिकमाश्रितवात्सल्यजलधि
मव्यभिचारेणैकांत्यविशिष्टेन भक्तियोगेन यः सेवते स एतान्सत्वादीन्दुरत्ययानतीत्य ब्रह्मभूया
य ब्रह्मत्वाय कल्पते ब्रह्मभावयोग्यो भवति यथावस्थितमात्मानममृतमव्ययं प्राप्नोतीत्यर्थः ॥२६ १२७॥

ब्रह्मणो हीति ॥ हिशब्दो हेतौ ॥ यस्मादहमव्यभिचारिभक्तियोगेन सेवितो ऽमृतस्याव्ययस्य ब्रह्मणः प्र
तिष्ठा तथा शाश्वतस्य धर्मस्य अतिशायितनित्यैश्वर्यस्य एकांतिकस्य सुखस्य वासुदेवः सर्वमित्यादि
ना निर्दिष्टस्य ज्ञानिनः प्राप्यस्य सुखस्य चेत्यर्थः ॥ यद्यपि शाश्वतधर्मशब्दः प्रापकवचनः तथापि पू
र्वोत्तरयोः प्राप्यरूपत्वेन तत्साहचर्यादयमपि प्राप्यलक्षकः ॥ एतदुक्तं भवति ॥ पूर्वत्र दैवी ह्येषा गुण
मयी मम माया दुरत्यया मामेव ये प्रपद्यंते इत्यारभ्य गुणात्ययस्य तत्पूर्वकाक्षरैश्वर्यभगवत्प्राप्तीनां च

॥ ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ॥ शाश्वतस्य च धर्मस्य सुखस्यैकांतिकस्य च २७ ॥ इति श्री
भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे चतुर्दशो ऽध्यायः ॥१४॥
भग

भगवत्प्रपत्त्येकोपायत्वप्रतिपादनादेकांतभगवत्प्रपत्त्येकोपायो गुणात्ययस्तत्पूर्वकब्रह्मभाव
श्चेति ॥२७॥ इति श्रीरामानुजाचार्यविरचिते श्रीभगवद्गीताभाष्ये चतुर्दशो ऽध्यायः ॥१४॥ क्षेत्राध्या
ये क्षेत्रक्षेत्रज्ञयोः प्रकृतिपुरुषयोः स्वरूपं विशोध्य विशुद्धस्यापरिच्छिन्नज्ञानैकाकारस्य पुरुषस्यै
व प्राकृतगुणसंगप्रवाहनिमित्तो देवाद्याकारपरिणतः प्रकृतिसंबंधो ऽनादिरित्युक्तं ॥ अनंतरे चा

ध्यायेत्पुरुषस्य कार्यकारणे नयावस्थाप्रकृतिसंबंधो गुणसंगमूलो भगवतैवकृत इत्युक्तो गुणसं
गप्रकारं सविस्तरं प्रतिपाद्य गुणसंगनिवृत्तिपूर्विकात्मयाथात्म्यावाप्तिश्च भगवद्भक्तिमूलेत्युक्तं॥इ
दानीं भजनीयस्य भगवतः क्षराक्षरात्मकबद्धमुक्तविभूतियुक्तात् विभूतिभूतात्क्षराक्षरपुरुषद्व
यात् निखिलहेयप्रत्यनीककल्याणैकतानतयात्यंतोत्कर्षेण विसजातीयस्य पुरुषोत्तमत्वं च व
क्तुमारभते॥ तत्र तावदसंगरूपशस्त्रच्छिन्नबंधाक्षराख्यविभूतिं वक्तुं छेद्यरूपं बंधाकारेण वितत

श्रीभगवानुवाच ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययं। छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित्॥१॥

मचिन्त्यपरिणामविशेषमश्वत्थवृक्षाकारं कल्पयन्॥श्रीभगवानुवाच॥ऊर्ध्वमूलमिति॥ यं संसारा
ख्यमश्वत्थमूर्ध्वमूलमधःशाखमव्ययं प्राहुः श्रुतयः ऊर्ध्वमूलोऽर्वाक्शाख एषोऽश्वत्थः सनातनः
ऊर्ध्वमूलमर्वाक्शाखं वृक्षं यो वेद संप्रतीत्याद्याः॥ सप्तलोकोपरिनिविष्टचतुर्मुखादित्वेन तस्य ऊर्ध्व
मूलत्वं पृथिवीनिवासिसकलनरपशुमृगपक्षिकृमिकीटपतंगस्थावरांततया अधःशाखत्वं॥सम्यक्
ज्ञानोदयात् प्राक् प्रवाहरूपेणाच्छेद्यत्वेनाव्ययत्वं यस्य चाश्वत्थस्य छंदांसि पर्णान्याहुः छंदांसि श्रु १२८॥

तयः॥ वायव्यं श्वेतमालभेत भूतिकामः ऐंद्राग्नमेकादशकपालं निर्वपेत्प्रजाकाम इत्यादि श्रुतिप्रतिपा
दितैः काम्यकर्मभिर्वर्द्धतेयं संसारवृक्ष इति तस्य छंदांस्येव पर्णानि पत्रैर्हि वृक्षो वर्द्धते॥ यस्तमेवंभू
तमश्वत्थं वेद स वेदवित् वेदो हि संसारवृक्षस्य छेदोपायं वदति छेद्यस्य वृक्षस्य स्वरूपज्ञानं छेदनोपा
यज्ञानोपयोगीति वेदवित् उच्यते॥१॥ अधश्चेति॥ तस्य मनुष्यादिशाखस्य वृक्षस्य तत्कर्मकृतानि पर्यधःशा
खाः पुनरपि मनुष्यपश्वादिरूपेण प्रसृता भवंति ऊर्ध्वं च गंधर्वयक्षदेवादिरूपेण प्रसृता भवंति॥ताश्च

॥ अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः॥
॥ अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके॥२॥

गुणप्रवृद्धाः गुणैः सत्वादिभिः प्रवृद्धाः विषयप्रवालाः शब्दादिविषयपल्लवाः॥ कथमित्यत्राह
अधश्च मूलान्यनुसंततानि कर्मानुबंधीनि मनुष्यलोके ब्रह्मलोके मूलस्यास्य वृक्षस्य मनुष्याग्र
स्य अधो मनुष्यलोके च मूलान्यनुसंततानि च कर्मानुबंधीनि कर्माण्येवानुबध्नंतीति मूलान्यधो मनुष्यलो
के च भवंतीत्यर्थः॥ मनुष्यत्वावस्थायां कृतैर्हि कर्मभिरधो मनुष्यपश्वादय ऊर्ध्वं च देवादयो भवंति॥२॥

॥गी॰ आ॰ ॥ न रूपमिति॥ अस्य वृक्षस्य च तूर्ध्वमुखत्वादित्वेन ऊर्ध्वमूलत्वं न तु संतानपरंपरया मनुष्यपश्चाद्ब्रह्मणो मनु अ॰ १५॥
॥१२९॥ ष्याग्रत्वेनाधः शाखत्वं मनुष्यत्वे कृतैः कर्मभिः मूलभूतैः पुनरप्यधश्चोर्ध्वं च प्रसृतशाखत्वमिति य
थेदं रूपं निर्दिष्टं न तथा संसारिभिरुपलभ्यते मनुष्योऽहं देवदत्तस्य पुत्रोऽहं यज्ञदत्तस्य पिता तदनुरूप
परिग्रहश्च भूसेतावन्मात्रमुपलभ्यते॥ तथास्य वृक्षस्यांतो विनाशोऽपि गुणमयभोगेषु संगकृत इति
नोपलभ्यते॥ तथास्य गुणसंग एवादिरिति नोपलभ्यते॥ अस्य प्रतिष्ठा चात्मात्मन्यात्माभिमान इति

॥न रूपमस्येह तथोपलभ्यते नांतो न चादिर्न च संप्रतिष्ठा॥ अश्वत्थमेनं सुविरूढमूलमसंगशस्त्रेण
दृढेन छित्त्वा॥३॥

नोपलभ्यते प्रतीतिरस्य स्थितिनि निरात्मा ज्ञानमेवास्य प्रतिष्ठा॥ अश्वत्थमेनं
सुविरूढमूलमसंगशस्त्रेण दृढेन छित्त्वा ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्त्तंति भूयः य
एवमुक्तप्रकारं सुविरूढमूलं सुष्ठु विविधं रूढं मूलं यस्य तमश्वत्थं सम्यक्ज्ञानमूलेन दृढेन गुणमयभोगा
संगाख्येन शस्त्रेण छित्त्वा ततो विषयासंगाद्धेतोः स्त्रतत्पदं परिमार्गितव्यं अन्वेषणीयं यस्मिन् गता भू
यो न निवर्त्तंते॥ कथमनादिकालप्रवृत्तो गुणमयभोगसंगस्तन्मूलं च विपरीतज्ञानं निवर्त्तत इत्यत्राह १२९॥

तमिति॥ अज्ञानादिनिवृत्तये तमेव चाद्यं कृत्स्नस्यादिभूतं मयाध्यक्षेण प्रकृतिः सूयते सचराच
रं॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रवर्त्तते मत्तः परतरं नान्यत्किंचिदस्ति धनंजयेत्यादिभूक्तमाद्यं
पुरुषं तमेव शरणं प्रपद्येत॥ यतः यस्मात्कृत्स्नस्यास्य वृक्षस्येयं गुणमयभोगसंगप्रवृत्तिः पुराणी पु
रातनी प्रसृता॥ उक्तं हि मयैव पूर्वमेतत् दैवी ह्येषा गुणमयी मम माया दुरत्यया मामेव ये प्रपद्यंते
मायामेतां तरंति ते इति प्रपद्ये यतः प्रवृत्तिरिति वा पाठः॥ तमेव चाद्यं पुरुषं प्रपद्य शरणमुपगम्य

॥ततः पदं तत्परिमार्गितव्यं यस्मिन् गता न निवर्त्तंति भूयः॥
॥तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी॥४॥

इत्यर्थः॥ यत अज्ञाननिवृत्त्यादेः कृत्स्नस्यैतस्य साधनभूता पुराणी प्रवृत्तिः प्रसृता पुरातना
नां मुमुक्षूणां प्रवृत्तिः पुराणी॥ पुरातना मुमुक्षवो मां शरणमुपगम्य निर्मुक्तबंधाः संजाता इ
त्यर्थः॥ ३॥४॥ निर्मानेति॥ एवं मां शरणमुपगम्य निर्मानमोहा निर्गतमानमोहा अनात्मन्यात्मा
भिमानरहिताः जितसंगदोषाः जितगुणमयभोगसंगाख्यदोषाः॥ अध्यात्मनित्याः आत्मनि

यत् ज्ञानं तद्ध्यात्मं आत्मज्ञाननिरताः विनिवृत्ततदितरकामाः सुखदुःखसंज्ञैश्च द्वंद्वैर्वि
मुक्ताः अमूढाः आत्मानात्मस्वभावज्ञाः तदव्ययं पदं गच्छंति॥ अनवच्छिन्नज्ञानाकारमात्मा
नं यथावस्थितं प्राप्नुवंति मां शरणमुपगतानां मत्प्रसादादेवताः सर्वाः प्रकृतयः सुशकाः सि
द्धिपर्यंता भवंतीत्यर्थः॥५॥ नेति॥ तदात्मज्योतिर्न सूर्यो भासयति न शशांको पावकश्च यद्गत्वा
पुनः न निवर्त्तते तत्परमं धाम परमज्योतिः मम मदीयं आदित्यादीनामपि प्रकाशकत्वेनास्य

निर्माणमोहा जितसंगदोषा अध्यात्मनित्या विनिवृत्तकामाः॥ द्वंद्वैर्विमुक्ताः सुखदुःखसंज्ञै
र्गच्छंत्यमूढाः पदमव्ययं तत्॥५॥ न तद्भासयते सूर्यो न शशांको न पावकः॥ यद्गत्वा न निव
र्त्तंते तद्धाम परमं मम॥६॥ परमत्वं आदित्यादीनां ज्योतींषि न ज्ञानज्योतिषः प्रकाशकानि ज्ञा
नमेव हि सर्वस्य प्रकाशकं बाह्यानि तु ज्योतींषि विषयेंद्रियसंबंधविरोधितमोनिरसनद्वारे
णोपकारकानि॥ अस्य च प्रकाशको योगः तद्विरोधिचानादिकर्म तन्निवर्त्तनं चोक्तं भगवत्प्र
पत्तिमूलमसंगादि यद्गत्वा पुनर्न निवर्त्तते तद्धाम परमं ज्योतिर्मम मद्विभूतिभूतो मर्मांश इत्यर्थः॥६॥ ॥१३०॥

॥ममेति॥ इत्थमुक्तस्वरूपः सनातनो मदंश एव सन् कश्चिदनादिकर्मरूपाविद्यावेष्टनतिरोहितस्वस्वरू
पो जीवभूतो जीवलोके वर्त्तमानः देवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थानि मनःषष्ठानींद्रि
याणि कर्षति कश्चित्पूर्वोक्तमार्गेणास्मादविद्याया मुक्तः स्वेन रूपेणावतिष्ठते॥ जीवभूतेत्यत्र तिसंकुचि
तज्ञानैश्वर्यः कर्मलब्धप्रकृतिपरिणामविशेषरूपशरीरस्थानां इंद्रियाणां मनःषष्ठानामीश्वरस्तानि

॥ ममैवांशो जीवलोके जीवभूतः सनातनः॥ मनःष ॥
॥ ष्ठानींद्रियाणि प्रकृतिस्थानि कर्षति॥७॥ शरीरं यदवाप्नो ॥
॥ ति यच्चाप्युत्क्रामतीश्वरः॥ गृहीत्वैतानि संयाति वायुर्गंधानिवाशयात्॥८॥

कर्मानुगुणमितस्ततः कर्षति॥७॥ शरीरमिति॥ यच्छरीरमवाप्नोति यस्माच्छरीरादुत्क्रामति तत्रायमिंद्रि
याणामीश्वरः एतानींद्रियाणि भूतसूक्ष्मैः सह गृहीत्वा संयाति वायुर्गंधानिवाशयात्॥ यथा वायुः स्र
क्चंदनकस्तूरिकाद्याशयात् तत्स्थानात् सूक्ष्मावयवैः सह गंधान् गृहीत्वान्यत्र संयाति तद्वदित्यर्थः॥८॥

॥गी॰ऽ॰ ॥१३१॥

श्रोत्रमिति॥ एतानि मनःषष्ठानींद्रियाणि अधिष्ठाय स्वस्वविषयेष्वनुगुणानि कृत्वा तत्तच्छब्दादी नविषयानुपसेवते उपभुंक्ते॥९॥ उत्क्रामन्निति एवं गुणान्वितं सत्वादिगुणमयप्रकृतिपरिणामविशेष मनुष्यत्वादिसंस्थानपिंडसंसृष्टं पिंडविशेषादुत्क्रामंतं पिंडविशेषे च स्थितं वा गुणमयान विषयान अ॰ १५॥

॥ श्रोत्रं चक्षुः स्पर्शनं च रसनं घ्राणमेव च ॥
॥ अधिष्ठाय मनश्चायं विषयानुपसेवते॥९॥
॥ उत्क्रामंतं स्थितं चापि भुंजानं वा गुणान्वितं ॥
॥ विमूढा नानुपश्यंति पश्यंति ज्ञानचक्षुषः॥१०॥

भुंजानं वा कदाचिदपि प्रकृतिपरिणामविशेषमनुष्यत्वादिपिंडाद्भिन्नस्वरूपं ज्ञानैकाकारं विमूढा नानुपश्यंति विमूढा मनुष्यत्वादिपिंडाकारात्माभिमानिनः ज्ञानचक्षुषः पिंडात्मविवेकविषयज्ञानवं तस्तु सर्वावस्थमप्येनं विविक्ताकारमेव पश्यंति॥१०॥ १३१॥

यतंत इति॥ मत्प्रपत्तिपूर्वककर्मयोगादिभिर्यतमाना अस्मिन्निर्मलांतःकरणा योगिनो योगाख्येन चक्षु षात्मनि शरीरे अवस्थितमपि शरीराद्विविक्तं स्वेन रूपेणावस्थितमेनं पश्यंति यतमाना अप्यकृतात्मानो मत्प्रपत्तिविरहिणस्तत एवाकृतमनसः तत एवाचेतसः आत्मावलोकने समर्थचेतोरहिताः नैनं पश्यंति एवं रविचंद्रादीनामिंद्रियसन्निकर्षविरोधिसंतमसनिरसनमुखेनेंद्रियानुग्राहकतया प्रका

विषय

॥ यतंतो योगिनश्चैनं पश्यंत्यात्मन्यवस्थितं॥ यतंतोप्यकृतात्मानो नैनं पश्यंत्यचेतसः॥११॥
॥ यदादित्यगतं तेजो जगद्भासयतेखिलं यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकं॥१२॥

का

शकानां ज्योतिष्मतामपि प्रकाशकं ज्ञानं ज्योतिरात्मा मुक्तावस्थो जीवावस्थश्च भगवद्विभूतिरित्युक्तं तदा मपरमंशं ममैवांशो जीवलोके जीवभूतः सनातन इति॥११॥ इदानीमचिंत्यपरिणामविशेषमादित्यादी नां ज्योतिष्मतां ज्योतिरपि भगवद्विभूतिरित्याह यदिति॥ अखिलस्य जगतो भासकं तेषामादित्यानां तेजस्तन्मदीयं तेजस्तैराराधितेन मया तेभ्यो दत्तमिति विद्धि॥१२॥ इत्थं पृथिव्याश्च भूतधारिण्याः धारकत्व

गामिति ॥ अहं पृथिवीमाविश्य सर्वाणि भूतान्योजसा मम सामर्थ्येन धारयामि पुष्णामीति ॥
तथाहममृतरसमयः सोमो भूत्वा सर्वौषधीः पुष्णामि ॥ १३ ॥ अहमिति ॥ अहं वैश्वानरो जठरानलो भू-
त्वा सर्वेषां प्राणिनां देहमाश्रितः ॥ तैर्भुक्तं खाद्यभोज्यलेह्यपेयात्मकं चतुर्विधमन्नं प्राणापानव्यक्ति-

॥ गामाविश्य च भूतानि धारयाम्यहमोजसा ॥
॥ पुष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः ॥ १३ ॥
॥ अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ॥
॥ प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं ॥ १४ ॥

नेद्धः समायुक्तः पचामि ॥ १४ ॥ अत्र परमपुरुषविभूतिभूतौ सोमवैश्वानरौ अहं सोमो भूत्वा वैश्वान-
रो भूत्वेति तच्छब्दसामानाधिकरण्येन निर्दिष्टौ तयोश्च सर्वस्य भूतजातस्य च परमपुरुषसामानाधिकरण्ये-
न निर्देशे हेतुमाह ॥ ॥ 

॥ सर्वस्येति ॥ तयोः सोमवैश्वानरयोः सर्वस्य भूतजातस्य च सकलप्रवृत्तिमूलज्ञानोदयदेशे हृदि सर्वमत्सं-
कल्पेन नियच्छन् अहमात्मतया सन्निविष्टः ॥ तथाह श्रुतिः अन्तः प्रविष्टः शास्ता जनानां सर्वात्मा यः
पृथिव्यां तिष्ठन् य आत्मनि तिष्ठन्नित्याद्याः ॥ अतो मत्तः सर्वेषां स्मृतिर्जायते स्मृतिः पूर्वानुभूतविषयानु-
भवसंस्कारमात्रजं ज्ञानं ज्ञानं इन्द्रियलिङ्गागमयोगजो वस्तुनिश्चयः सोपि मत्तः ॥ अपोहनं च ज्ञानानि-
वृत्तिः अपोहनं मूहनं वा ऊहनम् ऊह एव वेति स्मृतेः ॥ ऊहो नाम इदं प्रमाणमित्थं प्रवर्तितुमर्हतीति प्रमा-

॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ॥
॥ वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहं ॥ १५ ॥

णप्रवृत्त्यर्हताविषयसामग्र्यादिनिरूपणजन्यं प्रमाणानुग्राहकं ज्ञानं तच्च मत्त एव वेदैश्च सर्वैरहमेव वे-
द्यः अतोऽग्निवायुसूर्यसोमेन्द्रादीनां मदन्तर्यामिकत्वेन मदात्मकत्वात्तत्प्रतिपादनपरैरपि सर्वैर्वेदैर-
हमेव वेद्यः देवमनुष्यादिशब्दैर्जीवात्मेव वेदान्तकृत वेदानामपि इन्द्रमेव वरुणं यजेतेत्येवमादीनामं-
तः फलं फलहिते सर्वे वेदाः पर्यवस्यन्ति अन्तकृत् फलकृत् वेदोदितफलस्य प्रदाता चाहमेवेत्यर्थः

तदुक्तं पूर्वमेव योयोयांयां तनुं भक्तः श्रद्धयार्चितुमिच्छतीत्यारभ्य लभते च ततः कामान्मयैव विहि
तान्हितानिति ॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव चेति च ॥ वेदविदेव चाहं वेदविद्धाहमेव एवंभू
तदभिधायिनं वेदं अहमेव वेद इतोन्यथा यो वेदार्थं ब्रूते न स वेदविदित्यभिप्रायः ॥ अतो मत्त एव सर्व
वेदानां सारमर्थं शृणु ॥ १५ ॥ द्वाविमाविति क्षरश्चाक्षर एव चेति द्वाविमौ पुरुषौ लोके प्रथितौ तत्र क्षर
शब्दनिर्दिष्टः पुरुषो जीवशब्दाभिलपनीयो ब्रह्मादिस्तंबपर्यंत क्षरणस्वभावाचित्संसृष्टसर्वभूता

॥ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ॥ क्षरः सर्वाणि भूतानि कूटस्थोक्षर उच्यते ॥ १६ ॥

नि । अत्राचित्संसर्गैकोपाधिना पुरुष इत्येकत्वनिर्देशः अक्षरशब्दनिर्दिष्टः कूटस्थः अचित्संस
र्गवियुक्तः स्वेन रूपेणावस्थितो मुक्तात्मा स त्वचित्संसर्गाभावात् अचित्परिणामविशेषब्रह्मादिदेह
साधारणो न भवतीति कूटस्थ इत्युच्यते ॥ अत्राप्येकत्वनिर्देशोचिद्वियोगरूपैकोपाधिना निर्दिष्टः
पूर्वमनादौ काले मुक्ता अनेक एव । यथोक्तं बहवो ज्ञानतपसा पूता मद्भावमागताः ॥ मम साधर्म्यमा
गताः ॥ सर्गेपि नोपजायंते प्रलये न व्यथंति चेति ॥ १६ ॥ ॥ ॥



उत्तम इति ॥ उत्तमः पुरुषस्तु ताभ्यां क्षराक्षरशब्दनिर्दिष्टाभ्यां बद्धमुक्तपुरुषाभ्यामन्यः अर्थांतरभू
तः परमात्मेत्युदाहृतः सर्वासु श्रुतिषु च परमात्मेति निर्देशादेव हि उत्तमः पुरुषो बद्धमुक्तपुरुषाभ्या
मर्थांतरभूत इत्यवगम्यते ॥ कथं यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ लोक्यत इति लोकः तत्त्रयं
लोकत्रयं अचेतनं तत्संसृष्टचेतनो मुक्तश्चेति प्रमाणादवगम्यते तत्त्रयं य आत्मतयाविश्य बिभ
र्त्ति स तस्माद्व्याप्यात् भर्तव्याच्च ॥

॥ उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ॥
॥ यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥ १७ ॥

र्थांतरभूतः ॥ इतश्चोक्ताल्लोकत्रयादर्थांतरभूतः यतः सोव्यय ईश्वरश्च ॥ अव्ययस्वभावो ह्यव्ययस्व
भावादचेतनभूतात्तत्संबंधेन तदनुसारिणश्चेतनाद् अचित्संबंधयोग्यतया पूर्वसंबंधिनो मुक्ता
च्चार्थांतरभूत एव तथैव तस्य लोकत्रयस्येश्वरः ईशितव्यात्तस्मादर्थांतरभूतः ॥ १७ ॥ ॥

॥गी॰भा॰ ॥यस्मादिति॥ यस्मादेवमुक्तैः स्वभावैः क्षरं पुरुषमतीतोऽहं॥ अक्षरान्मुक्तादप्युक्तैर्हेतुभिरुत्कृष्टतमः॥ अ॰१५॥
॥२३४॥ अतोऽहं लोके वेदे च पुरुषोत्तम इति प्रथितोऽस्मि॥ वेदार्थावलोकनात् लोक इति स्मृतिरिहोच्यते स्मृ-
तौ स्मृतौ चेत्यर्थः॥ श्रुतौ तावत् परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमपुरुष इत्यादौ स्मृतौ
च॥ अंशावतारं पुरुषोत्तमस्य ह्यनादिमध्यांतमजस्य विष्णोरित्यादौ॥१८॥ योमामिति॥ य एवमुक्तेन
प्रकारेण पुरुषोत्तमं मामसंमूढो जानाति क्षराक्षरपुरुषाभ्यामव्ययस्वस्वभावतया व्यापनभरणैश्व-

॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः॥१८॥ यो मामे-
वमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां सर्वभावेन भारत॥१९॥

॥ र्यादियोगेन विसजातीयं जा-
नाति स सर्ववित् सर्वमस्मत्प्राप्त्युपायतया यद्वेदितव्यं तत्सर्वं वेद भजति मां सर्वभावेन ये च मत्प्राप्त्युपायतया
मद्भजनप्रकारा निर्दिष्टास्तैः सर्वैर्भजनप्रकारैर्मां भजते सर्वैर्मद्विषयैर्वेदनैर्मम या प्रीतिर्या च मम सर्वैः
मद्भजनैर्मद्विषयैरुभयविधा सा प्रीतिरनेन वेदनेन जायत इत्येतत्पुरुषोत्तमत्ववेदनं प्रशंसयति॥१९॥ १३५॥

॥इतीति॥ इत्थं मम पुरुषोत्तमत्वप्रतिपादनं सर्वेषां गुह्यानां गुह्यतममिदं शास्त्रं त्वमनघतया मयोपन्यस्तम् इ-
ति कृत्वा मयानवोक्तं एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च यावत् प्रपन्नोपादेया बुद्धिः सा सर्वोपादानास्याद्
यच्छ्रुतेन कर्तव्यं तत्सर्वं कृतं स्यादित्यर्थः॥ अनेन श्लोकेनानंतरोक्तं पुरुषोत्तमविषयं ज्ञानं शास्त्रज-
न्यमेवेत्तत्करोतीति न तु साक्षात्काररूपमित्युच्यते॥ अचिन्त्यैश्वर्याद्विशुद्धाच्चेतनात् पुरुषोत्तमः व्यापना-

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ॥ एतद्बुद्ध्वा बुद्धिमान् स्यात्कृतकृत्यश्च भारत॥२०॥ ॥इति श्रीभग-
वद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पंचदशोऽध्यायः॥

अस्मिन्संवादेऽध्याये श्लोकाः २०

न भरणात् स्वाम्यादन्यः पंचदशोदितः॥२०॥ इति श्रीभगवद्रामानुजविरचिते श्रीमद्भगवद्गीताभाष्ये पंच-
दशोऽध्यायः॥ १५॥ अतीतेनाध्यायत्रयेण प्रकृतिपुरुषयोर्विविक्तयोः संसृष्टयोश्च याथात्म्यं तत्सं-
सर्गवियोगयोश्च गुणसंगतद्विपर्ययहेतुत्वं सर्वप्रकारेणावस्थितयोः प्रकृतिपुरुषयोर्भगवद्विभूति-
त्वं विभूतिमतो भगवतो विभूतिभूतादचिद्वस्तुनः चिद्वस्तुनश्च बद्धमुक्तोभयरूपादव्ययत्वव्यापनभर-

॥भ॰गी॰॥ एतस्यामैश्वर्यो नरतया पुरुषोत्तमत्वेन याथात्म्यं च वर्णितं ॥ अनंतरमुक्तस्यार्थस्य स्थेम्ने शास्त्रवश्य अ॰१६
॥१३५॥ तां वक्तुं शास्त्रवश्यतद्विपरीतयोर्दैवासुरवर्गयोर्विभागं ॥ श्रीभगवानुवाच ॥ अभयमिति अहिंसे
तितेज इति च ॥ इष्टानिष्टवियोगसंयोगरूपस्य दुःखस्य हेतुदर्शनजं दुःखं भयं तन्निवृत्तिरभयं सत्व
संशुद्धिः सत्वमंतःकरणं तस्य संशुद्धिः रजस्तमोभ्यामस्पृष्टत्वं ॥ ज्ञानयोगव्यवस्थितिः प्रकृतिविवि

॥ श्रीभगवानुवाच ॥ अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः । दानं दमश्च यज्ञश्च स्वाध्यायस्तप आ
र्जवं ॥ १ ॥ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं ॥ दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलं ॥ २ ॥ ते
जः क्षमा धृतिः शौचमद्रोहो नातिमानिता ॥ भवंति संपदं दैवीमभिजातस्य भारत ॥ ३ ॥

क्तात्मस्वरूपविवेकनिष्ठात्तस्य मनसः निवर्त्तनं दानं न्यायार्जितधनस्य पात्रे प्रतिपादनं ॥ दमो मनसो
विषयेभ्यो बाह्यनिवृत्तिसंशीलनं यज्ञः फलाभिसंधिरहितभगवदाराधनरूपमहायज्ञाद्यनुष्ठानं
स्वाध्यायः सविभूतेर्भगवतस्तदाराधनप्रकारस्य च प्रतिपादकः कृत्स्नो वेदस्तस्यानुसंधायवे १३५॥

दभ्यासनिष्ठा तपः कृच्छ्रचांद्रायणद्वादश्युपवासादेर्भगवत्प्रीणनकर्मयोग्यतापादनस्य करणं आ
र्जवं मनोवाक्कायकर्मप्रवृत्तीनामेकनिष्ठापरेषु ॥ अहिंसा परपीडावर्जनं सत्यं यथादृष्टार्थगोचरभूत
हितवाक्यं ॥ अक्रोधः परपीडाफलकचित्तविकाररहितत्वं ॥ त्यागः आत्महितप्रत्यनीकपरिग्रह
विमोचनं शांतिरिंद्रियाणां विषयप्रावण्यनिरोधसंशीलनं ॥ अपैशुनं परानर्थकरवाक्यानिवेदना
करणं दया भूतेषु सर्वेषु भूतेषु दुःखासहिष्णुत्वं अलोलुपत्वं अलोलुत्वमिति वा पाठः विषयेषु निःस्पृ
हत्वमित्यर्थः ॥ मार्दवं अकाठिन्यं साधुजनविश्लेषासहत्वमित्यर्थः ॥ ह्रीः अकार्यकरणे लज्जा ॥ अचापलं स्पृ
हणीयविषयसन्निधावचपलत्वं ॥ तेजः दुर्जनैरनभिभवनीयत्वं ॥ क्षमा परनिमित्तपीडानुभवेपि तत्प्रति
चित्तविकाररहितता ॥ धृतिः महत्यामप्यापदि कृत्यकर्तव्यतावधारणं शौचं बाह्यांतःकरणानां कृ
त्ययोग्यता शास्त्रीया ॥ अद्रोहः परेष्वनुपरोधः परेषु स्वच्छंदवृत्तिनिरोधरहितत्वमित्यर्थः नातिमा
निता अस्थानेगर्वो अतिमानित्वं तद्रहितता ॥ एते गुणा दैवीं संपदमभिजातस्य भवंति देवसंबंधिनी दै
वी देवा भगवदाज्ञानुवृत्तिशीलाः ॥ तेषां संपत्सा च भगवदाज्ञानुवृत्तिरेव तामभिजातस्य तामभिमुखी
कृत्य जातस्य तामभिवर्तयितुं जातस्य भवंतीत्यर्थः ॥ १ ॥ २ ॥ ३ ॥ ॥ छ ॥ ॥

दंभ इ॰ति ॥ दंभो धर्मित्वख्यापनाय धर्मानुष्ठानं दर्पः कृत्याकृत्याविवेककरो विद्याधनादिनिमित्तो
हर्षः ॥ अभिमानः स्वविद्याभिजनाद्युत्कर्षेणातिमानः क्रोधः परपीडाफलश्चित्तविकारः ॥ पारुष्यं सा
धूनामुद्वेगकरस्वभावः ॥ अज्ञानं परावरतत्त्वकृत्याकृत्याविवेकः ॥ एते स्वभावा आसुरीं संपदमभि
जातस्य भवंति ॥ असुरा भगवदाज्ञानिवृत्तिशीलाः ॥ ४ ॥ दैवी संपदिति ॥ दैवी मदाज्ञानुवृत्तिरूपा

॥ दंभो दर्पोभिमानश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य पार्थ संपदमासुरीं ॥ ४ ॥
॥ दैवी संपद्विमोक्षाय निबंधायासुरी मता ॥ माशुचः संपदं दैवीमभिजातोसि पांडव ॥ ५ ॥

संपद्विमोक्षाय बंधान्मुक्तये भवति ॥ क्रमेण मत्प्राप्तये भवतीत्यर्थः ॥ आसुरी मदाज्ञानिवृत्तिरूपा सं
पन्निबंधाय भवति ॥ अधोगतिप्राप्तये भवतीत्यर्थः एतच्छ्रुत्वा स्वप्रकृतिनिर्द्धारणादतिभीतायार्जुना
येवमाह ॥ माशुच इति शोकं माकृथाः ॥ त्वं तु दैवीं संपदमभिजातोसि पांडव धार्मिकाग्रेसरस्य हि पां
डोस्तनयस्त्वमित्यभिप्रायः ॥ ५ ॥ ॥ ॥ २३६ ॥

द्वौ विति ॥ अस्मिन्कर्मक्षेत्रके लोके कर्मकारिणां भूतानां सर्गौ द्वौ द्विधौ दैवश्चासुरश्च सर्ग उत्पत्तिः
प्राचीनपुण्यपापरूपकर्मवशाद्भगवदाज्ञानुवृत्तितद्विपरीतकरणायोग्यतया तत्काल एव विभागेन भू
तान्युत्पद्यंत इत्यर्थः ॥ तत्र दैवसर्गो विस्तरशः प्रोक्तः देवानां मदाज्ञानुवृत्तिशीलानां सर्गः उत्पत्तिः यं
दाचारकरणार्थः सदाचारः कर्मयोगज्ञानयोगभक्तियोगरूपो विस्तरशः प्रोक्तः ॥ असुराणां सर्ग
श्च यदाचारकरणार्थस्तमाचरं मे शृणु मत्तः काशात् शृणु ॥ ६ ॥ प्रवृत्तिमिति ॥ प्रवृत्तिं निवृत्तिं चासुरस्य निवृत्त

॥ द्वौ भूतसर्गौ लोकेस्मिन् दैव आसुर एव च ॥ दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ६ ॥
॥ प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ॥ न शौचं नापि चाचारो न सत्यं तेषु विद्यते ॥ ७ ॥

साधनं मोक्षसाधनं च वैदिकधर्ममासुरा न विदुः न जानंति ॥ न शौचं वैदिककर्मयोग्यत्वं शास्त्रसिद्धं
तत्र बाह्यमाभ्यंतरं चासुरेषु न विद्यते ॥ नापि चाचारः तद्बाह्याभ्यंतरशौचं येनाचारेण संध्यावंदना
दिं जायते सोपि न विद्यते ॥ यथोक्तं ॥ संध्याहीनोशुचिर्नित्यमिति ॥ तथा ॥ सत्यं च तेषु न विद्यते सत्यं
यथार्थज्ञानं भूतहितरूपभाषणं तेषु न विद्यते किंच ॥ ७ ॥ ॥ ॥

असत्यमिति॥ असत्यं जगदेतत्सच्छब्दनिर्दिष्टब्रह्मकार्यं तथा ब्रह्मात्मकमिति नाहुः॥ अप्रति
ष्ठं तथा ब्रह्मणि प्रतिष्ठितमिति न वदंति ब्रह्मणानंतेन धृता हि पृथिवी सर्वान् लोकान् बिभर्त्ति॥ तथो
क्तं॥ तेनेयमतिवीर्येण विधृता सकला मही॥ बिभर्त्ति मालां लोकानां सदेवासुरमानुषामिति॥ अनीश्व
रं सत्यसंकल्पेन परब्रह्मणा सर्वेश्वरेण मयैव नियमितं न वदंति॥ अहं सर्वस्य प्रभवो मत्तः सर्वं प्रव
र्त्तत इत्युक्तं॥ वदंति चैवं॥ अपरस्परसंभूतं किमन्यत॥ योषित्पुरुषयोः परस्परसंबंधेन जातमिदं म

॥ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं॥ अपरस्परसंभूतं किमन्यत्कामहेतुकं॥८॥
॥ एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः प्रभवंत्युग्रकर्माणः क्षयाय जगतोऽहिताः॥९॥

नुष्यपश्वाद्युपलभ्यते॥ अनेवंभूतं किमन्यदुपलभ्यते किंचिदपि नोपलभ्यत इत्यर्थः॥ अतः सर्वमि
दं जगत्कामहेतुकमिति॥८॥ एतामिति॥ एतां दृष्टिमवष्टभ्यावलंब्य नष्टात्मानः अदृष्टदेहातिरिक्ता
त्मानः अल्पबुद्धयः॥ घटवत् ज्ञेयस्थूलदेहे ज्ञातृत्वेन देहव्यतिरिक्तात्मोपलभ्यत इति विवेकाकुशा
लाः॥ उग्रकर्माणः सर्वेषां हिंसकाः जगतः क्षयाय प्रभवंति॥९॥ १३७॥

तिसंबंधः जगतोऽहिताः शत्रवः सन्तः

काममिति॥ दुःपूरं दुःखापविषयं काममाश्रित्य तत्साध्यविषयान्मोहादज्ञानात् असद्ग्राहान् अ
साधुगृहीतपरिग्रहान् गृहीत्वा अशुचिव्रताः अशास्त्रविहितव्रतयुक्ताः दंभमानमदान्विताः प्रव
र्त्तंते॥१०॥ चिंतेति॥ अद्य श्वो वा मुमूर्षवस्तां चिंतामपरिमेयां चापरिच्छेद्यां प्रलयांतां प्राकृतप्रलयावधि
कां तत्साध्यविषयामुपाश्रिताः॥ तथा॥ कामोपभोगपरमाः कामोपभोग एव परमः पुरुषार्थ इति मन्वा

॥ काममाश्रित्य दुःपूरं दंभमानमदान्विताः॥ मोहाद्गृहीत्वाऽसद्ग्राहान् प्रवर्त्तंतेऽशुचिव्रताः॥१०॥
॥ चिंतामपरिमेयां च प्रलयांतामुपाश्रिताः॥ कामोपभोगपरमा एतावदिति निश्चिताः॥११॥
॥ आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ईहंते कामभोगार्थमन्यायेनार्थसंचयान्॥१२॥

नाः॥ एतावदिति निश्चिताः इतोऽधिकः पुरुषार्थो न विद्यत इति संजातनिश्चयाः॥११॥ आशापाशेति
आशापाशशतैराशास्वपाशशतैर्बद्धाः कामक्रोधपरायणाः कामक्रोधैकनिष्ठाः कामभोगार्थ
मन्यायेनार्थसंचयान् ईहंते॥१२॥

॥ इदमिति ॥ क्षेत्रपुत्रादिकं सर्वं मया मत्सामर्थ्येन लब्धं नादृष्टादिना ॥ इमं च मनोरथमहमेव प्राप्स्ये नादृ
ष्टादिसहितः मत्सामर्थ्यजमिदं धनमस्ति ॥ इदमपि पुनर्मे मत्सामर्थ्येन भविष्यति ॥१३॥ असाविति ॥ अ
सौ मया बलवता हतः शत्रुः अपरानपि शत्रून् अहमीश्वरो धीरश्च हनिष्ये किमत्र मंदधीनिर्विवेकैः प
रिकल्पितेनादृष्टादिपरिकरेण ॥ तथा च ईश्वरोऽपीश्वरोऽहं स्वाधीनोऽहमन्येषां चाभिनियंता ॥ अहं

॥ इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथं इदमस्तीदमपि मे भविष्यति पुनर्धनं ॥१३॥ असौ मया ह ॥
॥ तः शत्रुर्हनिष्ये चापरानपि ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥१४॥ आढ्योऽभिजन ॥
॥ वानस्मि कोऽन्योऽस्ति सदृशो मया ॥ यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ॥१५॥ भोगी स्वत एव भो

गी नादृष्टादिभिः सिद्धोऽहं स्वतः सिद्धोऽहं न कदाचिददृष्टादेः ॥ तथा स्वत एव बलवान् स्वत एव सुखी
चास्मि ॥१४॥ आढ्य इति ॥ अहं स्वत आढ्यः अभिजनवानस्मि स्वत एवोत्तमकुले प्रसूतोऽस्मि ॥ अ
स्मिंल्लोके मया सदृशः कोऽन्यः स्वसामर्थ्यलब्धसर्वविभवो विद्यते अहं यक्ष्ये दास्यामि मोदिष्य इत्यज्ञा
नविमोहिताः ॥ ईश्वरानुग्रहनिरपेक्षेण स्वयमेव यागदानादिकं कर्तुं शक्यमित्यज्ञानविमोहिता मन्यंते ॥१५॥

॥ अनेकेति ॥ अदृष्टेश्वरादिसहकारमृते स्वेनैव कर्तुं शक्यमिति कृत्वा एवं कुर्यामेतच्च कुर्यामन्यच्च कु
र्यामित्यनेकचित्तविभ्रांता अनेकचित्ततया विभ्रांताः ॥ एवंरूपेण मोहजालेन समावृताः कामभोगे
षु प्रकर्षेण सक्ताः सन्तोऽशुचौ नरके पतंति ॥१६॥ आत्मेति ॥ आत्मनैव संभाविताः आत्मने
वात्मानं संभावयंत इत्यर्थः स्तब्धाः परिपूर्णमन्याः नाम्रकिंचित्कुर्वाणाः कथं धनमानमदान्विताः
धनेन विद्याभिजनाभिमानेन च जनितमदान्विताः ॥ नामयज्ञैर्नाममात्रयोजनैर्यष्टेति नाममात्र प्रयोजनैर्य

॥ अनेकचित्तविभ्रांता मोहजालसमावृताः ॥ प्रसक्ताः कामभोगेषु पतंति नरकेऽशुचौ ॥१६॥
॥ आत्मसंभाविताः स्तब्धा धनमानमदान्विताः ॥ यजंते नामयज्ञैस्ते दंभेनाविधिपूर्वकं ॥१७॥

ज्ञैः यजंते ते च दंभेन न तु श्रद्धया पताकाख्यापनाय अविधिपूर्वकं यथोदितं यजंते ॥ ते चेदृक्भूता यजंत इत्याह
॥ अहंकारमिति ॥ अनन्यापेक्षोऽहमेव सर्वं करोमीत्येवंरूपमहंकारमाश्रिताः ॥ तथा सर्वस्य क
रणे मह्यमेव पर्याप्तमिति च बलं ॥ अतो मत्सदृशो न कश्चिदस्तीति दर्पं च संश्रिताः ॥ एवंभूतस्य मम का
ममात्रेण सर्वं संपत्स्यत इति कामं ॥ मम ये अनिष्टकरास्तान्सर्वान्हनिष्यामीति च क्रोधं ॥ एवमेतान्संश्रि

॥श्री·भा०॥

॥१३७॥

अ·१६॥

ताः स्वदेहेषु परदेहेषु चावस्थितं सर्वस्य कारयितारं पुरुषोत्तमं मां अभ्यसूयकाः प्रद्विषन्तः कुहेतुभिः
मम स्थितौ दोषमाविष्कुर्वन्तो माम सहमानाः अहंकाराद्यासुरीकान्संश्रिता यागादिकं सर्वं क्रियाजातं
कुर्वत इत्यर्थः ॥१८॥ तानिति ॥ एवं मां ये द्विषन्ति तान् क्रूरान्नराधमानशुभानजस्रं संसारेषु जन्मज
रामरणादिरूपेण परिवर्तमानेषु संतानेषु तत्राप्यासुरीष्वेव योनिषु क्षिपामि मदानुकूल्यप्रत्यनीकेषु

॥ अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ॥ मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ॥१८॥
॥ तानहं द्विषतः क्रूरान् संसारेषु नराधमान ॥ क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१९॥
॥ आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ॥ मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिं ॥२०॥

योनिषु क्षिपामि तत्तज्जन्मप्राप्त्यनुगुणप्रवृत्तिहेतुभूतबुद्धिषु क्रूरेष्वहमेव संयोजयामीत्यर्थः ॥१९॥ आ
सुरीमिति ॥ मदानुकूल्यप्रत्यनीकजन्मापन्नाः पुनरपि जन्मनि मूढाः मद्विपरीतज्ञानेन मा
मप्राप्यैवास्ति भगवान्वासुदेवः सर्वेश्वर इति ज्ञानमप्राप्य ततस्ततो जन्मनोऽधमामेव गतिं यान्ति ॥२०॥ ॥१३७॥

॥ अस्यासुरस्वभावस्यात्मनाशस्य मूलहेतुमाह ॥ त्रिविधमिति ॥ अस्यासुरस्वभावरूपस्य नरकस्यैत
त्त्रिविधं द्वारं तच्चात्मनो नाशनं कामः क्रोधो लोभ इति ॥ त्रयाणां स्वरूपं पूर्वमेव व्याख्यातं द्वारं मार्गो हेतु
रित्यर्थः तस्मादेतत्त्रयं त्यजेत् तस्मादतिघोरनरकहेतुत्वात् कामक्रोधलोभानां एतत्त्रितयं दूरतः
परित्यजेत् ॥२१॥ एतैरिति ॥ एतैः कामक्रोधलोभै[illegible]स्तमोद्वारैर्मद्विपरीतज्ञानहेतुभिर्विमुक्तो नर आत्म
नः श्रेय आचरति ॥ लब्धमद्विषयज्ञानो मदानुकूल्येन प्रवर्तते ततो मामेव परां गतिं याति शास्त्रानादरो ॥२२॥

॥ त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ॥ कामः क्रोधः तथा लोभस्तस्मादेतत्त्रयं त्यजेत ॥२१॥
॥ एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ॥ आचरत्यात्मनः श्रेयस्ततो याति परां गतिं ॥२२॥
॥ यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ॥ न स सिद्धिमवाप्नोति न सुखं न परां गतिं ॥२३॥

नरकस्य प्रधानहेतुरित्याह ॥ यः ॥ इति ॥ शास्त्रं वेदाख्यं विधिरनुशासनं वेदाख्यं मदनुशासनमुत्सृज्य
यः कामकारतो वर्तते स्वच्छन्दानुगुणमार्गेषु वर्तते ॥ न स सिद्धिमवाप्नोति न कामप्यामुष्मिकीं सिद्धिमवा
प्नोति ॥ ऐहिकमपि न सुखं किंचिदाप्नोति कुतः परां गतिं प्राप्नोतीत्यर्थः ॥२३॥

॥गी॰भा॰ ॥तस्मादिति॥ तस्मात्कार्याकार्यव्यवस्थितौ उपादेयानुपादेयव्यवस्थायां तव शास्त्रमेव प्रमाणं॥ धर्म- अ॰१७॥
॥१४०॥ शास्त्रेतिहासपुराणोपबृंहिता वेदा यद्वेद्यपुरुषोत्तमाख्यं परं तत्त्वं तत्प्रीणनरूपं तत्प्राप्त्युपायभूतं च
[illegible] कर्मावबोधयंति॥ तच्छास्त्रविधानोक्तं तत्त्वं कर्म च ज्ञात्वा कर्तुमर्हसि न देवोपादातुमर्हसि॥ देवा-
सुरविभागोक्तिपूर्विका शास्त्रवश्यता॥ तत्त्वानुष्ठानविज्ञानस्थेम्ने षोडश उच्यते॥२४॥ इतिश्री[illegible]

॥ तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ॥ ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि
॥२४॥ इतिश्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे देवासुरसं-
॥ पद्विभागो नाम षोडशोऽध्यायः॥ १६ ॥

मानुजाचार्यविरचिते गीताभाष्ये षोडशोऽध्यायः॥१६॥ दैवासुरविभागोक्तिमुखेन प्राप्यतत्त्वज्ञानं
तत्प्राप्त्युपायज्ञानं च वेदैकमूलमित्युक्तं इदानीमशास्त्रविहितस्यासुरत्वेनाफलत्वं शास्त्रविहितस्य
गुणतस्त्रैविध्यं तस्य लक्षणं चोच्यते॥ तत्राशास्त्रविहितस्य निःफलत्वमजानन् शास्त्रविहिते श्रद्धासं-
युक्ते यागादौ सत्त्वादिनिमित्तफलभेदं बुभुत्सया अर्जुनः पृच्छति॥ १४०॥

अर्जुन उवाच॥ ये तु शास्त्रविधिमुत्सृज्य श्रद्धयान्विता यजंते तेषां निष्ठा का किं सत्त्वमाहोस्वित् रजः
अथ तमः। निष्ठा स्थितिः स्थीयते अस्मिन्निति स्थितिः सत्त्वादिरेव निष्ठेत्युच्यते॥ तेषां किं सत्त्वे स्थितिः
किं वा रजसि किं वा तमसीत्यर्थः॥१॥ एवं पृष्टः॥ श्रीभगवानुवाच॥ अशास्त्रविहितश्रद्धायास्त-
त्पूर्वकस्य च यागादेर्निःफलत्वं हृदि निधाय शास्त्रीयस्य च यागादेर्गुणतस्त्रैविध्यं प्रतिपादयितुं शा-
स्त्रीयश्रद्धायास्त्रैविध्यं तावदाह॥ त्रिविधेति॥ सर्वेषां देहिनां श्रद्धा त्रिविधा भवति सा च स्वभावजा स्वभावः

अर्जुन उवाच॥ ये शास्त्रविधिमुत्सृज्य यजंते श्रद्धयान्विताः॥ तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः॥१
भगवानुवाच॥ त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा॥ सात्त्विकी राजसी चैव तामसी चेति तां शृणु॥

स्वासाधारणो भावः प्राचीनवासनानिमित्तस्तत्तद्रुचिविशेषः यत्र रुचिस्तत्र श्रद्धा जायते श्रद्धा हि
स्वाभिमतं साधयत्येतदिति विश्वासः तत्पूर्विका साधने त्वरा वासना रुचिश्च श्रद्धा चात्मधर्माः गुण-
संसर्गजास्तेषामात्मधर्माणां वासनादीनां जनकाः देहेंद्रियांतःकरणविषयगता धर्माः कार्यैकनिरू-
पणीयाः सत्त्वादयो गुणाः सत्त्वादियुक्तदेहानुभवजस्य र्थः ततश्चैवं श्रद्धा सात्त्विकी राजसी तामसी चेति

॥ गी॰भा॰ त्रिविधानामिमां श्रद्धां शृणु ॥ सा श्रद्धा च स्वभावानुस्वभावं शृण्वित्यर्थः ॥२॥ सत्वेति ॥ सत्वमंतःकरणं अ॰१७॥
॥१५१॥ सर्वस्य पुरुषस्यांतःकरणानुरूपा श्रद्धा भवति ॥ अंतःकरणे यादृशगुणयुक्तं तद्विषया श्रद्धा जायत इत्य
र्थः ॥ सत्वशब्दः पूर्वोक्तानां देहेंद्रियादीनां प्रदर्शनार्थः ॥ श्रद्धामयोयं पुरुषः श्रद्धापरिणामः यो यच्छ्रद्धः
पुरुषो यादृश्या श्रद्धया युक्तः स एव सः स तादृशश्रद्धापरिणामः पुण्यकर्मविशेषश्रद्धायुक्तश्चेत्तत्पुण्य
कर्मफलसंयुक्तो भवतीति श्रद्धाप्रधानः फलसंयोग इत्युक्तं भवतीति ॥ तदेव विवृणोति ॥ ॥ सत्वगुणप्र

॥ सत्वानुरूपा सर्वस्य श्रद्धा भवति भारत ॥ श्रद्धामयोयं पुरुषो यो यच्छ्रद्धः स एव सः ॥३॥ यजंते सा ॥
॥ त्विका देवान्यक्षरक्षांसि राजसाः ॥ प्रेतान्भूतगणांश्चान्ये यजंते तामसा जनाः ॥४॥ ॥

चुराः सात्विकी श्रद्धायुक्ता देवान्यजंते दुःखासंभिन्नोत्कृष्टसुखहेतुभूतदेवयागविषया श्रद्धा सात्वि
की इत्युक्तं भवति ॥ राजसा जना यक्षरक्षांसि यजंते ॥ अन्ये तामसा जनाः प्रेतान्भूतगणांश्च यजंते दुःखसं
भिन्नाल्पसुखजननी राजसी श्रद्धा दुःखप्रायात्यल्पसुखजननी तामसीत्यर्थः ॥ एवं शास्त्रीयेष्वेव या
गादिषु श्रद्धायुक्तेषु गुणतः फलविशेषः अशास्त्रीयेषु तपोयागप्रभृतिषु मदनुशासनविपरीतत्वे १५१॥
न न कश्चिदपि सुखलवः अपि त्वनर्थ एवेति हृदि निहितं व्यंजयन्नाह ॥ ॥ ॥ ॥

॥ अशास्त्रेति ॥ कर्षयंत इति ॥ अशास्त्रविहितमतिघोरमपि तपो ये जनास्तप्यंते ॥ प्रदर्शनार्थमिदं ॥ अ
शास्त्रविहितं बह्वायाससंयागादिकं ये कुर्वते ॥ दंभाहंकारसंयुक्ताः कामरागबलान्विताः ॥ शरीरस्थं पृ
थिव्यादिभूतं कर्षयंतो मदंशभूतं जीवं चांतःशरीरस्थं कर्षयंतो ये तप्यंते यागादिकं च कुर्वते ॥ तानासुर
निश्चयान्विद्धि ॥ असुराणां निश्चय आसुरनिश्चयः असुरा हि मदाज्ञाविपरीतकारिणः ॥ मदाज्ञावि

॥ अशास्त्रविहितं घोरं तप्यंते ये तपो जनाः ॥ दंभाहंकारसंयुक्ताः ॥
॥ कामरागबलान्विताः ॥५॥ कर्षयंतः शरीरस्थं भूतग्राममचेत ॥
॥ सः ॥ मां चैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥६॥ ॥

परीतकारित्वात्तेषां सुखलवसंबंधो न विद्यते अपि त्वनर्थप्रयत्नाः पतंतीति पूर्वमेवोक्तं ॥ पतंति नरके
शुचाविति ॥ अथ प्रकृतमेव शास्त्रीयेषु यागादिषु गुणतो विशेषं प्रपंचयति तत्राप्याहारमूलत्वात्सत्वादि
वृद्धेराहारत्रैविध्यं प्रथममुच्यते ॥ अन्नमयं हि सोम्य मनः आहारशुद्धौ सत्वशुद्धिरिति श्रूयते ॥ ॥ ॥

॥आहारस्त्विति॥आहारोपि सर्वस्य प्राणिजातस्य सत्वादिगुणान्वयेन त्रिविधः प्रियो भवति॥तथैव यज्ञो
पि त्रिविधस्तथा तपो दानं च तेषां भेदमिमं शृणु तेषामाहारयज्ञतपोदानानां सत्वादिभेदेन मुच्यमानं भेदं
शृणु॥७॥आयुरिति॥सत्वगुणोपेतस्य सत्वमया आहाराः प्रिया भवंति॥सत्वमयाश्चाहारा आयुर्विव
र्द्धनाः पुनरपि सत्वस्य विवर्द्धनाः सत्वमंतःकरणं अंतःकरणकार्यं ज्ञानमिह सत्वशब्देनोच्यते सत्वात्संजा

॥आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः॥यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु॥७॥
॥आयुःसत्वबलारोग्यसुखप्रीतिविवर्द्धनाः॥रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः॥८॥

यते ज्ञानमिति सत्वस्य ज्ञानविवृद्धिहेतुत्ववचनात्॥आहारोपि सत्वमयो ज्ञानविवृद्धिहेतुः॥तथा च
लारोग्ययोरपि विवर्द्धनाः सुखप्रीत्योरपि विवर्द्धनाः परिणामकाले स्वयमेव सुखस्य विवर्द्धनाः त
था प्रीतिहेतुभूतकर्मारंभद्वारेण प्रीतिविवर्द्धनाः रस्याः मधुररसोपेताः स्निग्धाः स्नेहयुक्ताः स्थिराः
स्थिरपरिणामाः हृद्याः रमणीयवेषाः एवंविधाः सत्वमया आहाराः सात्विकस्य पुरुषस्य प्रियाः॥८॥ ॥१४२॥

॥कट्विति॥कटुरसात्म्लरसाल्लवणोत्कटाच्चात्युष्णात्यतितीक्ष्णाः रूक्षा विदाहिनश्चेति अतितेरूष्णादिनात
न्वयोगेन तीक्ष्णाः शोषकराः रूक्षास्तापकराः विदाहिनः दाहकराः एवंविधा आहारा राजसस्येष्टास्ते च र
जोमयत्वात् दुःखशोकामयवर्द्धना रजोवर्द्धनाश्च॥९॥यातयाममिति॥यातयामं चिरकालावस्थितं गतरसं
त्यक्तस्वाभाविकरसं पूतिदुर्गंधोपेतं पर्युषितं कालांतरापन्नरसांतरापन्नं उच्छिष्टं गुर्वादिभोज्यं भुक्त

कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः॥आहारा राजसस्येष्टा दुःखशोकामयप्रदाः॥९॥यातयामं गतरसं पूतिपर्युषि
तं च यत् उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियं॥१०॥अफलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते यष्टव्यमेवेति मनः समाधाय
स सात्विकः॥११॥अभिसंधाय तु फलं दंभार्थमपि चैव यत् इज्यते भरतश्रेष्ठ तं यज्ञं विद्धि राजसं॥१२॥ उच्छिष्टं अमेध्यमयज्ञार्हं
यज्ञाशिष्टमित्यर्थः एवंविधं तमोमयं भोजनं तामसप्रियं भवति भुज्यतइत्याहार एव भोजनं पुनस्तत्तमसो वर्द्धनं च
तो हितैषिभिः सत्वहृद्ध्येसात्विकाहारः सेव्यः॥१०॥अफलेति॥फलाकांक्षारहितैः पुरुषैः विधिदृष्टः शास्त्रदृ
ष्टमंत्रद्रव्यक्रियादिभिर्युक्तः यष्टव्यमेवेति भगवदाराधनत्वेन स्वप्रयोजनतयावश्यमिति मनः समाधाय यो
यज्ञ इज्यते स सात्विकः॥११॥फलाभिसंधियुक्तः दंभगर्भयशोर्थफलजश्च यो यज्ञ इज्यते तं यज्ञं राजसं विद्धि॥१२॥

अभिसंधायेति

॥ गी॰ भा॰ ॥
॥ १४३ ॥

॥ विधीति ॥ विधिहीनं ब्राह्मणोक्तविधिहीनं सदाचारयुक्तैर्विद्वद्भिर्ब्राह्मणैर्यज्ञस्तेषु कृतिहीनमित्यर्थः ॥ असृ अ॰ १७ ॥
ष्टान्नं अचोदितद्रव्यं ॥ मंत्रहीनमदक्षिणं श्रद्धाविरहितं च यज्ञं तामसं परिचक्षते ॥ १३ ॥ अथ तपसो गुण
तस्त्रैविध्यं वक्तुं तस्य शारीरवाङ्मनोभिर्निष्पाद्यतया तत्स्वरूपभेदं तावदाह ॥ देवेति ॥ देवद्विजगुरुप्रा
ज्ञानां पूजनं शौचं तीर्थस्नानादिकं आर्जवं यथावाङ्मनः शारीरत्वं ब्रह्मचर्यं योषित्संभोगतायुक्तेक्षण

॥ विधिहीनमसृष्टान्नं मंत्रहीनमदक्षिणं ॥ श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥ १३ ॥ देवद्विजगुरुप्राज्ञपूजनं शौ ॥
॥ चमार्जवं ॥ ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥ १४ ॥ अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ॥ स्वाध्यायाभ्य ॥
॥ सनं चैव वाङ्मयं तप उच्यते ॥ १५ ॥ मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ॥ भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥ १६ ॥

रहितत्वं ॥ अहिंसा प्राणिपीडावर्जनं ॥ एतच्छारीरं तप उच्यते ॥ १४ ॥ अनुद्वेगेति परेषामनुद्वेगकरं सत्यं प्रियं
हितं च वाक्यं स्वाध्यायाभ्यसनं चेत्येतद्वाङ्मयं तपः ॥ १५ ॥ मन इति ॥ मनः प्रसादः मनसः क्रोधादिरहितत्वं सौम्य
त्वं मनसः परेषामभ्युदय एव भावत्वं मौनं मनसो वाक्प्रवृत्तिनियमनं ॥ आत्मविनिग्रहः मनोवृत्तेर्ध्येयवि
षये स्थापनं ॥ भावसंशुद्धिरात्मव्यतिरिक्तविषयचिंतारहितत्वमेतन्मानसं तपः ॥ १६ ॥ १४३ ॥

श्रद्धयेति ॥ अफलाकांक्षिभिः फलाकांक्षारहितैः युक्तैः परमपुरुषाराधनरूपमिदमिति चिंतायुक्तैर्नरैः
श्रद्धया परया यत्त्रिविधं तपः कायवाङ्मनोभिस्तप्तं तत्सात्विकं परिचक्षते ॥ १७ ॥ सत्कारेति ॥ मनसा आदरः स
त्कारः वाचा प्रशंसा मानः शारीरेण नमस्कारादिर्हि पूजा फलाभिसंधिपूर्वकं सत्काराद्यर्थं च दंभेन हेतुना
यत्तपः क्रियते तदिह राजसं प्रोक्तं स्वर्गादिफलत्वेनास्थिरत्वाच्चलमध्रुवं चं चलत्वापातभयेन चलनहेतु
आसमंतात्सततनजलेन

॥ श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ॥ अफलाकांक्षिभिर्युक्तैः सात्विकं परिचक्षते ॥ १७ ॥ सत्कारमान ॥
॥ पूजार्थं तपो दंभेन चैव यत् क्रियते तदिह प्रोक्तं राजसं चलमध्रुवं ॥ १८ ॥ मूढग्राहेणात्मनो यत्पीडया ॥
॥ क्रियते तपः ॥ परस्योत्सादनार्थं वा तत्तामसमुदाहृतं ॥ १९ ॥ दातव्यमिति यद्दानं दीयतेऽनुपकारि ॥
॥ णे ॥ देशे काले च पात्रे च तद्दानं सात्विकं स्मृतं ॥ २० ॥

त्वात् अध्रुवं क्षयिष्णुत्वात् ॥ १८ ॥ मूढेति ॥ मूढा अविवेकिनः मूढग्राहेण मूढैः कृतेनाभिनिवेशेन आत्मनः शास्त्रा
दिकमपरीक्ष्यात्मपीडया यत्तपः क्रियते परस्योत्सादनार्थं च यत्क्रियते तत्तामसमुदाहृतं ॥ १९ ॥ दातव्यमिति ॥
फलाभिसंधिरहितं दातव्यमिति देशे काले पात्रे चानुपकारिणे यद्दानं दीयते तद्दानं सात्विकं स्मृतं ॥ २० ॥

॥ गी॰ भा॰ ॥ यदिति ॥ यत्तु उपकारकस्य गर्भे फलमुद्दिश्य च परिक्लिष्टं खेदयुक्तं गोदानादिकं यद्दीयते तद्राजसमुदाहृतं अ॰ १७॥
॥१५४॥ २१॥ अदेशकालइति ॥ अदेशेऽकाले अपात्रेभ्यश्च यद्दानं दीयते असत्कृतं पादप्रक्षालनादिगौरवरहितमवज्ञा
॥२२॥ तं सावज्ञं च यद्दीयते तत्तामसमुदाहृतं ॥ एवं वैदिकानां यज्ञतपोदानानां सत्त्वादिगुणभेदेन भेदमुक्त्वा इदानीं
तस्य वैदिकस्य यागादेः प्रणवसंयोगेन तच्छब्दसच्छब्दव्यपदेश्यतया च लक्षणमुच्यते ॥२२॥ ओमिति ॐ तत्स
दिति त्रिविधोऽयं निर्देशः शब्दः ब्रह्मणः स्मृतः ब्रह्मणोऽन्वयी भवति ॥ ब्रह्म च वेदः ॥ वेदशब्देन वैदिकं कर्म चो
ब्रह्मणस्सकाशान्वयी भवतीत्यर्थः
यत्तु प्रत्युपकारार्थं फलमुद्दिश्य वा पुनः ॥ दीयते च परिक्लिष्टं तद्राजसमुदाहृतं ॥२१॥ अदेशकाले यद्दान
मपात्रेभ्यश्च दीयते ॥ असत्कृतमवज्ञातं तत्तामसमुदाहृतं ॥२२॥ ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः
स्मृतः ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ॥२३॥ अतो ॥ वैदिकं यज्ञादिकं कर्म ॐ तत्सदिति शब्दान्वितं
भवति ॥ ओमिति शब्दस्यान्वयो वैदिककर्माङ्गत्वेन प्रयोगादौ प्रयुज्यमानतया तत्सदिति शब्दयोरन्वयः प्रश रामः
स्तावाचकतया तेन त्रिविधशब्देनान्विता ब्राह्मणा वेदान्वयिनस्त्रैवर्णिका वेदाश्च यज्ञाश्च विहिताः पु
रामयैव निर्मिता इत्यर्थः ॥ त्रयाणां ॐ तत्सदिति शब्दानामन्वयप्रकारो वर्ण्यते ॥ प्रथममोमिति शब्दस्यान्वयप्र १५४॥
॥२३॥

तस्मादोमिति ॥ तस्माद्ब्रह्मवादिनां वेदवादिनां त्रैवर्णिकानां यज्ञदानतपः क्रियाः विधानोक्ताः वेदो
क्तास्सदा ओमित्युदाहृत्य सततं सर्वदा प्रवर्तन्ते ॥ वेदाश्चोमित्युदाहृत्यारभ्यन्ते एवं वेदानां वैदिकानां च यज्ञा
दीनां कर्मणामोमिति शब्दान्वयो वर्णितः ॥ ओमिति शब्दान्वितवेदधारणात् तदन्वितयज्ञादिकर्मकरणा
च्च ब्राह्मणशब्दनिर्दिष्टानां त्रैवर्णिकानामप्योमिति शब्दान्वयो वर्णितः ॥२४॥ अथैतेषां तदिति शब्दान्वय
प्रकारमाह ॥ तदिति ॥ फलमनभिसंधाय वेदाध्ययनयज्ञतपोदानक्रियाः मोक्षकाङ्क्षिभिः त्रैवर्णिकैः याः

॥ तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनां ॥२४॥ तदित्यन
भिसंधाय फलं यज्ञतपःक्रियाः दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः २५

क्रियन्ते ता ब्रह्मप्राप्युपा
यतया ब्रह्मवाचिना तदिति शब्देन निर्देश्याः स च कः किं यत्तदनुत्तममिति तच्छब्दो ब्रह्मवाची प्रसिद्धः
एवं वेदाध्ययनयज्ञादीनां मोक्षसाधनभूतानां तच्छब्दनिर्देश्यतया तदिति शब्दान्वय उक्तः त्रैवर्णिका
णामपि तथाविधवेदाध्ययनाद्यनुष्ठानादेव तच्छब्दान्वय उपपन्नः ॥२५॥ अथैषां सच्छब्दान्वयप्रकारं
वक्तुं लोके सच्छब्दव्युत्पत्तिप्रकारमाह ॥ ॥ ॥

॥सदिति॥ सद्भावे विद्यमानतायां साधुभावे कल्याणभावे सर्ववस्तुषु सदित्येतत्पदं प्रयुज्यते लोकवेदयोः
तथा येन केनचित्पुरुषेणाधिष्ठिते लौकिके प्रशस्ते कल्याणे कर्मणि सत्कर्मेदमिति सच्छब्दो युज्यते प्रयु
ज्यत इत्यर्थः ॥२६॥ यज्ञ इति ॥ अतो वैदिकानां त्रैवर्णिकानां यज्ञे तपसि दाने च स्थितिः कल्याणतया सदि
त्युच्यते ॥ कर्म च तदर्थीयं त्रैवर्णिकार्थीयं त्रैवर्णिकाभ्यर्हितं यज्ञदानादिकं सदित्येवाभिधीयते ॥ तस्माद्वेद

॥ सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ॥ प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ॥२६॥
॥ यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ॥ कर्म चैव तदर्थीयं सदित्येवाभिधीयते ॥२७॥
॥ अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ॥ असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ॥२८॥

वैदिकानि कर्माणि ब्राह्मणशब्दनिर्दिष्टानां त्रैवर्णिकानां च ओं तत्सदिति शब्दान्वयलक्षणेनावेदेभ्यश्चावैदि
केभ्यश्च व्यावृत्तानीति वेदितव्यानि ॥२७॥ अश्रद्धयेति ॥ अश्रद्धया कृतं दत्तं तपश्चरितं तप्तं यत्कृतं शास्त्रीयमपि होमा
दिकं असदित्युच्यते कुतः न तत्प्रेत्य नो इह न मोक्षाय सांसारिकाय फलाय च ॥२८॥ अशास्त्रमासु
रं कृत्स्नं शास्त्रीयं गुणतः पृथक् ॥ लक्षणं शास्त्रसिद्धस्य त्रिधा सप्तदशोदितं ॥१७॥ १४५॥

अतीतेनाध्यायद्वयेन अभ्युदयनिःश्रेयससाधनभूतं वैदिकमेव यज्ञतपोदानादिकं कर्म नान्यत् वैदिक
स्य कर्मणो सामान्यलक्षणेन प्रणवान्वयः तत्र मोक्षाभ्युदयसाधनयोर्भेदस्तत्सच्छब्दनिर्देश्यत्वे
न मोक्षसाधनं च कर्म फलाभिसंधिरहितं यज्ञादिकं तदारंभश्च सत्त्वोद्रेकाद्भवति ॥ सत्त्ववृद्धिश्च सात्त्वि
काहारसेवयेत्युक्तं अनंतरं मोक्षसाधनतया निर्दिष्टयोस्त्यागसंन्यासयोरैक्यं त्यागस्य च स्वरूपं भगवति
सर्वेश्वरे च सर्वकर्मणां कर्तृत्वानुसंधानं सत्त्वरजस्तमसां कार्यवर्णनेन सत्त्वगुणस्य वश्योपादेयत्वं स्ववर्णो

॥ इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे गुणविभागो नाम सप्तदशोऽध्या
यः॥ अर्जुन उवाच ॥ संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुं त्यागस्य च हृषीकेश पृथक्केशिनिषूदन ॥१॥

चितानां कर्मणां परमपुरुषाराधनभूतानां परमपुरुषप्राप्तिनिर्वर्तनप्रकारः ॥ कृत्स्नस्य गीताशास्त्रस्य सा
रार्थो भक्तियोग इत्येते प्रतिपाद्यंते ॥ तत्र तावत्त्यागसंन्यासयोः पृथक्त्वैकत्वेन स्वरूपनिर्णयायार्जुनः पृ
च्छति ॥ अर्जुन उवाच ॥ संन्यासस्येति ॥ त्यागसंन्यासौ हि मोक्षसाधनतया विहितौ ॥ न कर्मणा न प्रजया ध
नेन त्यागेनैके अमृतत्वमानशुः ॥ वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलो

केषुपशांतकाजेपराभूताः परिमुच्यंतिसर्वेइत्यादिषुसंन्यासस्यत्यागस्यचतत्त्वंयाथात्म्यंपृथक्वेदितुमिच्छामि॥अय
मभिप्रायः॥किमेतौसंन्यासत्यागशब्दौपृथगर्थौउतएकार्थौयदापृथगर्थौतदापृथक्त्वेनस्वरूपंवेदितुमिच्छामिए
कत्वेपितस्यस्वरूपंवक्तव्यमिति॥१॥अथानयोरेकमेवस्वरूपंनचपृथक्त्वमितिनिर्णेतुंवादिविप्रतिपत्तिंदर्शयन्॥
श्रीभगवानुवाचकेचनविद्वांसःकाम्यानांकर्मणांन्यासंस्वरूपत्यागंसंन्यासंविदुःकेचिद्विचक्षणानित्यानांनैमित्ति
कानांकाम्यानांचकर्मणांफलत्यागएवमोक्षशास्त्रेषुत्यागशब्दार्थइतिप्राहुः॥नचशास्त्रीयत्यागःकाम्यकर्मस्व

श्रीभगवानुवाच॥काम्यानांकर्मणांन्यासंसंन्यासंकवयोविदुः॥सर्वकर्मफलत्यागंप्राहुस्त्यागंविचक्षणाः॥२॥
त्याज्यंदोषवदित्येकेकर्मप्राहुर्मनीषिणः॥यज्ञदानतपःकर्मनत्याज्यमितिचापरे॥३॥
प्रविषयःसर्वकर्मफलविपर्यय
तिरेवादपदर्शयन्नत्रसंन्यासशब्दमितरत्रत्यागशब्दंप्रयुक्तवान्॥अतस्त्यागसंन्यासशब्दयोरेकार्थत्वात्पृथ
क्त्वंइतिनज्ञायते॥तथानिश्चयंशृणुमेतत्रत्यागेभरतसत्तमेति॥त्यागशब्देनैवनिर्णयवचनात्तन्निपतस्यतुसंन्यासःक
र्मणोनोपपद्यते॥मोहात्तस्यपरित्यागस्तामसःपरिकीर्तितः॥अनिष्टमिष्टंमिश्रंचत्रिविधंकर्मणःफलंभवत्यत्यागिनां
प्रेत्यनतुसंन्यासिनांक्वचिदितिचपरस्परपर्यायतादर्शनाच्चतयोरेकत्वंप्रतीयतइतिनिश्चीयते॥२॥त्याज्यमिति॥एकेम
नीषिणःकापिलकाद्यस्तन्मतानुसारिणश्चरागादिदोषानुबंधकत्वात्सर्वंयज्ञादिकंकर्ममुमुक्षुणात्याज्यमितिप्रा

निश्चयमिति॥तत्रैवंवादिविप्रतिपन्नेत्यागेत्यागविषयंनिश्चयंममतःशृणुहेपुरुषव्याघ्रत्यागःक्रिय
माणेषुकर्मसुवैदिकेषुफलविषयतयाकर्तृत्वविषयतयाममताविषयतयाचपूर्वमेवमयात्रिविधःसं
प्रकीर्तितः॥मयिसर्वाणिकर्माणीतिकर्मजन्यंस्वर्गादिकंफलंममनस्यादितिफलत्यागःफलविषयत्यागः
मदीयफलसाधनतयामदीयमिदंकर्मेतिकर्मणिममतायाःपरित्यागोममताविषयत्यागःसर्वेश्वरेकर्तृ
त्वानुसंधानेनात्मनःकर्तृतायाःत्यागःकर्तृत्वविषयत्यागः॥४॥यज्ञेति॥यज्ञदानतपःप्रभृतिवैदिकंकर्ममुमु

निश्चयंशृणुमेतत्रत्यागेभरतसत्तम॥त्यागोहिपुरुषव्याघ्रत्रिविधःसंप्रकीर्तितः॥४॥यज्ञदानतपःकर्मन
त्याज्यंकार्यमेवतत्॥यज्ञोदानंतपश्चैवपावनानिमनीषिणां॥५॥
क्षुणाकदाचिदपिनत्याज्यंअपितुप्रया
णादहरहःकार्यमेवकुतःयज्ञदानतपःप्रभृतीनिवर्णाश्रमसंबंधीनिकर्माणिमनीषिणांमननशीला
नांपावनानिमननंउपासनंमुमुक्षूणांयज्ञदानतपःप्रभृतीनिप्रावज्जीवंउपासनंकुर्वतामुपासननिष्प
त्तिविरोधिप्राचीनकर्मविनाशनानीति॥५॥एतानीति॥यस्मान्मनीषिणांयज्ञदानतपःप्रभृतीनिपावनानि
तस्मादुपासनवदेतान्यपियज्ञादीनिकर्माणिमदाराधनरूपाणिसंगंकर्मणिममतांफलानिचत्यक्त्वा

॥ १४६॥

नि

क्रियते स त्यागः सात्त्विको मतः सत्त्वमूलः यथावस्थितशास्त्रार्थज्ञानमूलः इत्यर्थः ॥ सत्त्वं यथावस्थि
तज्ञानं तदुत्पादयतीत्युक्तं ॥ सत्त्वात्संजायते ज्ञानमिति ॥ वक्ष्यते च ॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभ
ये बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकीति ॥ ९ ॥ न द्वेष्टीति ॥ एवं सत्त्वसमाविष्टो मेधावी यथावस्थित
तत्त्वज्ञानः सत्त एव छिन्नसंशयः कर्मणि संगफलकर्तृत्वत्यागी न द्वेष्ट्यकुशलं कर्म कुशले च कर्मणि नानु
षज्जते ॥ अकुशलं कर्मानिष्टफलं कुशलं च कर्म इष्टरूपं स्वर्गपुत्रपश्वन्नाद्यादिफलं सर्वस्मिन्कर्मणि म

॥ कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ॥ संगं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः ॥ ९ ॥
॥ न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ॥ त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥ १० ॥

मतारहितत्वात्सत्त्वस्य त्यक्तकरिक्तसर्वफलत्वात्त्यक्तकर्तृत्वाच्च तयोः क्रियमाणयोः प्रीतिद्वेषौ न क
रोति ॥ अनिष्टं निष्फलं पापं कर्मात्र पापमादिकमभिप्रेतं ॥ नाविरतो दुश्चरितान्नाशांतो नासमाहितः ॥ नाशांत ॥१०॥
मनसो वापि प्रज्ञानेनैनमाप्नुयादिति । दुश्चरिताविरतेर्ज्ञानोत्पत्तिविरोधित्वश्रवणात् ॥ अतः कर्मणि
कर्तृत्वसंगफलानां त्यागः शास्त्रीयस्त्यागो न कर्मस्वरूपत्यागस्तदाह ॥ ॥ १४८॥

॥ न हीति ॥ न हि देहभृता ध्रियमाणशरीरेण कर्माण्यशेषतस्त्यक्तुं शक्यं देहधारणार्थानामशनपाना
दीनां तदनुबंधानां च कर्मणामवर्जनीयत्वात्तदर्थं च महायज्ञाद्यनुष्ठानमवर्जनीयं ॥ यस्तु तेषु महाय
ज्ञादिकर्मसु फलत्यागी स एव त्यागेनैके अमृतत्वमानशुरित्यादिशास्त्रेषु त्यागीत्यभिधीयते ॥ फलत्या
गीति प्रदर्शनार्थः ॥ फलकर्तृत्वकर्मसंगानां त्यागी त्रिविधः संप्रकीर्तित इति प्रक्रमात् ॥ ननु कर्माण्य ॥११॥

॥ न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ॥
॥ यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥ ११ ॥

ग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनि महायज्ञादीनि च स्वर्गादिफलसंबंधितया शास्त्रैर्विधीयंते
नियतनैमित्तिकानामपि प्राजापत्यं गृहस्थानामित्यादिफलसंबंधितया विधानं ॥ अतस्तत्फलसाधनस्व
भावतयावगतानां कर्मणामनुष्ठाने बीजावापादीनामिवानभिसंहितफलस्यापीष्टानिष्टरूपफल
संबंधोऽवर्जनीयः ॥ अंशो मोक्षविरोधिफलत्वेन मुमुक्षुणा न कर्मानुष्ठेयमित्यत उत्तरमाह ॥ ॥

॥अनिष्टमिति॥ अनिष्टं नरकादिफलं इष्टं स्वर्गादिफलं मिश्रं संमिश्रं पुत्रपश्वन्नाद्यादि एवं त्रिविधं क
र्मणः फलमत्यागिनां कर्तृत्वममताफलत्यागरहितानां प्रेत्य भवति प्रेत्य कर्मानुष्ठानोत्तरकालमित्यर्थः
न तु संन्यासीनां क्वचित् न तु कर्तृत्वादिपरित्यागिनां क्वचिदपि मोक्षविरोधिफलं भवति ॥ एतदुक्तं भवति
यद्यप्यग्निहोत्रयज्ञादीनि नित्यान्येव तथापि जीवनाधिकारकामाधिकारयोरिव मोक्षाधिकारे च विनियोगपृ
थक्त्वेन परिहीयंते ॥ मोक्षविनियोगश्च तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशके

॥ अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलं॥ भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित॥१२॥

नेमाशिनिरिति॥ तदेवं क्रियमाणेष्वेव कर्मसु कर्तृत्वादिपरित्यागः शास्त्रसिद्धः संन्यासः स एव च त्याग इ
त्युक्तं॥ इदानीं भगवति पुरुषोत्तमे अंतर्यामिणि कर्तृत्वानुसंधानेनात्मन्यकर्तृत्वानुसंधानप्रकारमाह॥ तत
एव फलकर्मणोरपि ममतापरित्यागो भवतीति परमपुरुषो हि स्वकीयेन जीवात्मना स्वकीयैश्च करणक
लेवरप्राणैः स्वलीलादिप्रयोजनाय कर्माण्यारभते॥ अतो जीवात्मगतं क्षुन्निवृत्त्यादिकर्मफलं तत्साध
नभूतं च कर्म परमपुरुषस्यैव॥ ॥ ॥ २४९॥

॥पंचेति॥ सांख्यबुद्धिः सांख्ये कृतांते यथावस्थितविषयया वैदिक्या बुद्ध्यानुसंहितनिर्णये सर्वकर्मणां सि
द्धये प्रोक्तानि पंचेमानि कारणानि तानि निबोध मे मत्सकाशात् अनुसंधत्स्व वैदिकी हि बुद्धिः शरीरेंद्रिय
प्राणजीवात्मोपकरणं परमात्मानमेव कर्तारमवधारयति॥ य आत्मनि तिष्ठन्नात्मनोंतरो यमात्मा न वेद
यस्यात्मा शरीरं य आत्मानमंतरो यमयति स त आत्मांतर्याम्यमृतः अंतः प्रविष्टः शास्ता जनानां सर्वा
त्मेत्यादिषु॥ तदिदमाह॥ ॥ अधिष्ठानमिति॥ शरीरवाङ्मनोभिरिति॥ न्याय्ये शास्त्रसिद्धे विपरीते प्रति
॥१३॥

॥ पंचैतानि महाबाहो कारणानि निबोध मे॥ सांख्ये कृतांते प्रोक्तानि सिद्धये सर्वकर्मणां॥१३॥

षिद्धे वा सर्वस्मिन् कर्मणि शारीरे वाचिके मानसे च पंचैते हेतवः अधिष्ठानं शरीरं अधिष्ठीयते जीवा
त्मनेति महाभूतसंघातः शरीरमधिष्ठानं॥ तथा कर्ता जीवात्मा॥ अस्य जीवात्मनो ज्ञातृत्वं कर्तृत्वं च ज्ञो
त एव कर्ता शास्त्रार्थवत्वादिति च सूत्रेषूपपादितं॥ करणं च पृथग्विधं वाक्पाणिपादादिपंचकं समनस्कं
कर्मेंद्रियं पृथग्विधं कर्मनिष्पत्तौ पृथग्व्यापारं॥ विविधाश्च पृथक्चेष्टा इति चेष्टाशब्देन वायुरभिधीयते॥ तद्
वृत्तिवाचिना॥ शारीरेंद्रियधारणस्य प्राणापानादिभेदभिन्नस्य च वायोः पंचात्मनो विविधा इह चेष्टाः॥ दै

आत्मैव कर्तानगुणः कर्ता शास्त्रार्थवत्वात् शास्त्राणि च नेतरः स्वर्गकामो मुमुक्षुर्ब्रह्मोपा सीतेत्येवमादीनि ॥२॥ तद्वायमात्माज्ञाता ... ॥४॥

ब्र॰सू॰२।३।१९ वायुगत चेष्टा विविधा

तत्कर्तृत्वमस्य परात् परमात्मन एव हेतोर्भवति कुतः श्रुतेः [illegible]

[illegible]

श्री॰भा॰ दैवं चैवात्र पंचमं ॥ अत्र कर्महेतुकलापे पंचमं तु दैवं परमात्मा अंतर्यामी कर्मनिष्पत्तौ प्रधानहेतुरित्यर्थः उ भ॰२८

१५७ क्तं हि ॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेति ॥ वक्ष्यति च ॥ ईश्वरः सर्वभूतानां हृ अज्ञाननिवर्तनं

द्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि माययेति ॥ परमात्मायत्तं जीवात्मनः कर्तृत्वं परात्तु ब्र॰२॰पा॰३॰सू॰४१

तच्छ्रुतेरित्युपपादितं ॥ नन्वेवं परमात्मायत्ते जीवात्मनः कर्तृत्वे जीवात्मा कर्मण्यनियोज्यो भवेदिति विधि

निषेधात्मकानि शास्त्राण्यनर्थकानि स्युः ॥ इदमपि चोद्यं सूत्रकारेण परिहृतं ॥ कृतप्रयत्नापेक्षस्तु वि ब्र॰पा॰३॰सू॰४२

॥ अधिष्ठानं तथा कर्ता करणं च पृथग्विधं ॥ विविधाश्च पृथक्चेष्टा दैवं चैवात्र पंचमं ॥ १४ ॥

॥ शरीरवाङ्मनोभिर्यत्कर्म प्रारभते नरः ॥ न्याय्यं वा विपरीतं वा पंचैते तस्य हेतवः ॥ १५ ॥

हितप्रतिषिद्धावैयर्थ्यादिभ्य इति ॥ एतदुक्तं भवति ॥ परमात्मना दत्तैस्तदाधारैश्च करणकलेवरा

दिभिस्तदाहितशक्तिभिः स्वयं च जीवात्मा तदाधारस्तदाहितशक्तिः सन् कर्मनिष्पत्तये स्वेच्छया कर

णाद्यधिष्ठानाकारं प्रयत्नं चारभते तदंतरावस्थितः परमात्मा स्वानुमतिदानेन तं प्रवर्तयतीति ॥ जीवस्या

पि स्वबुद्ध्यैव प्रवृत्तिहेतुत्वमस्ति ॥ यथा गुरुतरशिलामहीरुहादिचलनादिफलप्रवृत्तिषु बहुपुरुषसाध्या १५७

सु बहूनां हेतुत्वं विधिनिषेधभाक्त्वं चेति ॥ १४ ॥ १५ ॥

जीवेन कृतं [illegible]

॥ तत्रैवमिति ॥ एवं वस्तुतः परमात्मानुमतिपूर्वके जीवात्मनः कर्तृत्वे सति तत्र तत्र कर्मणि केवलं आत्मा

नमेव कर्तारं यः पश्यति स दुर्मतिः विपरीतमतिः अकृतबुद्धित्वात् अनिष्पन्नयथावस्थितबुद्धित्वान्न

स पश्यति न यथावस्थितं कर्तारं पश्यति ॥ १६ ॥ यस्येति ॥ परमपुरुषकर्तृत्वानुसंधानेन यस्य स्वभावः कर्तृत्व

विशेषगोचरो मनोवृत्तिविशेषो नाहंकृतः नाहमभिमानकृतः अहं करोमीति यस्य न विद्यत इत्यर्थः

॥ तत्रैवं सति कर्तारमात्मानं केवलं तु यः ॥ पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ॥ १६ ॥

॥ यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते ॥ हत्वापि स इमाँल्लोकान्न हंति न निबध्यते ॥ १७ ॥

बुद्धिर्यस्य न लिप्यते ॥ अस्मिन्कर्मणि मम कर्तृत्वाभावादेतत्फलं न मया संबध्यते न च मदीयमिदं कर्मेति

यस्य बुद्धिर्जायत इत्यर्थः ॥ स इमाँल्लोकान्युद्धे हत्वापि न हंति न केवलं भीष्मादीनित्यर्थः ॥ ततस्तेन युद्धा

ख्येन कर्मणा न निबध्यते तत्फलं नानुभवतीत्यर्थः ॥ १७ ॥ सर्वमिदं कर्तृत्वाद्यनुसंधानं सत्त्वगुणवृद्ध्या भव यथाक्रियमिति शेषः

तीति सत्त्वस्योपादेयताज्ञापनाय कर्मणि सत्त्वादिगुणकृतं वैषम्यं प्रपंचयिष्यन्कर्मचोदनाप्रकारं तावदाह

ज्ञानमिति ॥ ज्ञानं कर्तव्यकर्मविधिविषयं ज्ञानं ॥ ज्ञेयं कर्तव्यं कर्म परिज्ञाता कर्मणः कर्तृत्वबोद्धेति त्रिविधा कर्मचोदना ॥ बोधबोद्धव्यबोद्धृयुक्तो ज्योतिष्टोमादिकर्मविधिरित्यर्थः ॥ तत्र बोध्यरूपं कर्म त्रिविधं संगृह्यते अस्मिन्निति संग्रहः ॥ करणं कर्म कर्तेति करणं साधनभूतं द्रव्यादिकं कर्म यागादिकं कर्तानुष्ठातेति ॥ १८ ॥ ज्ञानमिति ॥ कर्तव्यकर्मविषयं ज्ञानं ॥ अनुष्ठीयमानं च कर्म कर्ता तस्यानुष्ठाता सत्त्वादिगुणभेदतस्त्रिधैव चोच्यते ॥ गुणसंख्याने गुणकार्यवर्णने यथावच्छृणु तान्यपि तानि गुणतो भिन्नानि ज्ञानानि ॥

ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥ करणं कर्म कर्तेति त्रिविधः कर्मसंग्रहः ॥ १८ ॥ ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ॥ प्रोच्यते गुणसंख्याने यथावच्छृणु तान्यपि ॥ १९ ॥ सर्वभूतेषु येनैकं भावमव्ययमीक्षते ॥ अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकं ॥ २० ॥

दीनि यथावत् शृणु ॥ १९ ॥ सर्वभूतेष्विति ॥ ब्राह्मणक्षत्रियब्रह्मचारिगृहस्थादिरूपेण विभक्तेषु भूतेषु कर्माधिकारिषु येन ज्ञानेनैकाकारमात्माख्यं भावं तत्राप्यविभक्तं ब्राह्मणत्वाद्यनेकाकारेष्वपि भूतेषु सितदीर्घादिविभागवत्सु ज्ञानैकाकारमात्मनि विभागरहितं अव्ययं स्वस्वभावेनापि ब्राह्मणादिशरीरस्य व्ययेऽप्यविकृतं फलादिसंगानर्हं च कर्माधिका

॥ पृथक्त्वेनेति ॥ सर्वेषु भूतेषु ब्राह्मणादिषु ब्राह्मणाद्याकारपृथक्त्वेनात्मारख्यानपि भावान्नानाविधान् सितदीर्घादिपृथक्त्वेन च पृथग्विधान् फलादिसंयोगयोग्यान् कर्माधिकारे वेत्ति जानाति यत् ज्ञानं वेत्ति तज्ज्ञानं राजसं विद्धि ॥ २१ ॥ यदिति ॥ यत्तु ज्ञानमेकस्मिन्कार्ये एकस्मिन्कर्तव्ये कर्मणि प्रेतभूतगणाद्याराधनरूपे अल्पफले कृत्स्नफलवत् सक्तमहैतुकं वस्तुतस्तु कृत्स्नफलवत्तया तथाविधसंग्रहहेतुरहितं अतत्त्वार्थव

॥ पृथक्त्वेन तु यज्ज्ञानं नानाभावान्पृथग्विधान् ॥ वेत्ति सर्वेषु ॥
॥ भूतेषु तज्ज्ञानं विद्धि राजसं ॥ २१ ॥ यत्तु कृत्स्नवदेकस्मिन् कार्ये ॥
॥ सक्तमहैतुकं ॥ अतत्त्वार्थवदल्पं च तत्तामसमुदाहृतं ॥ २२ ॥

त्पूर्ववदेवात्मनि पृथक्त्वादिमुक्ततया मिथ्याभूतार्थविषयं अल्पमल्पफलं च प्रेताद्याराधनरूपविषयत्वादल्पं च तज्ज्ञानं तामसमुदाहृतं ॥ २२ ॥ एवं कर्तव्यकर्मविषयज्ञानस्याधिकारवेलायामधिकार्यंशेन गुणतस्त्रैविध्यमुक्त्वानुष्ठेयस्य कर्मणो गुणतस्त्रैविध्यमाह ॥ ॥

॥नियतमिति॥ नियतं स्ववर्णाश्रमोचितं संगरहितं कर्तृत्वादिसंगरहितं॥ अरागद्वेषतः कृतं कीर्ति 
रागादकीर्तिद्वेषाच्च न कृतं अर्द्धेन कृतमित्यर्थः॥ अफलप्रेप्सुना अफलाभिसंधिना कार्यमिति एव कृ
तं यत्कर्म तत्सात्त्विकं कर्म इत्युच्यते॥२३॥ यदिति॥ यत्तु पुनः कामेप्सुना फलप्रेप्सुना साहंकारेण वा श्रा
द्धार्थे कर्तृत्वाभिमानयुक्तेन बहुलायासं यत्कर्म क्रियते तद्राजसं बहुलायासमिति इदं कर्म मये

॥नियतं संगरहितमरागद्वेषतः कृतं॥ अफलप्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते॥२३॥ यत्तु कामे॥
॥प्सुना कर्म साहंकारेण वा पुनः॥ क्रियते बहुलायासं तद्राजसमुदाहृतं॥२५॥ अनुबंधं क्षयं हिं॥
॥सामनवेक्ष्य च पौरुषं॥ मोहादारभ्यते कर्म तत्तामसमुदाहृतं॥२५॥

॥व क्रियत इत्येवं रूपाभिमानयु
क्तेन यत्कर्म क्रियते तद्राजसमित्यर्थः॥२४॥ अनुबंधमिति॥ कृते कर्मण्यनुबध्यमानं दुःखमनुबंधः
कर्मणि क्रियमाणेर्थविनाशः क्षयः॥ तत्र प्राणिपीडा हिंसा॥ आत्मनः कर्मसमापनसामर्थ्यं पौरु
षं एतानि अनवेक्ष्याविमृश्य मोहादारभ्य पुरुषकर्तृत्वाज्ञानात् यत्कर्म क्रियते तत्तामसमुच्यते॥२५॥ १५२॥

॥मुक्तसंग इति॥ मुक्तसंगः फलसंगरहितः॥ अनहंवादी कर्तृत्वाभिमानरहितः॥ धृत्युत्साहसमन्वि
तः॥ आरब्धे कर्मणि यावत्समाप्ति वर्जनीयदुःखधारणं धृतिः उत्साहः उद्यमः च एताभ्यां समन्वि
त॥ सिद्ध्यसिद्ध्योर्निर्विकारः युद्धादौ कर्मणि तदुपकरणभूत द्रव्यार्जनादिषु च सिद्ध्यसिद्ध्योरविकृतचि
त्तः कर्ता सात्त्विक उच्यते॥२६॥ रागीति॥ रागी पुत्रादिदीनिमानकर्मफलप्रेप्सुः कर्मफलार्थी लुब्धः क

॥ मुक्तसंगोनहंवादी धृत्युत्साहसमन्वितः॥ सिद्ध्यसिद्ध्योर्निर्विकारः कर्ता सात्त्विक उच्यते॥२६॥
॥ रागी कर्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः॥ हर्षशोकान्वितः कर्ता राजसः परिकीर्तितः॥२७॥
॥अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः॥ विषादी दीर्घसूत्री च कर्ता तामस उच्यते॥२८॥

र्मापेक्षितद्रव्यव्ययस्वभावरहितः हिंसात्मकः परान्पीडयित्वा कुर्वाणः अशुचिः कर्मापेक्षितशुद्धिर
हितः हर्षशोकान्वितः युद्धादौ कर्मणि विजयादिसिद्ध्यसिद्ध्योर्हर्षशोकान्वितः कर्ता राजसः परिकीर्ति
तः॥२७॥ अयुक्त इति अयुक्तः शास्त्रीयकर्मायोग्य विकर्मस्थः प्राकृतः अनधिगतविद्यः स्तब्धः आ
रंभशिथिलः शठः अभिचारादिकर्मरुचिः नैष्कृतिकः वंचनपरः अलसः आरब्धेष्वपि कर्मस्वप्रव

सेतरस्मिन्नेतु अकृत्कालपर्यंतमित्यर्थः

॥ गी॰ भा॰ ॥ नः ॥ विषादी अनिमात्रावसादनशीलः दीर्घसूत्री अभिचारादिकमेकुर्वन्नितरेषु दीर्घकालपर्यन्तमर्थ अ॰ १८ ॥
॥ १५३ ॥ पर्यालोचनशीलः एवंभूतो यः कर्त्ता स तामसः ॥ २८ ॥ एवं कर्तृत्वकर्मविषयज्ञानेकर्त्रैमेव च कर्मणि अनु
ष्ठातरि च गुणतस्त्रैविध्यमुक्तं ॥ इदानीं सर्वतत्त्वं पुरुषार्थनिश्च यरूपायां बुद्धे धृतेश्च गुणतस्त्रैविध्य
माह ॥ बुद्धेरिति ॥ बुद्धिर्विवेकपूर्वकनिश्चयरूपं ज्ञानं ॥ धृतिरारब्धायाः क्रियायाः विघ्नोपनिपातेपि वि
धारणसामर्थ्यं तयोः सत्त्वादिगुणतस्त्रिविधं भेदं पृथक्त्वेनोच्यमानं यथावच्छृणु ॥ २९ ॥ प्रवृत्तिमिति

॥ बुद्धेर्भेदं धृतेश्चैव गुणतस्त्रिविधं शृणु ॥ प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय ॥ २९ ॥
॥ प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ॥ बंधं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ॥ ३० ॥

प्रवृत्तिरभ्युदयसाधनभूतो धर्मः निवृत्तिर्मोक्षसाधनभूतो धर्मः नौ नमौ यथावस्थितौ या बुद्धिर्वेत्ति कार्याका
र्ये सर्ववर्णानां प्रवृत्तिनिवृत्तिधर्मयोरन्यतरनियतानां देशकालावस्थाविशेषेषु इदं कार्यमिदमकार्यमि
ति च या वेत्ति भयाभये शास्त्रातिवृत्तिः भयस्थानं तदनुवृत्तिरभयस्थानं बंधं मोक्षं च संसारस्याथात्म्यं त
तस्मान्निवृत्तेः द्विगमयाथात्म्यं च या वेत्ति सा सात्त्विकी बुद्धिः ॥ ३० ॥ ॥ ॥ १५३ ॥

यथेति ॥ यथा पूर्वोक्तं द्विविधं धर्मं तद्विपरीतं च तन्नियतानां देशकालावस्थादिषु कार्यं चाकार्यं च यथाव
न्न जानाति सा राजसी बुद्धिः ॥ ३१ ॥ अधर्ममिति ॥ बुद्धिस्तमसावृता सती सर्वार्थान्विपरीतान्मन्यते अध
र्मं धर्मं धर्मं चाधर्मं सन्तं चासन्तं असन्तं च सन्तं परं चानन्यमपरं अपरं च परं एवं सर्वं विपरीतं मन्यत इत्यर्थः
३२ ॥ धृत्येति ॥ यया धृत्या योगेनाव्यभिचारिण्या मनः प्राणेंद्रियाणां क्रियाः पुरुषो धारयते ॥ योगो मो

॥ यया धर्ममधर्मं च कार्यं चाकार्यमेव च ॥ अयथावत्प्रजानाति बुद्धिः सा पा ॥
॥ र्थ राजसी ॥ ३१ ॥ अधर्मं धर्ममिति या मन्यते तमसावृता ॥ सर्वार्थान्विपरीतां ॥
॥ श्च बुद्धिः सा पार्थ तामसी ॥ ३२ ॥ धृत्या यया धारयते मनः प्राणेंद्रियक्रियाः ॥
॥ योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥ ३३ ॥ ॥

हेतौ तृतीया यो ग स

क्षसाधनभूतं भगवदुपासनं तेन प्रयोजनभूतेनाव्यभिचारिण्या योगोद्देशेन प्रवृत्ता तत्साधनभूताम
नः प्रभृतीनां याः क्रियाः यया धृत्या धारयते सा सात्त्विकीत्यर्थः ॥ ३३ ॥ ॥

॥गी॰ आ॰ ययेति ॥ फलाकांक्षी पुरुषः प्रकृष्टसंगेन धर्मकामार्थान् यया धृत्या धारयते सा राजसी धर्मकामा अ॰ १८॥
॥१५५॥ र्थशब्देन तत्साधनभूता मनःप्राणेंद्रियक्रिया लक्ष्यंते ॥ फलाकांक्षीत्यत्रापि फलशब्देन राजसत्वा
त् धर्मकामार्था एव विवक्षिताः अतो धर्मकामार्थापेक्षया मनःप्रभृतीनां क्रिया यया धृत्या धारयते सा
राजसीत्युक्तं भवति ॥ ३४ ॥ ययेति ॥ यया धृत्या स्वप्नं निद्रां मदं विषयानुभवजनितं मदं स्वप्नादीनुद्दि
यया तु धर्मकामार्थान्धृत्या धारयतेऽर्जुन ॥ प्रसंगेन फलाकांक्षी धृतिः सा पार्थ राजसी ॥ ३४ ॥ यया स्वप्नं भ
यं शोकं विषादं मदमेव च ॥ न विमुंचति दुर्मेधा धृतिः सा पार्थ तामसी ॥ ३५ ॥ सुखं त्विदानीं त्रिविधं शृणु
मे भरतर्षभ ॥ अभ्यासाद्रमते यत्र दुःखांतं च निगच्छति ॥ ३६ ॥ उपयुक्ता मनःप्राणादीनां क्रिया दुर्मेधा
न विमुंचति धारयति भयशोकविषादशब्दाः भयशोकादिदायिविषयपरास्तत्साधनभूताश्च मनः
प्राणादिक्रियाः ॥ यया धारयते सा धृतिस्तामसी ॥ ३५ ॥ सुखमिति ॥ पूर्वोक्ताः सर्वे ज्ञानकर्मकर्तृत्वादय
योपच्छेदप्रभृतास्तत्र सुखं गुणतस्त्रिविधं इदानीं शृणु ॥ यस्मिन्सुखे चिरकालाभ्यासात्क्रमेण निर
तिशयां रतिं प्राप्नोति दुःखांतं च निगच्छति निखिलस्य सांसारिकस्य दुःखस्यांतं निगच्छति तदेव विशिन १५५॥
ष्टि ॥ ३७ ॥

यदिति ॥ यत्तत्सुखमग्रे योगोपक्रमवेलायां वैराग्यायाससाध्यत्वाद्विविक्तरूपस्याननुभवाद्वा विषमि
व दुःखमिव भवति परिणामेऽमृतोपमं परिणामे विपाके अभ्यासबलेन विविक्तस्वरूपाविर्भावेऽमृतो
पमं भवति ॥ तदात्मबुद्धिप्रसादजं आत्मविषया बुद्धिरात्मबुद्धिस्तस्या ॥ निवृत्तसकलेतरविषयत्वं प्रसा
दः निवृत्तसकलेतरविषयाया बुद्धेर्विविक्तस्वभावात्मानुभवजनितं सुखं अमृतोपमं तत् सात्त्विकं प्रोक्तं
यत्तदग्रे विषमिव परिणामेऽमृतोपमं ॥ तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजं ॥ ३७ ॥ विषयेंद्रियसं
योगाद्यत्तदग्रेऽमृतोपमं ॥ परिणामे विषमिव तत्सुखं राजसं स्मृतं ॥ ३८ ॥ यदग्रे चानुबंधे च सुखं मोहन
मात्मनः ॥ निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ॥ ३९ ॥ ३७ ॥ विषयेति अग्रे अनुभववेलायां वि
षयेंद्रियसंयोगाद्यत्तदमृतमिव भवति परिणामे विपाके विषयाणां सुखनिमित्तत्वात् दुःखादेर्निवृत्तेः
तस्मिंश्च सुखस्य निरयादिनिमित्तत्वाद्विषमिव पीतं भवति तत्सुखं राजसं स्मृतं ॥ ३८ ॥ यदिति ॥ यत्सुखम
ग्रे चानुबंधे चानुभववेलायां विपाके चात्मनो मोहनं भवति ॥ मोहश्च यथावस्थितवस्तुप्रकाशो निश्चे
नः ॥ निद्रालस्यप्रमादोत्थं निद्रालस्यप्रमादजनितं निद्रादयो ह्यनुभववेलायामपि मोहहेतवः ॥ निद्राया

 मोहहेतुत्वंस्पष्टंच्आलस्यमिंद्रियव्यापारमांद्यंइंद्रियव्यापारमांद्येच सतिज्ञानमांद्यंभवत्येव॥ 
 प्रमादःकृत्यानवधारणरूपःइति॥तत्रत्वात्मज्ञानमांद्यंभवति॥ततश्चतयोरपिमोहहेतुत्वंतत्सुखंता
मसमुदाहृतं॥अतोमुमुक्षुणारजस्तमसीअभिभूयसत्त्वमेवोपादेयमित्युक्तंभवति॥३९॥नतदस्तीति॥पृ
थिव्यांमनुष्यादिषुदिविदेवेषुवाप्रकृतिसंभवेषुब्रह्मादिस्थावरांतेषुप्रकृतिजैरेभिस्त्रिभिर्गुणैर्मुक्तंय
त्सत्त्वंप्राणिजातंतन्नास्ति॥४०॥त्यागेनैकेऽमृतत्वमानशुरित्यादिषुमोक्षसाधनतयानिर्दिष्टस्त्यागः

॥नतदस्तिपृथिव्यांवादिविदेवेषुवापुनः॥सत्त्वंप्रकृतिजैर्मुक्तंयदेभिःस्यात्त्रिभिर्गुणैः॥४०॥

नमत

संन्यासशब्दार्थः॥नतदन्यः॥सचक्रियमाणेष्वेवकर्मसुकर्मत्वकर्तृत्वत्यागमूलःफलकर्मणोःत्यागः
कर्तृत्वत्यागश्चपरमगुरुरूपकर्तृत्वानुसंधानेनेत्युक्तं॥एतत्सर्वंसत्त्वगुणवृद्धिकार्यमितिसत्त्वोपादेयता
ज्ञापनायसत्त्वरजस्तमसांकार्यभेदःप्रपंचितः॥इदानीमेवंभूतस्यमोक्षसाधनतयाक्रियमाणस्यकर्म
णःपरमगुरूपाराधनोपदेशानांतथानुष्ठितस्यचकर्मणस्तत्त्वाभिलक्षणंफलंप्रतिपादयितुंब्राह्म
णाद्यधिकारिणांस्वभावानुबंधिसत्त्वादिगुणभेदभिन्नंस्वधर्मासहकर्तव्यकर्मस्वरूपमाह॥ ॥ 

ब्राह्मणेति॥ब्राह्मणक्षत्रियविशांस्वकीयोभावःस्वभावःब्राह्मणादिजन्महेतुभूतंप्राचीनंकर्मेत्य
र्थः॥तत्प्रभवाःसत्त्वादयोगुणाः॥ब्राह्मणस्यस्वभावप्रभवस्तुरजस्तमोभिभवेनोद्रिक्तःसत्त्वगुणःक्ष
त्रियस्यस्वभावप्रभवस्तुसत्त्वतमसोभिभवेनोद्रिक्तोरजोगुणःवैश्यस्यस्वभावप्रभवस्तुसत्त्वरजोभिभवे
नाल्पोद्रिक्तस्तमोगुणःशूद्रस्यस्वभावप्रभवस्तुरजःसत्त्वाभिभवेनात्युद्रिक्तस्तमोगुणःएभिःस्वभाव
प्रभवैर्गुणैःसहप्रविभक्तानिकर्माणिशास्त्रैःप्रतिपादितानिब्राह्मणादयएवंगुणकास्तेषांचैतानिक

॥ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप॥कर्माणिप्रविभक्तानिस्वभावप्रभवैर्गुणैः॥४१॥
॥शमोदमस्तपःशौचंक्षांतिरार्जवमेवच॥ज्ञानंविज्ञानमास्तिक्यंब्रह्मकर्मस्वभावजम्॥४२॥ र्माणिप्रवृत्त

पश्चैताइतितद्विभज्यप्रतिपादयंतिशमाद्यानि॥४१॥शमइति॥शमोबाह्येंद्रियनियमनंदमोंतःकर
णनियमनंतपोभोगनियमनरूपःशास्त्रसिद्धःकायक्लेशःशौचंशास्त्रीयकर्मयोग्यताक्षांतिःपरैर
नवरतंताड्यमानस्यापिअविकृतचित्तता॥आर्जवंपरेषुमनोनुरूपंबाह्यचेष्टाप्रकाशनंज्ञानंज्ञानेप्रणवर
नत्वपाध्यात्मज्ञानंविज्ञानंपरतत्त्वगताऽसाधारणविशेषविषयंविज्ञानंआस्तिक्यंवैदिकार्थस्यदृढत्व

स्यसत्यतानिश्चयप्रकृष्टः केनापिहेतुनाऽपनेतुमशक्य इत्यर्थः ॥ भगवान्पुरुषोत्तमो वासुदेवः परब्रह्म
शब्दाभिधेयो निरस्तनिखिलदोषगंधः स्वाभाविकानवधिकातिशयज्ञानशक्त्याद्यसंख्येयकल्याणगुण
गणः निखिलवेदवेद्यः स एव निखिलजगदेककारणं निखिलजगदाधारभूतो निखिलस्य स एव प्रव
र्तयिता तदाराधनभूतं च कृत्स्नं वैदिकं कर्म तैस्तैराराधितो धर्मार्थकाममोक्षाख्यं फलं प्रयच्छतीत्यस्यार्थ
स्यसत्यतानिश्चयः आस्तिक्यं ॥ वेदैश्च सर्वैरहमेव वेद्यो ॥ अहं सर्वस्य प्रभवो मयि सर्वमिदं प्रोतं भोक्तारं य

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनं ॥ दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥४३॥ ज्ञतपसां ज्ञात्वा

मां शांतिमृच्छति ॥ मत्तः परतरं नान्यत्किंचिदस्ति धनंजय ॥ यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततं ॥ स्वक
र्मणा तमभ्यर्च्य सिद्धिं विंदति मानवः ॥ यो मामजमनादिं च वेत्ति लोकमहेश्वरमित्युच्यते ॥ तदेतत् ब्राह्म
णस्य स्वभावजं कर्म ॥४२॥ शौर्यमिति ॥ शौर्यं युद्धे निर्भयप्रवेशसामर्थ्यं तेजः परैरनभिभवनीयता धृतिः
आरब्धे कर्मणि विघ्नोपनिपातेपि तत्समापनसामर्थ्यं दाक्ष्यं सर्वक्रियानिर्वृत्तिसामर्थ्यं युद्धे चाप्यपला
यनं युद्धे चात्ममरणनिश्चयेऽप्यनिवर्तनं दानमात्मीयद्रव्यस्य परस्वत्वापादनपर्यंतस्त्यागः ईश्वरभा

अ·१८॥
॥४४॥ [illegible] वः

कृषीति ॥ कृषिः सस्योत्पादनं कर्षणं गोरक्ष्यं पशुपालनमित्यर्थः ॥ वाणिज्यं धनसंचयहेतुभूतं क्रयवि
क्रयात्मकं कर्म एतद्वैश्यस्य स्वभावजं कर्म पूर्ववर्णत्रयाणां परिचर्यारूपं शूद्रस्य स्वभावजं कर्म तदेतच्चतु
र्णां वर्णानां त्रिभिः सहकर्तव्यानां शास्त्रविहितानां यज्ञादिकर्मणां प्रदर्शनार्थमुक्तं ॥ यज्ञादयः त्रया
णां वर्णानां साधारणाः शमदमादयोपि त्रयाणां वर्णानां मुमुक्षूणां साधारणाः ब्राह्मणस्य तु सत्वोद्रे
कस्य स्वाभाविकत्वेन शमदमादयः सुखोपादाना इति कृत्वा तस्य शमदमादयः स्वभावजं कर्मेत्युक्तं क्षत्रि
यवैश्ययोस्तु स्वतो रजस्तमःप्रधानत्वेन शमदमादयो दुःखोपादाना इति कृत्वा न तत्कर्मेत्युक्तं नात्य

॥ कृषिगोरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजं ॥ परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजं ॥४४॥ स्वे स्वे कर्म
ण्यभिरतः संसिद्धिं लभते नरः ॥ स्वकर्मनिरतः सिद्धिं यथा विंदति तच्छृणु ॥४५॥ णस्य च यजनाध्या

पनप्रतिग्रहाः क्षत्रियस्य जनपदपरिपालनं वैश्यस्य कृष्यादयो यथोक्ताः ॥ शूद्रस्य तु कर्तव्यमाह निश्च
पूर्ववर्णपरिचर्येति ॥४४॥ स्वे इति ॥ स्वे स्वे यथोदिते कर्मण्यभिरतो नरः संसिद्धिं परमपदप्राप्तिं लभते स्वक
र्मरतो यथा सिद्धिं विंदति परमपदं प्राप्नोति तथा शृणु ॥४५॥ यत इति ॥ यतो भूतानामुत्पत्त्यादिका प्रवृत्तिः
येन च सर्वमिदं ततं ॥ स्वकर्मणा तमिंद्राद्यंतरात्मतयावस्थितमभ्यर्च्य तत्समाराधनात्प्राप्तिरूपां सिद्धिं विं

इतिमानवः मत्तएवसर्वमुत्पद्यतेमयाचसर्वमिदंततमितिपूर्वमेवोक्तं॥ अहंसर्वस्यजगतः प्रभवः प्रल
यस्तथामत्तः परतरंनान्यत्किंचिदस्तिधनंजयमयाततमिदंसर्वंजगदव्यक्तमूर्त्तिना॥ मयाध्यक्षेणप्रकृ
तिः सूयतेसचराचरं॥ अहंसर्वस्यप्रभवोमत्तः सर्वंप्रवर्त्ततइत्यादिषु॥ ४६॥ यतइतियतोभूतानांब्रह्मा
द्यादिकाप्रवृत्तिः येनसर्वमिदंततंस्वकर्मणातमिंद्राद्यात्मनातयावस्थितमभ्यर्च्यतस्यसाहात्म्यध्येया
निति एवंस्वकर्तृत्वादिर्योमदाराधनस्वरूपः स्वधर्मः स्वेनोपादातुंयोग्योधर्मः प्रकृतिसंसृष्टेनहिपुरु
षेणेंद्रियव्यापाररूपः कर्मयोगात्मकोधर्मः सुकरोभवति॥ अतः कर्मयोगाख्यः स्वधर्मोविगुणोपिप्र

यतः प्रवृत्तिर्भूतानांयेनसर्वमिदंततं॥ स्वकर्मणातमभ्यर्च्यसिद्धिंविंदतिमानवः॥ ४६॥ श्रेयान्स्वधर्मो
विगुणः परधर्मात्स्वनुष्ठितात॥ स्वभावनियतंकर्मकुर्वन्नाप्नोतिकिल्बिषं॥ ४७॥ रधर्मादिंद्रियनियमन
नैपुण्यरूपधर्मान्ज्ञानयोगात्सकलेंद्रियनियमनरूपतयासप्रमादात्कदाचित्स्वनुष्ठितात्श्रेयानंतर
वोपपादयति॥ स्वभावनेमिति॥ प्रकृतिसंसृष्टस्यपुरुषस्येंद्रियव्यापाररूपतयास्वभावतएवनियतत्वा
त्कर्मणः कर्मकुर्वन्किल्बिषंसंसारंनाप्नोतिअप्रमादत्वात्कर्मणः ज्ञानयोगस्यसकलेंद्रियनियमनसाध्य
तयासप्रमादत्वात्तन्निष्ठस्तुप्रमादात्किल्बिषंप्रतिपद्यते॥ अतः कर्मनिष्ठएवन्यायसीतिदृत्तीयोक्तंस्मा

॥६७॥

सहजमिति॥ अतः सहजत्वेनसुकरमप्रमादंचकर्मसदोषंसकृः स्वमपिनत्यजेत॥ ज्ञानयोगयोग्यो
पिकर्मयोगमेवकुर्वित्यर्थः॥ सर्वारंभाः कर्मारंभाज्ञानारंभाश्चदोषेणदुःखेनधूमेनाग्निरिवावृताः इयां
स्तुविशेषः कर्मयोगः सुकरः अप्रमादश्चज्ञानयोगस्तद्विपरीतश्चेति॥ ४८॥ असक्तबुद्धिरिति॥ सर्वत्र
फलादिष्वसक्तचित्तः जितात्माजितमनाः परमपुरुषकर्तृत्वानुसंधानेनात्मकर्तृत्वेविगतस्पृहः॥ एवं
त्यागादनन्यत्वेननिर्णीतेनसंन्यासेनयुक्तः कर्मकुर्वन्नपिपरमांनैष्कर्म्यसिद्धिंअधिगच्छतीतिपरमात्म

सहजंकर्मकौंतेयसदोषमपिनत्यजेत॥ सर्वारंभाहिदोषेणधूमेनाग्निरिवावृताः॥ ४८॥ असक्तबुद्धिःसर्वत्र
जितात्माविगतस्पृहः॥ नैःकर्म्यसिद्धिंपरमांसंन्यासेनाधिगच्छति॥ ४९॥ सिद्धिंप्राप्तोयथाब्रह्मतथाप्नोतिनि
बोधमे समासेनैवकौंतेयनिष्ठाज्ञानस्ययापरा॥ ५०॥ ध्याननिष्ठांज्ञानयोगस्यापिफलभूतामधिगच्छतीत्य
र्थः॥ वक्ष्यमाणां ध्यानयोगाग्निंसर्वेंद्रियकर्मोपरतिरूपांअधिगच्छति॥ ४९॥ सिद्धिमिति॥ सिद्धिंप्राप्तः अप्र
मादाणादहरहरनुष्ठीयमानकर्मयोगनिष्पाद्यध्यानसिद्धिंप्राप्तोयथायेनप्रकारेणवर्त्तमानोब्रह्मप्राप्नो
तितथासमासेनमेमत्तः निबोध॥ तदेवब्रह्मविशेष्यतेनिष्ठाज्ञानस्ययापरेतिज्ञानस्यध्यानात्मकस्यया

॥ गी॰भा॰ बुद्ध्येति ॥ विविक्तेति ॥ अहमिति ॥ बुद्ध्या विशुद्धया यथावस्थितात्मतत्त्वविषयया युक्तः धृत्यात्मानं नि अ॰ १८॥
॥१५८॥ यम्य च विषयविमुखीकरणेन योगयोग्यं मनः कृत्वा शब्दादीन्विषयांस्त्यक्त्वा असन्निहितान्कृत्वा तन्निमि
हेतुभिः त्तौ रागद्वेषौ व्युदस्य विविक्तसेवी सर्वध्यानविरोधिनिर्विविक्तदेशे वर्तमानः लघ्वाशी अत्यशनानशनर
हितः यतवाक्कायमानसः ध्यानाभिमुखीकृतकायवाङ्मनोवृत्तिः ध्यानयोगपरो नित्यं एवंभूतः सन्नस्मा

॥ बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च ॥ शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥५१॥ विविक्तसेवी
लघ्वाशी यतवाक्कायमानसः ॥ ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः ॥५२॥ अहंकारं बलं दर्पं कामं क्रोधं
परिग्रहं ॥ विमुच्य निर्ममः शांतो ब्रह्मभूयाय कल्पते ॥५३॥
प्रयाणादहरहर्ध्यानयोगपरः वैराग्यं समुपाश्रि
तः ध्येयतत्त्वव्यतिरिक्तविषयदोषावमर्शेन तत्र च विरागतां वर्धयन् अहंकारमनात्मन्यात्माभिमानं बलं
तदभिवृद्धिहेतुभूतवासनाबलं तन्निमित्तं दर्पं कामं क्रोधं परिग्रहं च विमुच्य निर्ममः सर्वेष्वनात्मीयेष्वात्मी
यबुद्धिरहितः शांतः आत्मानुभवैकसुखः एवंभूतो ध्यानयोगं कुर्वन् ब्रह्मभूयाय कल्पते ब्रह्मभावाय क
ल्पते सर्वबंधविनिर्मुक्तो यथावस्थितमात्मानमनुभवतीत्यर्थः ॥५१॥५२॥५३॥ ॥ १५८॥

ब्रह्मभूत इति ॥ ब्रह्मभूतः आविर्भूतापरिच्छिन्नज्ञानैकाकारमच्छेषतैकरसस्वभावात्मस्वरूपः इतरस्त्वमां
प्रकृतिं विद्धि मे परामिति स्वशेषतोक्तात्मसन्नात्मात्मज्ञेन कर्मादिभिरकलुषरूपः मद्व्यतिरिक्तं किंचन भूत
विशेषं न शोचति न कांक्षति ॥ मद्व्यतिरिक्तेषु सर्वेषु भूतेषु अनादरणीयतया समो निखिलं वस्तुजातं तृणव
न्मन्यमानो मद्भक्तिं लभते परां मयि सर्वेश्वरे निखिलजगदुद्भवस्थितिप्रलयलीले निरस्तसमस्तहेयगंधे

ब्रह्मभूतः प्रसन्नात्मा न शोचति न कांक्षति ॥ समः सर्वेषु भूतेषु मद्भक्तिं लभते परां ॥५४॥ भक्त्या मामभिजा
नाति यावान्यश्चास्मि तत्त्वतः ॥ ततो मां तत्त्वतो ज्ञात्वा विशते तदनंतरं ॥५५॥ अनवधिकातिशयासंख्येय
कल्याणैकताने ज्ञानबलाद्यनन्तसागरे श्रीमत्सुंदरीकनयने स्वस्वामिन्यत्यर्थप्रियानुभवरूपां परां भक्तिं ल
भते ॥५४॥ भक्त्येति ॥ स्वरूपतः स्वभावतश्च योऽहं गुणतो विभूतितो वियावांश्चाहं तं मां एवंरूपयानन्या
भक्त्या विजानाति मां तत्त्वतो ज्ञात्वा तदनंतरं ततो भक्तितो मां विशते प्रविशति ॥ तत्त्वतः स्वरूपस्वभावगु
णविभूतिदर्शनोत्तरकालभाविन्यानवधिकातिशयभक्त्या मां प्राप्नोतीत्यर्थः ॥ अत्र तत इति ज्ञानमिहे
तुतया निर्दिष्टा भक्तिरेव ॥ भक्त्या त्वनन्यया शक्य इति ॥ तस्मा एव तत्त्वतः प्रवेशहेतुताभिधानात् ॥ एवं ॥५४॥५५॥

वर्णाश्रमोचितनित्यनैमित्तिककर्मणां परित्यक्तफलादिकानां परमपुरुषाराधनरूपेणानुष्ठितानां वि
पाक उक्तः ॥ इदानीं काम्यानामपि कर्मणां भक्तेनैव प्रकारेणानुष्ठीयमानानां स एव विपाक इत्या
ह ॥ ५५ ॥ सर्वेति ॥ न केवलं नित्यनैमित्तिकानि कर्माण्यपितु काम्यान्यपि सर्वाणि कर्माणि मयि सं
न्यस्य कर्तृत्वादिकं कुर्वाणः मत्प्रसादात् शाश्वतं पदमव्ययं अविकलं प्राप्नोति पद्यते इति पदं मां प्राप्नो (प्राप्यते)

॥ सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ॥ मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययं ॥ ५६ ॥
॥ चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः ॥ बुद्धियोगमुपाश्रित्य मच्चित्तः सततं भव ॥ ५७ ॥

तीत्यर्थः ॥ यस्मादेवं तस्मात् ॥ ५६ ॥ चेतसेति ॥ चेतसा आत्मनो मदीयत्वेनानन्यत्वबुद्ध्या ॥ उक्तं हि ॥ मयि स
र्वाणि कर्माणि संन्यस्याध्यात्मचेतसेति ॥ सर्वकर्माणि सकर्तृकानि माराध्यानि मयि संन्यस्य मत्परः अ
हमेव फलतया प्राप्य इत्यनुसंदधानः कर्माणि कुर्वन्निममेव बुद्धियोगमुपाश्रित्य सततं मयि युक्तचित्तो
भव ॥ ५७ ॥ श्रीसद्ज्ञानेंद्रस्वामीने नमो नमः ॥





॥ मच्चित्त इति ॥ एवं मच्चित्तः सर्वकर्माणि कुर्वन्सर्वाणि सांसारिकाणि दुर्गाणि मत्प्रसादादेव तरिष्यसि ॥ अ
थ चेत्त्वमहंकारादहमेव कृत्याकृत्यविशेषं सर्वं जानामीति मत्वा मदुक्तं न श्रोष्यसि विनंक्ष्यसि नष्टो भ
विष्यसि ॥ न हि कश्चिन्मद्व्यतिरिक्तः कृत्स्नस्य प्राणिजातस्य कृत्याकृत्ययोर्ज्ञाता प्रशासिता वास्ति ॥ ५८ ॥
यदिति ॥ यदहंकारमात्मनो हिताहितज्ञाने स्वातंत्र्यतयाऽभिमानमाश्रित्य मन्निगदितमनादृत्य न योत्स्य
इति मन्यसे ॥ एष ते स्वातंत्र्यव्यवसायो मिथ्या भविष्यति यतः ॥ प्रकृतिस्त्वां युद्धे नियोक्ष्यति ॥ मज्ज्ञानं अतप

मच्चित्तः सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ॥ अथ चेत्त्वमहंकारान्न श्रोष्यसि विनंक्ष्यसि ॥ ५८ ॥ यदहंका
रमाश्रित्य न योत्स्य इति मन्यसे ॥ मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ ५९ ॥ स्वभावजेन कौंतेय
निबद्धः स्वेन कर्मणा ॥ कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोपि तत् ॥ ६० ॥ क्षिप्तमानसं त्वां मदाज्ञया प्रकृति
र्नियोक्ष्यति नत्वपपादयति ॥ ५९ ॥ स्वभावजेनेति ॥ स्वभावजं हि क्षत्रियस्य कर्म शौर्यं स्वभावजेन शौर्येण (स्वे)न
कर्मणा निबद्धः तत एवावशः परैर्धर्षणमसहमानः त्वमेव तद्युद्धं करिष्यसि ॥ यदिदानीं मोहादज्ञाना
त्कर्तुं नेच्छसि ॥ सर्वं हि भूतजातं सर्वेश्वरेण मया पूर्वकर्मानुगुण्येन प्रकृत्यनुवर्तनेन नियमितं शृणु ॥

॥१५९॥

२६७॥

॥ईश्वर इति॥ ईश्वरः सर्वनियमनशीलो वासुदेवः सर्वभूतानां हृद्देशे सकलप्रवृत्तिनिवृत्तिमूलज्ञानो
दये हृद्देशे तिष्ठति कथं कुर्वन्सन् तिष्ठति यंत्रारूढानि सर्वभूतानि मायया भ्रामयन् स्वेनैव निर्मितं देहेंद्रिया
द्यसंघरूपं यंत्रमारूढानि सर्वभूतानि स्वकीयया सत्त्वादिगुणमय्या मायया गुणानुगुणं प्रवर्त्तयं
स्तिष्ठतीत्यर्थः ॥ एवं मयाप्येतदुक्तं ॥ सर्वस्य चाहं हृदि संनिविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं चेति मत्तः सर्वं
प्रवर्त्तत इति च ॥ श्रुतिश्च य आत्मनि तिष्ठन्नित्याद्या ॥ तरणोपायमाह ॥ ॥ तमेवेति ॥ यस्मा

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ॥ भ्रामयन्सर्वभूतानि यंत्रारूढानि मायया ॥ ६१ ॥ तमेव शरणं ग
च्छ सर्वभावेन भारत ॥ तत्प्रसादात्परां शांतिं स्थानं प्राप्स्यसि शाश्वतं ॥ ६२ ॥

देवं तस्मात्तमेव सर्वस्य प्रशासि
तारमात्मनि वाक्यस्येन त्वच्छरीरेष्वेव स्थितमित्थं कुर्वन्निप्रशासितारं मां सर्वभावेन सर्वात्मना शरणं
गच्छानुवर्तस्व ॥ अन्यथा तन्मायया यंत्रे स्थितेनापि ज्ञानेनैव तत्त्वया युद्धादिकरणमवर्जनीयं तथा सति नष्टो भ
विष्यसि अतो मदुक्तप्रकारेण युद्धादिकं कुर्वित्यर्थः ॥ एवं कुर्वाणस्तत्प्रसादात्परां शांतिं सर्वकर्म
बंधोपशमनं शाश्वतं च स्थानं प्राप्स्यसि ॥ यदभिधीयते श्रुतिभिर्ज्ञानैः ॥ तद्विष्णोः परमं पदं सदा पश्यंति सू

इती ति ॥ इत्येवं ते मुमुक्षुभिरधिगंतव्यं ज्ञानं सर्वस्मात् गुह्याद्गुह्यतरं कर्मयोगविषयं ज्ञानयोग
विषयं भक्तियोगविषयं च सर्वमाख्यातं एतदशेषेण विमृश्य पर्यालोच्याधिकारानुरूपं यथेच्छसि तथा कुरु कर्मयोगं ज्ञा
नयोगं भक्तियोगं वा यथेष्टमातिष्ठेत्यर्थः ॥ ६३ ॥ सर्वगुह्यतममिति ॥ सर्वेष्वप्येतेषु भक्तियोगस्य श्रेष्ठत्वाद्गुह्यतममिति
पूर्वमेवोक्तं इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे इत्यादौ ॥ भूयोपि तद्विषयं परमं मे वचः शृणु इष्टोसि मे दृढमिति ततस्ते
हितं वक्ष्यामि ॥ ६४ ॥ मन्मना इति ॥ वेदांतेषु वेदाहमेतं पुरुषं महांतमादित्यवर्णं तमसः परस्तात् तमेव विद्वानमृ

इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया ॥ विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ ६३ ॥ सर्वगुह्यतमं भूयः शृणु मे पर
मं वचः ॥ इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं ॥ ६४ ॥ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ॥ मामेवैष्यसि सत्यं
ते प्रतिजाने प्रियोसि मे ॥ ६५ ॥

त इह भवति नान्यः पंथा विद्यतेऽयनायेत्यादिषु ॥ यस्मिन्विहितं वेदनोपासनध्यानादि
शब्दवाच्यं दर्शनसमानाकारं स्मृतिसंतानमत्यर्थप्रियत्वेन स्मर्यमाणेऽस्मिन्मनो यस्य तिष्ठ मन्मना भवेति विधीयते मद्भक्तः
अत्यर्थप्रियः अत्यर्थमप्रियत्वेन निरतिशयप्रियां स्मृतिसंततिं कुर्वित्यर्थः मद्याजी तत्रापि मद्भक्तः इत्यनु
सज्यते यजनं पूजनं अत्यर्थप्रियमदाराधनपरो भव आराधनं हि परिपूर्णशेषवृत्तिः मां नमस्कुरु नमो नमनं मनसप्र
णिपातं प्रह्वीभावमत्यर्थप्रियं कुर्वित्यर्थः एवं वर्तमानो मामेवैष्यसि एतत्सत्यं ते प्रतिजाने तव निःशंकां करोमि नो

प्र

प्रत्यहं तन्मात्रं प्रतस्त्वं प्रियोऽसि मे प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इति पूर्वोक्तमेवोक्तं यस्य मय्यतिमात्रप्रीति
र्वर्त्तते ममापि तस्मिन्नतिमात्रं प्रीतिर्भवति ॥ तद्वियोगमसहमानोऽहं तं मां प्रापयामि अतः सत्यमेव प्रतिज्ञातं मा
मेवैष्यसीति ॥ ६५ ॥ सर्वेति ॥ कर्मयोगज्ञानयोगभक्तियोगरूपान्सर्वान्धर्मान्परमनिःश्रेयससाधनभूतान्मदाराधनत्वे
नातिमात्रप्रीत्या यथाधिकारं कुर्वाण एवोक्तरीत्या फलसंगकर्तृत्वादिपरित्यागेन परित्यज्य मामेकं शरणं व्रज
कर्त्तारमाराध्यं प्राप्यमुपायं चानुसंधत्स्व एष एव सर्वधर्माणां शास्त्रीयपरित्याग इति निश्चयं श्रृणु मे तत्र त्यागे भ
रतसत्तम ॥ त्यागो हि पुरुषव्याघ्र त्रिविधः संप्रकीर्तितः इत्यारभ्य यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयत इत्यादौ
सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥ सुदृढमुपपादितः ॥ अहं त्वां स
र्वपापेभ्यो मोक्षयिष्यामि ॥ एवं वर्त्तमानं त्वां मत्प्राप्तिविरोधिभ्योऽनादिकालसंचितानंतकृत्याकरणाकृत्यकरण
रूपेभ्यः सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि मा शुचः शोकं मा कृथाः ॥ अथवा भक्तियोगारंभविरोधिसर्वपापविनिर्मु
क्तिपूर्वकभक्तियोगारंभस्यात्यर्थं भगवत्प्रियपुरुषनिर्वर्त्यत्वात्तदारंभविरोधिपापानामानंत्यात्तत्प्रायश्चित्तरूपै
र्धर्मैरपरिमितकालकृतैस्तेषां दुस्तरतयात्मनो भक्तियोगारंभानर्हतामालोच्य शोचतोऽर्जुनस्य शोकमपनुदन्
श्रीभगवानुवाच ॥ सर्वधर्मान्परित्यज्येति ॥ भक्तियोगारंभविरोध्यनादिकालसंचितनानाविधानंतपापानुगु १६१ ॥

ण तत्प्रायश्चित्तरूपकृच्छ्रचान्द्रायणकूष्माण्डवैश्वानरप्राजापत्यव्रातपतिपवित्रेष्टित्रिवृदग्निष्टोमादिकान्ना
नाविधानंतानल्पपरिमितकालवर्तिना दुरनुष्ठानान्सर्वधर्मान्परित्यज्य भक्तियोगारंभसिद्धये मामेकं परम
कारुणिकमनालोचितविशेषाशेषलोकशरण्यमाश्रितवात्सल्यजलधिं शरणं प्रपद्यस्व ॥ अहं त्वां स
र्वपापेभ्यो यथोदितस्वरूपभक्त्यारंभविरोधिभ्यः सर्वेभ्यः पापेभ्यो मोक्षयिष्यामि मा शुचः ॥ ६६ ॥ इदमिति ॥ इदं
ते परमं गुह्यं शास्त्रं मयाख्यातं अतपस्कायातप्ततपसे त्वया न वाच्यं ॥ न चेति कृशिमपि चाभक्ताय कदाचन न

॥ इदं ते नातपस्काय नाभक्ताय कदाचन ॥ न चाशुश्रूषवे वाच्यं न च मां योऽभ्यसूयति ॥ ६७ ॥
॥ य इदं परमं गुह्यं मद्भक्तेष्वभिधास्यति ॥ भक्तिं मयि परां कृत्वा मामेवैष्यत्यसंशयः ॥ ६८ ॥

तप्ततपस्केऽपि अभक्ताय हि न वाच्यं
वाच्यं न मे तपसे चाभक्ताय न वाच्यमित्यर्थः ॥ न चाशुश्रूषवे भक्तायाप्यशुश्रूषवे न वाच्यं न च मां योऽभ्यसूयति
मत्स्वरूपे मदैश्वर्ये मद्गुणेषु च कथितेषु यो दोषमाविःकरोति न तस्मै न वाच्यं असमानविभक्तिनिर्देशः तस्या
त्यन्तपरिहरणीयताज्ञापनाय ॥ ६७ ॥ य इदमिति ॥ इदं परमं गुह्यं मद्भक्तेषु योऽभिधास्यति व्याख्यास्यति ॥ स मयि पर
मां भक्तिं कृत्वा मामेवैष्यति नात्र संशयः ॥ ६८ ॥ ॥ ॥

न चेति ॥ सर्वेषु मनुष्येषु इतः पूर्वं तस्मादन्यो मनुष्यो मे न कश्चित्प्रियकृत्तमो भूत् न इतः उत्तरं च न भविता ॥ अ
योग्यानां वचनमनुपादानं योग्यानां अकथनादपि तत्कथनस्यातिप्रियतमत्वात् ॥ ६९ ॥ अध्येष्यत इति ॥ य
इममावयोर्धर्म्यं संवादमध्येष्यते ॥ तेन ज्ञानयज्ञेनाहमिष्टः स्यामिति मे मतिः ॥ अस्मिन्यो ज्ञानयज्ञोऽभिधी
यते तेन ज्ञानयज्ञेनाहमेतदध्ययनमात्रेणेष्टः स्यामित्यर्थः ॥ ७० ॥ श्रद्धावानिति ॥ श्रद्धावाननसूयश्च

॥ न च तस्मान्मनुष्येषु कश्चिन्मे प्रियकृत्तमः ॥ भविता न च मे तस्मादन्यः प्रियतरो भुवि ॥ ६९ ॥ अध्येष्य ॥
॥ ते च य इमं धर्म्यं संवादमावयोः ॥ ज्ञानयज्ञेन तेनाहमिष्टः स्यामिति मे मतिः ॥ ७० ॥ श्रद्धावाननसूय ॥
॥ श्च शृणुयादपि यो नरः ॥ सोऽपि मुक्तः शुभाँल्लोकान्प्राप्नुयात्पुण्यकर्मणाम् ॥ ७१ ॥ कच्चिदेतच्छ्रुतं पा ॥ त
॥ र्थ त्वयैकाग्रेण चेतसा ॥ कच्चिदज्ञानसंमोहः प्रनष्टस्ते धनंजय ॥ ७२ ॥

यो नरः शृणुयादपि सोऽपि भक्तिवि
रोधिपापेभ्यो मुक्तः पुण्यकर्मणां भक्तानां लोकान्समृद्धान्प्राप्नुयात् ॥ ७१ ॥ कच्चिदिति ॥ मया कथितमेत
त्त्वयावहितेन चेतसा कच्चिच्छ्रुतं तवाज्ञानसंमोहः प्रनष्टः कच्चित् येनाज्ञानेन मूढो न योत्स्यामीत्युक्तवान् ॥ ७२ ॥

अर्जुन उवाच ॥ नष्ट इति ॥ मोहो विपरीतज्ञानं त्वत्प्रसादान्मम स विनष्टः स्मृतिर्यथावस्थिततत्त्वज्ञानं त्वत्प्र
सादादेव लब्धं अनात्मनि प्रकृतावात्माभिमानरूपो मोहः परमपुरुषशरीरतया तदात्मकस्य कृत्स्न
स्य चिदचिद्वस्तुनः अतदात्माभिमानरूपश्च नित्यनैमित्तिकरूपस्य कर्मणः परमपुरुषाराधनरूपतया त
त्प्राप्त्युपायभूतस्य बंधकत्वबुद्धिरूपश्च सर्वो विनष्टः आत्मनः प्रकृतिविलक्षणत्वतत्स्वभावरहितता
तच्छेषतैकस्वभावस्वरूपताज्ञानं भगवतो निखिलजगदुत्पत्तिस्थितिप्रलयलीलाशेषदोषप्रत्यनीककल्या

॥ अर्जुन उवाच ॥ नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाच्युत ॥ स्थितोऽस्मि गतसंदेहः करिष्ये वचनं तव ॥ ७३ ॥

णैकस्वरूपस्वाभाविकानवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृतिसमस्तकल्याणगुणमहार्ण
वपरब्रह्मशब्दाभिधेयपरमपुरुषयाथात्म्यविज्ञानं चैवंरूपपरावरात्मयाथात्म्यविज्ञानतदभ्यासपूर्व
का[illegible]हरहरुपचीयमानपरमपुरुषप्रीत्यैकफलनित्यनैमित्तिककर्मनिषिद्धपरिहारशमदमाद्यात्मगुण
निवर्त्यभक्तिरूपतापन्नपरमपुरुषोपासनैकलभ्यो वेदान्तवेद्यः परमपुरुषो वासुदेवस्त्वमिति ज्ञानं च लब्धं
ततश्च बंधुस्नेहेन कारुण्येन प्रवृ[illegible]द्धविपरीतज्ञानमूलात्सर्वस्मात्त्वत्प्रसादाद्विमुक्तो गतसंदेहः स्वस्थः स्थितो ।

स्थितः इदानीमेवं युद्धादिकर्तव्यताविषयं तव वचनं करिष्ये यथोक्तं युद्धादिकं करिष्य इत्यर्थः ॥७३॥ एवं राज्ञे
यस्य पुत्राः पांडवाश्च युद्धे किमकुर्वतेति पृच्छते ॥ संजय उवाच ॥ इतीति इत्येवं वासुदेवस्य वसुदेवसूनोः
पार्थस्य तत्पितृष्वसुः पुत्रस्य च महात्मनः महाबुद्धेः त्वत्पदद्वन्द्वमाश्रितस्य इमं रोमहर्षणमद्भुतं संवादमहं
यथोक्तं श्रौषं श्रुतवानस्मि ॥७४॥ व्यासेति ॥ व्यासप्रसादात् व्यासानुग्रहेण दिव्यचक्षुःश्रोत्रलाभा

संजय उवाच ॥ इत्यहं वासुदेवस्य पार्थस्य च महात्मनः ॥ संवादमिममश्रौषमद्भुतं रोमहर्षणं ॥७४॥ व्यासप्र॥
सादाच्छ्रुतवानेतद्गुह्यमहं परं ॥ योगं योगेश्वरात्कृष्णात्साक्षात्कथयतः स्वयम् ॥७५॥ राजन्संस्मृत्य संस्मृ॥
त्य संवादमिममद्भुतं ॥ केशवार्जुनयोः पुण्यं हृष्यामि च मुहुर्मुहुः ॥७६॥ तच्च संस्मृत्य संस्मृत्य रूपमत्यद्भु॥
तं हरेः ॥ विस्मयो मे महान्राजन्हृष्यामि च पुनः पुनः ॥७७॥

त् एतत्परं योगाख्यं गुह्यं योगेश्वरात् ज्ञानब
लैश्वर्यवीर्यशक्तितेजसां निधेर्भगवतः कृष्णात् स्वयमेव कथयतः साक्षाच्छ्रुतवानहम् ॥७५॥ राजन्निति ॥
केशवार्जुनयोरिमं पुण्यमद्भुतं संवादं साक्षाच्छ्रुतं स्मृत्वा च मुहुर्मुहुर्हृष्यामि ॥७६॥ तदिति ॥ अर्जुनाय प्रका
शितमैश्वरं हरेरत्यद्भुतं रूपं मया साक्षात्कृतं संस्मृत्य संस्मृत्य हृष्यतो मे महान् विस्मयो जायते पुनः पुनश्च हृष्या



उभयत्वादिसमाश्रयः

यत्रेति ॥ यत्र योगेश्वरः कृष्णः कृत्स्नस्य उच्चावचरूपेणावस्थितस्य चेतनाचेतनस्य वस्तुनः ये ये स्व
भावयोगास्तेषां योगानामीश्वरः स्वसंकल्पायत्तस्वेतरसमस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः कृष्णो व उभयलिंगितत्वपः
सुदेवसूनुः । यत्र पार्थो धनुर्धरः तत्पितृष्वसुः पुत्रः तत्पदद्वन्द्वैकाश्रयः तत्र श्रीर्विजयो भूतिर्नीतिर्ध्रु

यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥७८॥ इति श्रीभग
वद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे श्रीकृष्णार्जुनसंवादे मोक्षयोगो नामाष्टादशोऽध्याय
१८ ॥

॥पुर्व॥

ध्रुवा निश्चला इति मतिर्ममेति ॥ ईश्वरे कर्तृता बुद्धिः सत्त्वोपादेयतान्तिमे । स्वकर्मपरिणामश्च शास्त्र
सारार्थ उच्यते ॥१॥ इति श्रीभगवद्रामानुजमुनिविरचितेऽष्टादशोऽध्यायः ॥१८॥ ॥संपूर्ण॥
संवत् १८४२ ना ज्येष्ठ वदि १ समाप्त ॥ ली॰ गाममगुमेरेवशंकरपटेल: रणछोडभाईज्योबईदासनाजेष्य
स्वामीनारायणवांचवा ॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥ॐ॥ छे

॥ इतिश्रीभगवद्गीताभाष्यग्रंथसंपूर्णः ॥



यत्रेति॥ यत्रयोगेश्वरः कृष्णः कृत्स्नस्यजगत्स्थावरजंगमरूपेणावस्थितस्यचेतनाचेतनस्यवस्तुनः येयेस्वभाव योगास्तेषांयोगानामीश्वरः स्वसंकल्पायत्तस्वेतरसमस्तवस्तुस्वरूपस्थितिप्रवृत्तिभेदः कृष्णोवसुदेव सूनुः यत्रपार्थोधनुर्द्धरः तत्पितृष्वसुः पुत्रः तत्पदद्वंद्वैकाश्रयः तत्रश्रीर्विजयोभूतिर्नीतिर्ध्रुवानि

॥ यत्रयोगेश्वरः कृष्णोयत्रपार्थोधनुर्द्धरः॥ तत्रश्रीर्विजयोभूतिर्ध्रुवानी ॥
॥ तिर्मतिर्मम॥७८॥ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रे ॥
॥ श्रीकृष्णार्जुनसंवादेमोक्षयोगोनामाऽष्टादशोऽध्यायः॥ १८॥ श्रीहरि ॥

ध्रुवाइतिमतिर्ममेति॥७८॥ ईश्वरेकर्तृताबुद्धिः सत्वोपादेयतामतिः स्वकर्मपरिणामश्चशास्त्रसारार्थ उच्यते॥ इतिश्रीभगवद्रामानुजमुनिविरचितेऽष्टादशोऽध्यायः॥ ॥ समाप्तः॥ श्री॥ संपूर्णो॥ संवत १९४२ नाअश्विन सुदि १४ नेचंद्रवारेसंपूर्णो॥ उ॰ गांम उमरेठमां पटेलः रणछोडभाईअंबा ईदासनाजयस्वांमीनारायणवांचवा॥ ॥श्रीरस्तु॥ ॥कल्याणमस्तु॥ ॥श्री॥ ॥

तवचचनंकरिष्येयथोक्तंयुद्धादिकंकरिष्यइत्यर्थः॥७३॥धृतराष्ट्रायमत्पुत्राःपांडवाश्चयुद्धेकिमकुर्वतेतिपृ
ष्टते॥संजयउवाच॥इतीतिइत्येवंवासुदेवस्यवसुदेवसूनोःपार्थस्यतत्पितृष्वसुःपुत्रस्यचमहात्मनःमहा
बुद्धेस्तत्वदर्हंरुमाश्रितस्यइमंरोमहर्षणमद्भुतंसंवादमहंयथोक्तमश्रौषंश्रुतवानस्मि॥७४॥व्यासेति॥व्या
सप्रसादात्तस्यानुग्रहेणदिव्यचक्षुःश्रोत्रलाभात् एतत्परंयोगाख्यंगुह्यंयोगेश्वरात्ज्ञानबलैश्वर्यवी
॥संजयउवाच॥इत्यहंवासुदेवस्यपार्थस्यचमहात्मनः॥संवादमिममश्रौषमद्भुतंरोमहर्षणं॥७४॥व्यास
प्रसादाच्छ्रुतवानेतद्गुह्यमहंपरं॥योगंयोगेश्वरात्कृष्णात्साक्षात्कथयतःस्वयम्॥७५॥राजन्संस्मृत्य
संस्मृत्यसंवादमिममद्भुतं॥केशवार्जुनयोःपुण्यंहृष्यामिचमुहुर्मुहुः॥७६॥तच्चसंस्मृत्यसंस्मृत्यरूपमत्यद्भु
तंहरेः॥विस्मयोमेमहान्राजन्हृष्यामिचपुनःपुनः॥७७॥ र्यवत्त्वात्किलैतत्सांनिध्येर्भगवतःकृष्णात्स्वय
मेवकथयतःसाक्षाच्छ्रुतवानहम्॥७५॥ राजन्निति॥केशवार्जुनयोरिमंपुण्यमद्भुतंसंवादंसाक्षाच्छ्रु
तंस्मृत्वाचमुहुर्मुहुर्हृष्यामि॥७६॥ तदिति॥अर्जुनायप्रकाशितमैश्वरंहरेरत्यद्भुतंरूपंमयासाक्षात्कृतंसं
स्मृत्यसंस्मृत्यहृष्यतोमेमहान्विस्मयोजायतेपुनःपुनश्चहृष्यामिकिमत्रबहुनोक्तेन॥७७॥ ॥





॥ इतिश्रीभगवद्गीताभाष्यग्रंथसंपूर्णं ॥